शाङ्खायन श्रौत सूत्र

यज्ञं व्याख्यास्यामः १ स त्रयाणां वर्णानाम् २ ब्राह्मणक्षत्रिययोर्वैश्यस्य च ३ असंयुज्य विधीयमानं साधारणम् ४ संयोगाद्व्यवतिष्ठते ५ यज्ञोपवीती देवकर्माणि करोति ६ प्राचीनापवीती पित्र्याणि ७ आचमनप्रभृति येनाधिकरणेन संयुज्येत न तेन व्यावर्तेत ८ न च व्यवेयात् ९ इत्यावृतां लक्षणा १० उद्देशः ११ उत्तरत उपाचारः १२ प्राङ्न्यायानि देवकर्माणि १३ दक्षिणान्यायानि पित्र्याणि १४ आसीनन्यायं बाह्वृच्यम् १५ वचनात्स्थानम् १६ होता च कुर्यादनादिष्टम् १७ त्रिप्रभृतिष्वृग्गणेषु प्रथमोत्तमयोस्त्रिर्वचनमन्यत्र जपेभ्यः १८ उत्तमस्य च च्छन्दोमानस्योर्ध्व-मादिव्यञ्जनात्स्यान ओकारः प्लुतस्त्रिमात्रः शुद्धः १९ मकारान्तो वा २० तं प्रणव इत्याचक्षते २१ अवसाने मकारान्तं सर्वेष्वृग्गणेषु सपुरोनुवाक्येषु २२ तेनार्धर्चमुत्तरस्याः संधायावस्यति पादं वा तत्संततमित्याचक्षते २३ स सर्वेषामृग्गणानां धर्मो ये कर्मसंयोगेन चोद्यन्ते २४ विदूरेष्वपि कर्मस्वन्तरेण प्रथमां परिधानीयां च संतानार्थोऽर्धर्चेन काङ्क्षति २५ अर्धर्चन्यायाश्चर्चः २६ वचनादन्यत् २७ उच्चैर्न्यायश्चर्ग्वेदः २८ वचनादुपांशुता २९ संस्वारन्यायता च शब्दानाम् ३० एकस्वर्यं च ३१ उच्चैस्तरां प्रणवः पुरोनुवाक्यायाः ३२ प्रणवाद्याज्योच्चैस्तराम् ३३ उच्चैस्तरां वषट्कारः ३४ समो वा ३५ प्रणवो येयजामहो वषट्कारः संप्रैषाः प्रैषाश्चोच्चैरुपांशुहविःषु ३६ देवतानामधेयं चोपांशु निगमस्थानेषु ३७ भूर्भुव इति पुरस्ताज्जपः ३८ ये यजामहे वौषलोजः सहः सह ओजः स्वरित्युपरिष्टादिति चतुष्टयं सर्वासु याज्यासु ३९ अनुयाजेषु तु येयजामहो नास्ति ४० अनुवषट्कारे च ४१ प्लुतेन याज्यान्तेन वषट्कारस्य संधानम् ४२ अप्लुतेन वा ४३ तदुपांशुयाजे नास्ति ४४ १

प्लावयेदाकारमावाहनम् १ येयजामहः प्लुतादिः पुरस्ताद्याज्यानाम् २ चतुर्मात्रा याज्ञिकी प्लुतिः ३ सन्ध्यक्षराणां तालुस्थाने आ३इकारीभवतः ४ ओष्ठ्यस्थाने आ३उकारीभवतः ५ अन्यानि प्रकृत्याक्षराणि ६ एकारौकारौ च प्रगृह्यौ ७ याज्यान्ते ८ विसर्जनीयो रिफितो रेफमापद्यते ९

लुप्यतेऽरिफितः १० अनुस्वारं मकारः ११ अन्यानि प्रकृत्या व्यञ्जनानि १२ औकारी वषट्कारे चतुर्मात्रः १३ षकाराच्चोत्तरोऽकारः १४ प्रकृत्या वोभौ १५ पूर्वो वा प्रकृत्या १६ प्रकृत्याकार इति जातूकर्ण्यः १७ बार्हतराथन्तरं वषट् कुर्यात्पुरस्ताद्दीर्घमुपरिष्टाद्ध्रस्वम् १८ उपरिष्टाच्च येयजामहाद्देवतादेशनं सपुरोनुवाक्ये १९ सप्रैषे तु न विद्यते २० जुहोतीत्युक्ते सर्पिः प्रतीयेत २१ स्वाहाकारोऽन्ते होममन्त्राणाम् २२ समिदाधानमन्त्राणां च २३ मन्त्रपृथ-क्त्वात्कर्मपृथक्त्वम् २४ इतिकरणश्च मन्त्रान्ते २५ मन्त्रान्तेन करणेषु कर्मणः संनिपातनम् २६ संप्रेषितोऽन्वाह २७ तथा यजति २८ इत्येत-त्सार्वयज्ञिकम् २९ २

उपोय्य पौर्णमासेन हविषा यजते १ तथामावास्येन २ द्वे पौर्णमास्यौ ३ अमावास्ये च ४ यां पर्यस्तमयं पूर्ण उदियाद्यां चास्तमिते ते पौर्णमास्यौ ५ श्वो न द्रष्टेति यदहश्च न दृश्येत ते अमावास्ये ६ तत्रेज्यायां याथाकामी ७ इति पौर्णमास्यामित्यमावास्यायामित्युपदेशाद्व्यवतिष्ठन्ते ८ तत्संयुक्ताश्च शब्दाः ९ समानमन्यत् १० उभयत्राग्नेयः पुरोलाशः ११ अग्नीषोमीय उपांशुयाजः १२ वैष्णवो वा १३ अग्नीषोमीयश्च पुरोलाशः पौर्णमासे हविषि १४ ऐन्द्राग्नोऽसंनयतो द्वितीयोऽमावास्यायाम् १५ ऐन्द्रं सांनाय्यं संनयतः १६ माहेन्द्रं वा १७ वैष्णवं त्वसंनयन्नुपांशुयाजम् १८ ३

आमन्त्रितो होतान्तरेणोत्करं प्रणीताश्च प्रतिपद्य दक्षिणेन प्रपदेन बर्हिराक्रमणम् १ वेद्यन्तसंमिता पश्चात्पार्ष्णिः २ विक्रम्य च स्थानम् ३ अग्नय समि-ध्यमानायेति संप्रेषितः ४ कं प्रपद्ये तं प्रपद्ये यत्ते प्रजापते शरणं छन्दस्त-त्प्रपद्ये यावत्ते विष्णो वेद तावत्ते करिष्यामि देवेन सवित्रा प्रसूत आर्त्विज्यं करिष्यामि नमो अग्नये उपद्रष्ट्रे नमो वायव उपश्रोत्रे नम आदित्यायानुख्यात्रे जुष्टामद्यदेवेभ्यो वाचं वदिष्यामि शुश्रूषेण्यां मनुष्येभ्यः स्वधावतीं पितृभ्यः प्रतिष्ठां विश्वस्मै भूताय प्रशास्त आत्मना प्रजया पशुभिः प्रजापतिं प्रपद्येऽभयं नो अस्तु प्राजापत्यमनुवक्ष्यामि वागार्त्विज्यं करिष्यति वाचं प्रपद्ये भूर्भुवः स्वरिति जपित्वा ५ त्रिर्हिंकृत्य ६ प्र वो वाजा इत्युपसंधाय मध्यमया वाचा ७ अग्न आ याहि वीतय ईलेन्य इति तृचौ ८ अग्निं दूतं वृणीमह इत्येका ९ समिध्यमानो अध्वर इत्येका १० तिस्रः माप्तदश्ये ११ तदन्यत्र मायनाभ्यां

दर्शपूर्णमासाभ्याम् १२ समिद्धो अग्न आहुतेति द्वे १३ अग्ने महाँ असि ब्राह्मण भारतेति प्रणवेन मंधाय १४ अमुतोऽर्वाञ्चि यजमानस्य त्रीण्यार्षेयाण्यभिव्याहृत्य १५ षट् तु द्विगोत्रस्य १६ पुरोहितप्रवरेणाब्राह्मणस्य १७ मानवेति वा सर्वेषाम् १८ देवेद्धो मन्विद्ध ऋषिष्टुतो विप्रानुमदितः कविशस्तो ब्रह्मसंशितो घृताहवन इत्यवसाय १९ प्रणीर्यज्ञानां रथीरध्वराणामतूर्तो होता तूर्णिर्हव्यवालित्यवसाय २० आस्यात्रं जुहुर्देवानां चमसो देवपानोऽराँ इवाग्ने नेमिर्देवांस्त्वं परिभूरसीत्यवसाय २१ व्यवस्यन्नावाहयति देवताः २२ ४

आवह देवान्यजमानाय १ अग्निमग्न आवह सोममावहेत्याज्यभागौ २ अग्निमावहाग्नीषोमावावह विष्णुं वाग्नीषोमावावहेन्द्राग्नी आवहेन्द्रमावह महेन्द्रं वा ३ देवाँ आज्ययाँ आवह ४ अग्निं होत्रायावह ५ स्वं महिमानमावह ६ आ च वह जातवेदः सुयजा च यजेत्यावाह्य ७ उपविश्योर्ध्वजानुर्दक्षिणेन प्रादेशेन भूमिमन्वारभ्य जपति ८ अस्यै प्रतिष्ठायै मा च्छित्सि पृथिवि मातर्मा मा हिंसीर्मा मोदोषीर्मधु मनिष्ये मधु वनिष्ये मधु जनिष्ये मधुमतीमद्य देवेभ्यो वाचं वदिष्यामि चारुं मनुष्येभ्य इदमहं पञ्चदशेन वज्रेण पाप्मानं भ्रातृव्यमवबाध इति । सप्रदशेन वा ९ ५

मानुष इत्युक्तः १ देव सवितरेतं त्वा वृणते सह पित्रा वैश्वानरेणेन्द्र पूषन्बृहस्पते प्र च वद प्र च यज वसूनां रातौ स्याम रुद्राणामोम्यायां स्वादित्या आदित्या अनेहसो यदद्य होतृवूर्ये जिह्मं चक्षुः परापतात् अग्निष्टत्पुनराभराज्जातवेदा विचर्षणिरिति प्रवृतो जपित्वा २ उपोत्थायाध्वर्योर्दक्षिणेन प्रादेशेन दक्षिणमंसमन्वारभ्य जपति सव्येनाग्जीधो दक्षिणम् इन्द्रमन्वारभामहे होतृवूर्ये पुरोहितम् येनायन्नुत्तमं स्वर्देवा अङ्गिरसो दिवम् षष्टिश्चाध्वर्यू नवतिश्च पाशा अन्तरा द्यावापृथिवी विचृत्ताः सिनन्ति पाकमधि धीर एमि स्योने मे द्यावापृथिवी उभेदूमे इति ३ षण्मोर्वीरंहसः पान्तु द्यौश्च पृथिवी चाहश्च रात्रिश्चापश्चौषधयश्चेत्यवसृज्य ४ ऐन्द्रीमावृतमावर्त आदित्यस्यावृतमन्वावर्त इति दक्षिणं बाहुमन्वावृत्य ५ निरस्तः परावसुर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तेन सहेति होतृषदनाच्छुष्कं तृणमुभयतः प्रतिच्छिद्य दक्षिणापरमवान्तरदेशं निरस्य ६ अप उपस्पृश्य ७ अशुष्कमुदगग्रं निधाय ८ इदमहमर्वावसोः सदसि सीदामीत्युपविश्य ९ दक्षिणोत्त-

रिणमुपस्थं कृत्वा प्राञ्चौ पाणी प्रगृह्य जपति १० नमो द्यावापृथिवीभ्यां होतृभ्यां पूर्वसूभ्यां विश्वकर्माणौ तनूपौ मे स्थस्तन्वं मे पातं मा मा हिंसिष्टं मा मा संताप्तमित्याहवनीयं प्रेक्ष्य गार्हपत्यं च ११ उदक्संसर्पन्नाहैष वामाकाश इति १२ विश्वे देवाः शास्तन तदद्य वाचो नमो महद्भ्य इति जपित्वा १३ अग्निर्होता वेत्वग्निर्होत्रं वेतु प्रावित्रं साधु ते यजमान देवतेत्यवसाय १४ योऽग्निं होतारमवृथा इत्युपांशु १५ घृतवतीमध्वर्यो स्रुचमास्यस्व देवयुवं विश्ववारामीलामहै देवाँ ईलेन्यान्नमस्याम नमस्यान्यजाम यज्ञियानिति स्रुचावादाप्य पञ्च प्रयाजान्यजति १६ ६

समिधः समिधो अग्न आज्यस्य व्यन्त्विति प्रथमः १ तनूनपादग्न आज्यस्य वेत्विति द्वितीयः २ नराशंसो अग्न आज्यस्य वेत्विति द्वितीयो वसिष्ठशुनकानामत्रिवध्र्यश्वानां कण्वसंकृतीनां राजन्यानां प्रजाकामानां च ३ इलो अग्न आज्यस्य व्यन्त्विति तृतीयः ४ बर्हिरग्न आज्यस्य वेत्विति चतुर्थः ५ स्वाहाग्निं स्वाहा सोमं स्वाहाग्निं स्वाहाग्नीषोमौ विष्णुं वा स्वाहाग्नीषोमौ स्वाहेन्द्राग्नी स्वाहेन्द्रं महेन्द्रं वा स्वाहा देवा आज्यपा जुषाणा अग्न आज्यस्य हविषो व्यन्त्विति प्रयाजयाज्याः ६ ७

अग्निर्वृत्राणि त्वं सोमासि सत्पतिरित्याज्यभागौ वार्त्रघ्नौ पौर्णमास्याम् १ अग्निः प्रत्नेन सोम गीर्भिरित्यमावास्यायां वृधन्वन्तौ २ जुषाणो अग्निराज्यस्य हविषो वेतु जुषाणः सोम आज्यस्य हविषो वेत्विति याज्ये ३ अग्निर्मूर्धेत्याग्नेयस्य पुरोनुवाक्या ४ भुवो यज्ञस्येति याज्या ५ अग्नीषोमाविमम्मित्युपांशुयाजस्य पुरोनुवाक्या ६ जुषाणावग्नीषोमावाज्यस्य हविषो वीतामिति याज्या ७ इदं विष्णुर्वषट ते विष्णविति वैष्णवस्य ८ जुषाणो वा ९ अग्नीषोमा सवेदमा युवमेतानीत्यग्नीषोमीयस्य १० इन्द्राग्नी अवसा प्र चर्षणिभ्य इत्यैन्द्राग्नस्य ११ एन्द्र सानसिं प्र ससाहिष इति सांनाय्यस्य १२ महाँ इन्द्रो य ओजसा महाँ इन्द्रो नृवदिति माहेन्द्रस्य १३ इन्द्रं वो विश्वतो मादयस्व हरिभिरितीन्द्रस्याप्रतिनिधेः १४ ८

पिप्रीहि देवानिति स्विष्टकृतः पुरोनुवाक्या १ अयालग्निरग्नेः प्रिया धामान्ययाट सोमस्य प्रिया धामान्ययालग्नेः प्रिया धामान्ययालग्नीषोमयोः प्रिया

धामानि विष्णोर्वायालग्नीषोमयोः प्रिया धामान्ययालिन्द्राग्न्योः प्रिया धामान्ययालिन्द्रस्य प्रिया धामानि महेन्द्रस्य वायाड्देवानामाज्यपानां प्रिया धामानि यज्ञदग्नेर्होतुःप्रिया धामानि यज्ञत्स्वं महिमानमायजतामेज्या इषः कृणोतु सो अध्वरा जातवेदा जुषतां हविरग्ने यदद्य विशो अध्वरस्येति याज्या २ वषट्कृत्योपस्पर्शनम् ३ ९

इलामुपह्वास्यमानस्य दक्षिणस्य पाणेः प्रदेशिन्यामनक्ति । उत्तमे च पर्वणि मध्यमे च १ वाचस्पतिना ते हुतस्य प्राश्नामीषे प्राणायेति पूर्वमञ्जनमध- रौष्ठे तिलिप्पति । मनसस्पतिना ते हुतस्य प्राश्नाप्यूज उदानायेत्युत्तरौष्ठ उत्तरम् २ उपस्पृश्य ३ दक्षिणेनोत्तरेलां धारयन् ४ अप्रसारिताभिरङ्गु- लिभिरमुष्टिकृताभिः ५ स्वयं पञ्चममादाय ६ मुखसंमितां धारयन्हृद- यसंमितां वा ७ १०

उपह्तं बृहत्सह दिवा सह सूर्येण सह चक्षुषोप मां बृहत्सह दिवा सह सूर्येण सह चक्षुषा ह्वयताम् । उपहूतं वामदेव्यं सहान्तरिक्षेण सह वायुना सह प्राणेनोप मां वामदेव्यं सहान्तरिक्षेण सह वायुना सह प्राणेन हूयताम् । उपहूतं रथन्तरं सह पृथिव्या सहाग्निना सह वाचा सह पशुभिरुप मां रथन्तरं सह पृथिव्या सहाग्निना सह वाचा सह पशुभिर्हूयताम् । उपहूतं स्थास्नु भुवन- मुप मां स्थास्नु भुवनं हूयताम् । उपहूतं चरिष्णु भुवनमुप मां चरिष्णु भुवनं हूयताम् । उपहूतः सखा भक्ष उप मां सखा भक्षो हूयताम् । उपहूताः सप्त होत्रा उप मां सप्त होत्रा हूयन्ताम् । उपहूता गावः सहाशिरोप मां गावः सहाशिरा हूयन्ताम् । उपहूता धेनुः सहऋषभोप मां धेनुः सहऋषभा हूयताम् । उपहूता वाक्सह प्राणेनोप मां वाक्सह प्राणेन हूयताम् । उपहूता वाक्सह मनसोप मां वाक्सह मनसा हूयताम् । उपहूतेला वृष्टिरुप मामिला वृष्टिर्हूयताम् । उपहूतेला ततुरिरुप मामिला ततुरिर्हूयताम् । उपहूता हे सासि जुषस्व मेल इति जपित्वेलामुपहूयते १ ११

इलोपहूतोपहूतेलोपास्माँ इला हूयतामिलोपहूता मानवी घृतपदी मैत्रावरुणी ब्रह्म देवकृतमुपहूतम् । दैव्या अध्वर्यव उपहूता उपहूता मनुष्या य इमं यज्ञमवान्ये च यज्ञपतिं वर्धान् । उपहूते द्यावापृथिवी पूर्वजे ऋतावरी देवी

देवपुत्रे । उपहूतोऽयं यजमान उत्तरस्यां देवयज्यायामुपहूतो भूयसि हविष्करण इदं मे देवा हविर्जुषन्तामिति तस्मिन्नुपहूत इत्युपहूय १ अवघ्राय २ अन्तरिलं चतुरवानिति ३ अन्ते वा चतुर्थम् ४ इलासि स्योनासि स्योनकृत्सा नः सुप्रजास्त्वे रायस्पोषे धाः । जुष्टे जुष्टिं ते गमेय उपहूत उपहवं तेऽशीय मुखस्य त्वा द्युम्नाय सुरभ्यास्यत्वाय प्राश्नामीत्युत्तरेलां प्राश्य ५ इतरां यजमानपञ्चमाः प्राश्य ६ आ मार्जनाद्वाग्यमनम् ७ इदमाप इति तृचेनान्तर्वेदि पवित्रवति मार्जयन्ते ८ परिहृते ब्रह्मभागे ऽन्वाहार्यमाहरन्ति ९ एष दक्षिणाकालः सर्वासामिष्टीनाम् १० नान्वाहार्यो ऽस्त्यादिष्टदक्षिणासु ११ एषा ते अग्ने समित्तया वर्धस्व चा च प्यायस्व वर्धिषीमहि च वयमा च प्यासिषीमहि इति समिधमनुमन्त्रा १२ त्रीननुयाजान्यजति १३ १२

देवं बर्हिर्वसुवने वसुधेयस्य वेतु १ देवो नराशंसो वसुवने वसुधेयस्य वेतु २ देवो अग्निः स्विष्टकृत्सुद्रविणा मन्द्रः कविः सत्यमन्मायजी होता होतुर्होतुरायजीयानग्ने यान्देवानयाड्याँ अपिप्रेर्ये ते होत्रे अमत्सतेत्यवसाय ३ तां समनुषीं होत्रां देवंगमां दिवि देवेषु यज्ञमेरयेमं स्विष्टकृच्चाग्ने होता भूर्वसुवने वसुधेयस्य नमोवाके वीहीत्यनुयाजयाज्याः ४ १३

सूक्ता ब्रूहीत्युक्तः १ इदं द्यावापृथिवी भद्रमभूदार्ध्म सूक्तवाकमुत नमोवाकमृध्यास्म सूक्तोच्यमग्ने त्वं सूक्तवागसीत्यवसाय २ उपश्रुती दिवस्पृथिव्योरोमन्वती ते अस्मिन्यज्ञे यजमान द्यावापृथिवी स्तामित्यवसाय ३ शंगयी जीरदानू अत्रस्नू अप्रवेदे उरुगव्यूती अभयंकृतावित्यवसाय ४ वृष्टिद्यावा रीत्यापा शंभुवौ मयोभुवा ऊर्जस्वती पयस्वती सूपचरणा च स्वधिचरणा च तयोराविदीत्यवसाय ५ अग्निर्हविरजुषतावीवृधत महो ज्यायो ऽकृत ६ सोमो हविरजुषतावीवृधत महो ज्यायोऽकृत ७ अग्निर्हविरजुषतावीवृधत महो ज्यायोऽकृत ८ अग्नीषोमौ हविरजुषेतामवीवृधेतां महो ज्यायोऽक्राताम् ९ विष्णुर्वा १० अग्नीषोमौ हविरजुषेतामवीवृधेतां महो ज्यायोऽक्राताम् ११ इन्द्राग्नी हविरजुषेतामवीवृधेतां महो ज्यायोऽक्राताम् १२ इन्द्रो हविरजुषतावीवृधत महो ज्यायोऽकृत । महेन्द्रो वा १३ देवा आज्यपा आज्यमजुषन्तावीवृधन्त महो ज्यायोऽक्रत १४ अग्निर्होत्रेण हविरजुषतावी-

वृधत महो ज्यायोऽकृत १५ अस्यामृधद्धोत्रायां देवंगमायामाशास्तेऽयं यजमानः १६ असावसाविति नामनी यजमानस्याभिव्याहृत्योत्तरां देवयज्यामाशास्ते भूयो हविष्करणमाशास्त आयुराशास्ते सुप्रजास्त्वमाशास्ते दिव्यं धामाशास्ते १७ यदनेन हविषाशास्ते तदश्यात्तदृध्यात्तदस्मै देवा रासान्तां तदग्निर्देवो देवेभ्यो वनुतां वयमग्नेः परि मानुषाः १८ इष्टं च वीतं चाभूदुभे चैनं द्यावापृथिवी अंहसः पातामेह गतिर्वामस्येदं च नमो देवेभ्य इति १९ नम उपेति बर्हिष्यञ्जलिं निधोय जपति २० शंयोर्ब्रूहीत्युक्तस्तच्छंयोरिति शंयोर्वाकमुक्त्वोपस्पृश्य २१ स्रुगादापनादि मन्द्रयाज्यभागान्तम् २२ परं मध्यमया २३ अनुयाजाद्युत्तमया २४ १४

उपांशु गार्हपत्ये पत्नीसंयाजैश्चरन्ति १ सोमं त्वष्टारं देवानांपत्नीरग्निं गृहपतिमिति यजति २ राकासिनीवाल्यौ प्रजाकामस्य पूर्वे गृहपतेः ३ आ प्यायस्व सं ते पयांसीह त्वष्टारं तन्नस्तुरीपं देवानांपत्नीरुत ग्ना व्यन्तु राकामहं यास्ते राके सिनीवालि या सु बाहुरग्निर्होता गृहपतिर्वयमु त्वा गृहपत इति ४ यथा ह त्यद्वसव इति जपित्वेलामुपहूयते ५ उपहूतेयं यजमानीति वा विकारः ६ इलान्ताः पत्नीसंयाजाः ७ शंय्वन्ता वा ८ प्र त्वा मुञ्चामीति वेदं विमुच्य योक्त्वम् ९ अञ्जलौ पत्न्याः कृत्वा वेदं च मुक्तम् १० अद्भिर्वेदयोक्त्रे परिषिञ्चञ्जपति ११ कामाय त्वा वेदोऽसि येन त्वं वेद देवेभ्यो वेदो ऽभवस्तेनास्मभ्यं वेद एधि । वेदोऽसि वित्तिरसि विदेयं कर्मासि करणमसि क्रियासं सनिरसि सनितासि सनेयम् १२ घृतवन्तं कुलायिनं रायस्पोषं सहस्रिणम् वेदो ददातु वाजिनम् इति वेदे पत्नीं वाचयति १३ सा तृणानि प्रगृह्यान्तरेणोरू न्यस्यते १४ तन्तुं तन्वन्नित्युत्तरेण गार्हपत्यमा बर्हिषः स्तीर्त्वा १५ आपृणोऽसि संपृणः प्रजया मा पशुभिरा पृणेति वेदशेषमुपस्थाय १६ एतेनाग्ने ब्रह्मणा अयाडयज्ञं जातवेदा अन्तरः पूर्वो अस्मिन्निषद्य । सन्वन्सनिं सुविमुचा वि मुञ्च धेह्यस्मभ्यं द्रविणं जातवेदः इत्याहवनीयमुपस्थाय १७ उपस्पृश्योत्सृज्यते १८ १५

व्याख्यातौ दर्शपूर्णमासौ प्रकृतिरिष्टिपशुबन्धानाम् १ अन्वयस्य प्रकृतिरित्याख्या २ अन्तरेणाज्यभागौ स्विष्टकृतं च यदिज्यते तमावाप इत्याचक्षते तत्प्रधानम् ३ तदङ्गानीतराणि ४ तेषामभिन्नकालेऽर्थे विभवः ५ तन्त्रल-

क्षणं तत् ६ प्रदानमुच्चावचाभिर्देवताभिः संयुज्य श्रूयते ७ तत्र देवताविकारे तद्देवते याज्यापुरोनुवाक्ये ८ निगमस्थानेषु च सा देवतोपलक्ष्यते ९ आवाहन उत्तमे प्रयाजे स्विष्टकृन्निगदे सूक्तवाके चेज्यमाना देवता निगच्छन्ति तस्मान्निगमस्थानानि १० अनुक्रामन्तश्च विकारान्व्याख्यास्यामः ११ पौर्णमासीविकार इत्युक्तो वार्त्रघ्नौ प्रतीयात् १२ अमावास्याविकार इति वृधन्वन्तौ १३ अनादेशे विकल्पभूतौ १४ देवतातः १५ हविष्टो वा १६ संनिपाते हविष्टः १७ सामान्यान्नियमः १८ साप्तदश्यं च सामिधेनीनाम् १९ इष्टिपशुबन्धेषु वचनादन्यत् २० काम्यासूपांशुहविष्टा २१ अनुक्रामन्तश्च व्याख्यास्यामः २२ १६

चोदनाप्रकरणे हविषां प्रतीकग्रहणं याज्यापुरोनुवाक्यानां न चेदन्योऽर्थसंयोगः १ द्विप्रभृतिषु चोदनानुपूर्व्येण २ दैवतेन ३ लिङ्गेन च ४ उपसृष्टासु देवतास्वनधिगछंस्तल्लिङ्गे दैवतेन तुष्येत् ५ उपसृष्टास्तु निगच्छन्ति ६ अभीक्ष्णं चैकैकस्यै देवतायै हविश्चोद्यते तत्र ये प्रथमोपदिष्टे याज्यापुरोनुवाक्ये ते सर्वत्र प्रतीयात् ७ न चेष्टयः पृथक्त्वतः शक्याः परिसङ्ख्यातुम् ८ तत्रानादिष्टयाज्यापुरोनुवाक्यासु गायत्रीत्रिष्टुभौ तद्देवते परीछेत् ९ उष्णिग्बृहत्यौ वा परिहाप्य १० वर्षीयसी तु याज्या ११ समे वा १२ यत्रैतेषां लक्षणानां किंचित्स्यात् १३ हुवे हवामहे श्रुध्यागह्येदं बर्हिर्निषीद देवतानामेति पुरोनुवाक्यालक्षणानि १४ अद्धि पिब जुषस्व मत्स्वावृषायस्व वीहि प्र देवतानामेति याज्यालक्षणानि १५ पुरस्ताल्लक्षणा पुरोनुवाक्या १६ उपरिष्टाल्लक्षणा याज्या १७ अनधिगछंस्तद्देवते नम्राभ्यां यजेत् १८ इममा शृणुधी हवं यत्त्वा गीर्भिर्हवामहे । एदं बर्हिर्निषीद नः

स्तीर्णं बर्हिरानुषगा सदेतोपेलाना इह नो अद्य गच्छ
अहेलता मनसेदं जुषस्व वीहि हव्यं प्रयतमाहुतं नः

इत्यूहेदिद्वदेवतबहुदेवतेषु १९ प्राकृतीर्वाभिसंनमेत्प्राकृतीर्वाभिसंनमेत् २० १७

इति शाङ्खायनश्रौतसूत्रे प्रथमोऽध्यायः समाप्तः

वसन्ते ब्राह्मणस्याग्न्याधेयम् १ ग्रीष्मे क्षत्रियस्य २ वर्षासु वैश्यस्य ३ शरदि वा ४ शिशिरः सर्ववर्णानाम् ५ याथाकाम्यमृतूनां सोमेन यक्ष्यमाणस्य ६ अमावास्यायां पौर्णमास्यां वा दधीत ७ शुद्धपक्षे वा पुण्ये नक्षत्रे ८ कृत्तिकाप्रभृतीनि त्रीणि फल्गुनीप्रभृतीनि च ९ १

अथेष्टिकालाः १ सद्यो द्वादशाहे मास ऋतौ संवत्सरे वा २ अग्नये पवमानायेष्टिः ३ पौर्णमासीविकारः ४ अग्न आयूंष्यग्ने पवस्व ५ तं हि शश्वन्त ईलते ते स्याम ये अग्नय इति स्विष्टकृतः ६ अग्नये च पावकायाग्नये च शुचये द्वितीया ७ अमावास्याविकारः ८ अग्ने पावक स नः पावक ९ अग्निः शुचिव्रततम उदग्ने शुचयः १० अग्निमग्निं हवीमभिरग्निनाग्निः समिध्यत इति स्विष्टकृतः ११ अदितये तृतीया १२ त्वमग्ने सप्रथाः सोम यास्त इति सद्वन्तावाज्यभागौ १३ उत त्वामदिते महि महीमू षु मातरं सुव्रतानामृतस्य पत्नीमवसे हुवेम तुविक्षत्रामजरन्तीमुरूचीं सुशर्माणमदितिं सुप्रणीतिम् १४ प्रेद्धो अग्न इमो अग्न इति विराजौ स्विष्टकृतः १५ चतस्रः कुर्वन्तोऽग्नये प्रथमाम् १६ अग्ने द्युम्नेनोप त्वा जुहूः १७ अर्चन्तस्त्वाग्निं स्तोमेनेति स्विष्टकृतः १८ २

प्रथमे वा समानतन्त्रे १ मध्यमे वा २ द्विहविषो वा ३ आदित्यस्यैन्द्राग्नो द्वितीयो ब्राह्मणस्य ४ अग्नीषोमीयो वा ५ ऐन्द्रो राजन्यस्य ६ वैश्वदेवो वैश्यस्य ७ विश्वे देवासः स्तीर्णे बर्हिषि ८ आग्नेयी वा द्वयोः पूर्वा ९ आज्येन तनूदेवताः पुरस्तात्पुरोलाशस्याग्निं पवमानं पावकं च शुचिं चोपरिष्टात् १० विश्वेभिरग्ने अग्निभिरग्ने विश्वेभिरग्निभिरिति स्विष्टकृतः ११ अदितये द्वितीया १२ अमावांस्याविकारः १३ ताक्ष्णीनां तनूदेवताभिरेकहविषस्त्र्यहं वैष्णवद्वितीयाभिरपरमादित्यतृतीयाभिरपरं दशम्यविकृताग्नेयी १४ सर्वासूपांशुहविष्टा १५ पाञ्चदश्यं च सामिधेनीनाम् १६ सप्तदशादित्यायाम् १७ चतुर्विंशतिर्दक्षिणा १८ द्वादश १९ षड्वा २० अश्वः २१ शतमानरथवासोऽजाश्च २२ द्वादशरात्रं स्वयंहोमी स्यात् २३ सत्यवंदनं च २४ अतिथिभ्यश्च दानम् २५ आहिताग्निर्व्रते नानिष्ट्वा पशुना मांसमश्नीयान्नानिष्ट्वाग्रयणेन नवानामोषधीनां फलानि २६ ३

पूर्वा दर्शपूर्णमासाभ्यामन्वारम्भणीयेष्टिः १ आग्नावैष्णवः सरस्वत्यै सरस्वते च २
अग्नाविष्णू महि तद्वां महित्वं पातं घृतस्य गुह्यानि नाम ।
दमेदमे सुष्टुतिर्वामियानोप वां जिह्वा घृतमुच्चरण्यत् ॥
अग्नाविष्णू महि धाम प्रियं वां वीथो घृतस्य गुह्या जुषाणा ।
दमेदमे सप्त रत्ना दधाना प्रति वां जिह्वा घृतमुच्चरण्यत् ३
पावका नः सरस्वतीमा जुह्वानाः ४ जनीयन्तः स वावृधे ५ पञ्चहविषमेकेऽग्नये भगिने व्रतपतये च ६ त्वमग्ने वीरवद्यशस्त्वं भगो नः ७ त्वमग्ने व्रतपा यद्वो वयम् ८ पौर्णमासीविकारः ९ धेनुश्च दक्षिणा १० ४

काम्यं पुनराधेयमजानानस्य १ आग्नेयोऽग्नये च वैश्वानरायोद्वासयिष्यमाणस्य २ वैश्वानरो न ऊतय आ प्रयातु परावतः अग्निर्नः सुष्टुतीरुप पृष्टो दिवि ३ मध्यावर्षं पुनराधेयकालः ४ पुनर्वसू च नक्षत्रम् ५ या वाषाढ्या उत्तरामावास्या ६ मध्यन्दिनश्च कालः ७ पञ्चकपालश्चाग्नेयः ८ सामिधेन्यश्च पञ्चदश ९ त्रिषु च प्रयाजेष्वग्निशब्दो विकृतः १० तनूनपादग्निमिलो अग्निना बर्हिरग्निः ११ वार्त्रघ्नः पूर्व आज्यभागः १२ अग्निं स्तोमेन बोधयेति वाग्नये बुद्धिमते १३ अग्न आयूंषीत्युत्तरोऽग्नये पवमानाय १४ एह्यू षु ब्रवाणीति वन्दुमते १५ अग्निर्मूर्धेति वा रेतस्वते १६ यथाचोदितं यजति १७ अग्ने तमद्येति प्रथमातृतीये हविषो द्वितीयाचतुर्थ्यौ स्विष्टकृतः १८ देवं बर्हिरग्नेर्वसुवने देवो नराशंसोऽग्ना वसुवने १९ अग्निशब्दं चतुर्षु पूर्वेषु प्रयाजेष्वनुयाजयोश्च विभक्तय इत्याचक्षते २० ताश्चोपांशु २१ उत्तरश्चाज्यभागः २२ हविश्च २३ सर्वं वा सह पूर्वाभ्यामनुयाजाभ्याम् २४ हविरन्तं वा २५ हविरेव वा २६ पुनरुत्स्यूतो जरत्संव्यायः पुनःसंस्कृतः कट्र्थोऽनड्वान्हिरण्यं वा दक्षिणा २७ अदितये द्वितीया २८ अमावास्याविकारः २९ आग्निवारुणी वा ३० स त्वं नो अग्नेऽवमस्त्वं नो अग्ने वरुणस्य विद्वानिति ३१ ५

अग्निहोत्रं जुहोति सायं च प्रातश्च १ पुरा छायानां संसर्गाद्गार्हपत्यादाहवनीयमुद्धरति २ प्रभान्त्यां रात्र्याम् ३ प्रादुष्करणं नित्यधृतः ४ गतश्रियः शुश्रुवान् ब्राह्मणो ग्रामणी राजन्यः ५ उद्ध्रियमाण उद्धर पाप्मनो

मा यदविद्वान्यच्च विद्वांश्चकार अह्ना यदेनश्चकृमेह किंचित्सर्वस्मान्मोद्धृतः पाहि तस्मात् ६ अमृताहुतिममृतायां जुहोम्यग्निं पृथिव्याममृतस्य जित्यै तयानन्तं लोकमहं जयानि प्रजापतिर्यं प्रथमो जिगाय । इति ७ रात्र्येति प्रातर्विकारः ८ परिसमुह्य होष्यन् ९ ऋतं त्वा सत्येन परिषिञ्चामीति त्रिस्त्रिरेकैकं पर्युक्ष्य हुत्वा च १० सत्यं त्वर्तेन परिषिञ्चामीति प्रातः ११ यज्ञस्य संततिरसि यज्ञस्य त्वा संतत्यै नयानीति गार्हपत्यात्संततामुदधारामाहवनीयात् १२ तन्तुं तन्वन्नित्यन्तरा श्वापदे गते १३ ६

प्रथमास्तमिते जुहोति १ दृश्यमाने वा नक्षत्रे २ उपोदयं व्युषिते ३ उदिते वा ४ पुरस्तात्तु काले मनः कुर्वीत ५ तस्यापराधे प्रायश्चित्तम् ६ उन्नीयाभ्युदितमा तमनादासित्वा हुत्वा वरं दत्त्वा भूरित्यनुमन्त्रयेत ७ अहुत्वा वोदुह्याहवनीयमन्यं प्रणीय जुहुयात् ८ पयो यवागूर्दध्याज्यमित्यग्नि-होत्रहवींषि ९ न दध्यधिश्रयति १० नापः प्रत्यानयत्याज्ये ११ कृशतरुणे प्रत्यस्याज्यस्योन्नयति १२ पश्चादन्वाहार्यपचनाद्यजमानः प्रत्यङ्तिष्ठन्नादि-त्यमुपतिष्ठते सत्य ऋताय त्वा दक्षिणां नयानीति सायम् १३ ऋत सत्याय त्वा दक्षिणां नयानीत्याहवनीयं प्रातः १४ उत्तरेणान्वाहार्यपचनं यजमानस्य संचरः १५ दक्षिणतः पश्चादाहवनीयादासनम् १६ एवं गार्हपत्यात्पत्न्याः १७ वृष्टिरसि पाप्मानं मे वृश्च विद्यासि विद्य मे पाप्मानमित्याचामति १८ वाचं च यच्छति १९ ७

दक्षिणतोऽग्निहोत्रीमुपसृजन्ति १ न चान्तरेण संचरेरन् २ न च शूद्रेण दोहयेत् ३ अग्नये देवेभ्यो धुक्ष्वेति सायं जपति ४ सूर्याय देवेभ्यो धुक्ष्वेति प्रातः ५ अशनायापिपासे स्त्रिया वै स्त्रियं बाधन्ते स्त्रिया वां बाधेऽग्निहोत्र्या वत्सेन वीरेणेति सायंप्रातः ६ अन्वाहार्यपचनेन वीरेणेति स्त्रीवत्सायाम् ७ सुभूतकृतः सुभूतं नः कृणुतेत्युपवेषेणोदीचोऽङ्गारान्गार्हपत्यान्निरुह्याधिश्रय-त्यशनायापिपासीयेनाग्निहोत्रस्थाल्या गार्हपत्येन वीरेणेति विकारः ८ अग्नेष्ट्वा चक्षुषावेक्ष इति समिधमादीप्यावज्योत्य ९ समाप ओषधीनां रसेनेति स्रुवेणापः प्रत्यानीय १० प्रतितप्य तूष्णीं पुनरवज्योत्य ११ त्रिरुपसा-दमुदगुद्वास्य १२ अनुच्छिन्दन्निव १३ नमो देवेभ्य इति दक्षिणतो ऽङ्गारानुपस्पृश्य १४ सुभृताय व इति सुप्रत्यूल्हान्प्रत्युह्य १५ स्रुवं च स्रुचं

च प्रतितप्योन्नयत्यशनायापिपासीयेन स्रुचा स्रुवेण वीरेणेति विकारः १६ चतुष्पञ्चकृत्वो वा १७ स्रुवेस्रुवे च मन्त्रः १८ उन्नीते स्रुचं संमृशति १९ सजूर्देवेभ्यः सायं यावभ्य इति सायं जपति २० सजूर्देवेभ्यः प्रातर्यावभ्य इति प्रातः २१ उत्तरेण गार्हपत्यं स्रुचमुपमाद्य प्रादेशमात्रीं पालाशीं समिध- मादाय स्रुचं च समयातिहृत्य गार्हपत्यमाहवनीयस्य पश्चादुदगग्रेषु कुशेषु स्रुचमुपसाद्य समिधमभ्यादधात्यशनायापिपामौयेन ममिधाहवनीयेन वीरे- णेति विकारः २२ द्व्यङ्गुलं समिधोऽतिहृत्याभिजुहोति २३ ८

अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति मायम् १ सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातः २ दक्षिणं जान्वाच्यावषट्कारासु ३ उपमाद्योत्तरामसंसृजंस्तूष्णीं भूयमीं पूर्वचाः ४ स्रुचि भूयिष्ठं कुर्यात् ५ स्रुचो बुध्नेनाङ्गारात्रुपस्पृश्य द्विरुदीचीं स्रुचमुद्यभ्योपमादयति ६ अगन्प्राणः स्वर्गं लोकं जिते जयाम्यभयं मेऽलोकताया अपुत्रताया अपशुताया इति यजमानः पूर्वामाहुतिमनुप्राणिति ७ आगवपान आत्मानं विजिते विजयाम्यभयं मेऽलोकताया अपुत्रताया अपशुताया इत्युत्तरामन्ववानिति ८ या यज्ञस्य समृद्धस्याशीः सा मे समृध्यतामिति ९ हुतयोरुत्तरतः प्रतीचीं मायं द्विरुपमार्ष्टि १० ऊर्ध्वां दक्षिणतः प्रातः ११ पूर्वमुपमार्जनं कुशेषु निलिम्पत्योषधीः प्रीणामीति मनमा १२ उत्तरं दक्षिणतः पाणियुत्तानं निदधाति पितॄन्प्रीणामीति मनसा १३ द्विः प्रदेशिन्या प्राश्योपब्दिमदुदङ्ङ्चर्यावृत्य प्राग्दण्डया भक्षयित्वा प्रत्यग्दण्डां पर्यस्य निर्लिह्य प्रक्षाल्याचम्य प्रागुदीचीरप उत्सिच्य प्रागुदीचीमुद्दिशति १४ ए- तदेकहोमे कर्म १५ सर्वेषु तु जुह्वत्पूर्णां स्रुचमुत्तरेण गार्हपत्यं निधाय १६ ९

इह पुष्टिं पुष्टिपतिर्दधात्विह प्रजां जनयतु प्रजापतिः । अग्नये रयिमते पशुमते पुष्टिपतये स्वाहा । अग्नये गृहपतये स्वाहा । अग्नये स्वाहा । तूष्णीं चतुर्थी गार्हपत्ये १ तत्सवितुर्वरेण्यं भूर्वाग्बहु बह मे भूयात्स्वाहा

भर्गो देवस्य धीमहि भुवः प्राणो भूयान्भूयो मे भूयात्स्वाहा
धियो यो नः प्र चोदयात्स्वर्णाम सर्वं सर्वं मे भृयात्स्वाहा

अग्नयेऽन्नादायान्नपतय स्वाहेत्यचाहार्यपचने चतुर्थी २ महाव्याहृतिभि-

स्तिस्रो ब्रह्मवर्चसकामस्य ३ अविकृत चतुर्थी ४ याः स्रुच्यापस्तैर्धं ताः करोत्यग्निहोत्रस्थान्यां गार्हपत्यस्य पश्चादञ्जलौ च पत्न्याः ५ सं त्वा सृजामि प्रजया धनेनेत्यञ्जलौ ६ प्रतितप्य स्रुचं निदधाति ७ १०

दक्षिणतोन्यायं याजमानम् १ उपप्रयन्तो अध्वरमयमग्निः सहस्त्रिण उभा वामयं ते योनिरयमिहास्य प्रज्ञामिति षणां त्रिः प्रथमामुत्तमां च २ आदुर्दा अग्ने ऽस्यायुर्मे देहि वर्चोदा अग्नेऽसि वर्चा मे देहि तनूपा अग्नेऽसि तन्त्रं मे

पाह्यग्ने यन्म ऊनं तन्वऽस्तन्म आ पृण
इन्धानास्त्वा शतं हिमा द्युमन्तं समिधीमहि
वयस्वन्तो वयस्कृतं महस्वन्तः सहस्कृतम्
अग्ने सपत्नदम्भनमदब्धासो अदाभ्यम्

इति जपित्वा ३ चित्रावसो स्वस्ति ते पारमशीयेति त्रिः ४ सं त्वमग्ने सूर्यस्य वर्चसागथाः समृषीणां स्तुतेन सं प्रियेण धाम्ना समहमायुषा सं वर्चसा सं प्रजया सं प्रियेण धाम्ना सं रायस्पोषेण मिषीयेत्युपविश्य ५ अम्भ स्थाभ्ये वो भक्षीय सह स्थ महो वो भक्षीयोर्ज स्थोर्जं वो भक्षीय रायस्पोष स्थ रायस्पोषं वो भक्षीय ६ रेवती रमध्वमस्मिन्योनावस्मिंल्लोकेऽस्मिन्गोष्ठेऽस्मिन्क्षय-ऽस्यामाशिष्यस्यां प्रतिष्ठायामिहैव स्थेतो मापगातेति गामभ्येति ७ ११

संहितासि विश्वरूप्यूर्जा माविश गौपत्येनेत्यस्या ललाटमुपस्पृश्य १ उप त्वाग्न इति तृचेनाग्ने त्वं न इति च द्वैपदेन गार्हपत्यम् २ इल एह्यदित एहि सूनृत एहीति गामभ्येति ३ काम्या एत मयि वः कामधरणमिति वत्सस्य ललाटमुपस्पृश्य ४ सोमानं स्वरणमिति तृचेनोत्तरतोऽन्वाहार्यपचनम् ५ अन्तरेण गार्हपत्याहवनीयौ माहित्रं जपित्वाहवनीयमुपतिष्ठते ६ तत्सवितुर्वरेण्यं कदा चन स्तरीरसि परि ते दूलभ इति त्रिरेताम् ७ सर्वेषु तु जुहून्महाव्याहृतिभिस्तिस्रस्तिस्रः समिधो ऽभ्यादधात्याहवनीये वैकहावी ८ दैवस्तन्तुरस्यनु त्वा रभे माहं त्वद्व्यवच्छित्सीत्याहवनीयस्य दक्षिणतोऽङ्गारानुपस्पृश्य ९ ततोऽसि तन्तुरस्यनु मा संतनुहि प्रजया पशुभी रायस्पोषेण सुप्रजास्त्वेन सुवीर्येण मानुषस्तन्तुरस्यनु मा रभस्व मा त्वं

मद्व्यवच्छित्था असाविति ज्येष्ठस्य पुत्रस्य नामाभिव्याहृत्य यावन्तो वा भवन्ति १० आत्मनोऽजातपुत्रः ११ सत्येनावभृथमभ्यवैम्यप्सु व्रतमित्याचम्य वाचं विसृजते १२ १२

अथ प्रातः १ भूर्भुवः स्वः सुप्रजाः प्रजाभिर्भूयासं सुपोषः पोषैः सुवीरो वीरैरभयं तेऽभयं नो अस्तु मनसा त्वोपतिष्ठे लोकमुपैमि स्वश्चेत्याहवनीयम् २ अत्रैव तिष्ठन्नितरौ ३ अभयं तेऽभयं नो अस्तु वाचा त्वोपतिष्ठे प्रजामुपैमि पशूंश्चेति गार्हपत्यम् ४ अभयं तेऽभयं नो अस्तु प्राणेन त्वोपतिष्ठे व्यानमुपैम्या-युश्चेत्यन्वाहार्यपचनम् ५ अभयं वोऽभयं नो अस्तु कामेन वा उपतिष्ठे वित्तिमुपैमि भूतिं चेति सर्वान् ६ समानं समित्प्रभृत्या व्रतस्य विसर्जनात् ७ अनेन वैव सायं प्रातः ८ अनुपस्थानं वा प्रातः ९ १३

प्रवत्स्यन्नग्नीन् समीक्षतेऽभयं वोऽभयं नो अस्त्विति १ नर्य प्रजां मे पाहि मानुषान्मा भयात् पाहीति गार्हपत्यम् २ अथर्य पितुं मे पाहि पित्र्यान्मा भयात् पाहीत्यन्वाहार्यपचनम् ३ तमुत्तरेण गत्वा शंस्य पशून्मे पाहि दैवान्मा भयात्पाहीत्याहवनीयम् ४ अन्नमन्नमिति त्रीणि पदान्यभ्युद्धृत्या सकाशा-द्वाग्यमनम् ५ अग्न्युपस्थानस्यानर्थलुप्तं प्रवसञ्जपेत् ६ याजमानं च पर्वणि ७ अनपेतं हि कारणम् ८ सन्धिवेलयोर्वाचम्य वाचं यत्वा पुनराचम्य महाव्याहृतिभिर्विसर्गः ९ चक्षुर्विषयेऽग्नीनां वाचं यच्छेत् १४ प्रोष्यायन् १० तथा चैव समीक्षणम् १ आगन्म वृत्रहन्तममस्मभ्यं वसुवित्तमम् अग्ने सम्रालभि द्युम्नमभि सह आ यच्छस्व शंस्य पशून्मेऽजुगुपस्तान्मे पाह्येव दैवान्मा भयादजुगुपस्तस्मान्मा पाह्येवेत्याहवनीयम् २ तृणापचयनं समि-दाधानं च सर्वेषु ३

अयमग्निः पुरीष्यो रयिमान् पुष्टिवर्धनः
अग्ने पुरीष्याभि द्युम्नमभि सह आ यच्छस्व

अथर्य पितुं मेऽजुगुपस्तं मे पाह्येव पित्र्यान्मा भयादजुगुपस्तस्मान्मा पाह्येव-ेत्यन्वाहार्यपचनम् ४

अयमग्निर्गृहपतिर्गार्हपत्यात्प्रजाया वसुवित्तमः
अग्ने गृहपतेऽभि द्युम्नमभि सह आ यच्छस्व

नर्य प्रजां मेऽजुगुपस्तां मे पाह्येव मानुषान्मा भयादजुगुपस्तस्मान्मा पाह्येवेति गार्हपत्यम् ५ व्यवेतोऽग्नीन्प्रवमति ६ तेन चैवोत्सृज्यते ७ १५

वास्तोष्पतीयं ध्रौव्ये दशरात्रावरार्धे संप्रयातेषु १ अग्निष्ठस्य दक्षिणे युक्त उपोह्य चीवरं वास्तोष्पते प्रतिजानीहीत्यनूच्य वास्तोष्पते शग्मयेति यजति २ हुते चानाहितं त्यजेत् ३ १६

समारोहयमाणो गार्हपत्ये पाणी प्रतितप्य प्राणान्संमृशत्येहि मे प्राणानारोहेति १ सकृत्सकृन्मन्त्रेण द्विर्द्विस्तूष्णीम् २ अयं ते योनिरिति वारेणी प्रतितपति ३ सकृत्सकृन्मन्त्रेण द्विर्द्विस्तूष्णीम् ४ एवमाहवनीयात् ५ नित्यभृताद-न्यस्मिन् ६ अवस्तमिते च मन्थनम् ७

उपावरोह जातवेदः पुनस्त्वं देवेभ्यो हव्यं वह नः प्रजानन्
आयुः प्रजां रयिमस्मासु धेह्यरिष्टो दीदिहि नो दुरोणे

इत्यात्मनोऽरण्योरुपावरोह्य मन्थनम् ८ लौकिके वा लौकिके वा ९ १७

इति शाङ्खायनश्रौतसूत्रे द्वितीयोऽध्यायः समाप्तः

संस्थितायां पौर्णमास्यामिन्द्रायेष्टिर्विमृधे १ अमावास्याविकारः २ इन्द्र क्षत्रं मृगो न भीमः ३ जुष्टो दमूना अग्ने शर्धेति स्विष्टकृतः ४ अदितये-ऽमावास्यायां संस्थितायाम् ५ पौर्णमासीविकारः ६ ये वैमृधस्य ते स्विष्टकृतः ७ यावज्जीवं च ८ प्रयोग आन्तात् ९ १

अनागते पर्वण्यामावास्ये प्रवृत्तऽभ्युदितेष्टिः १ अग्नये दात्र इन्द्राय प्रदात्रे विष्णवे शिपिविष्टायेति २ निरुप्ते जानंस्तानेव विभजेत् ३ अग्ने दा दा नो अग्ने बृहतः ४ सहस्रा ते शता तू भर ५ अमावास्याविकारः ६ धनुश्च त्रीषु दक्षिणा ७ काले चामावास्यम् ८ नाभ्यावृत्तिः पिण्डपितृयज्ञस्यास्ति ९

२

अतीते पर्वण्यामावास्ये प्रवृत्तेऽभ्युद्दृष्टेष्टिः १ अग्नये पथिकृत इन्द्राय वृत्रघ्ने वैश्वानराय २ वेत्था हि वेध आ देवानाम् ३ वार्त्रहत्याय सहदानुम् ४

ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम्
अजस्रं भानुमीमहे नाभिं यज्ञानाम् ५

अमावास्याविकारः ६ दण्डोपानहं दक्षिणा ७ संस्थितायां चामावास्यम् ८ नाभ्यावृत्तिः पिण्डपितृयज्ञस्यास्ति ९ ३

अग्नयेऽग्निमतेऽग्नावग्नावभ्युद्धृते १ पथिकृतेऽन्तरेण विहारं चक्रीवति वृत्ते नियतातिपत्तौ च २ वीतये मिथःसंसृष्टेषु ३ विविचये ग्राम्येण ४ संवर्गाय प्रदाव्येन ५ शुचये क्रव्येण ६ अप्सुमते वैद्युतेन ७ व्याधिप्लाये रुद्राय ८ अध्वानं गमिष्यन् पूष्णे पथिकृते ९ सार्वकामिक्यग्नये कामाय १० व्रतपतये व्रत्यवेलां प्रोष्यावृत्यं वा चरित्वा ११ व्रतभृतेऽश्रु कृत्वा १२ गृहदाहे क्षामवते १३ मरुद्भ्यो यमौ प्रजातायाम् १४ ४

अग्निमग्निं हवीमभिरग्निनाग्निः समिध्यते १ अग्न आ याहि वीतये यो अग्निं देववीतये २ कया नो अग्ने वि वसस्त्वामग्ने मानुषीः ३ कुवित्सु नो मा नो अस्मिन्महाधने ४ अप्स्वग्न उरौ महान् ५ कद्रुद्रायाश्याम ते ६ वयमु त्वा पथस्पते पथस्पथः ७ अग्निः परेषु धामसु कामो भूतस्य भव्यस्य सम्रालेको वि राजति अश्याम तम् ८

त्वमग्ने व्रतभृच्छुचिरग्ने देवाँ इहा वह उप यज्ञं हविश्च नः
व्रतानि बिभ्रद्व्रतपा अदाभ्यो भवा नो दूतो अजरः सुवीरः

दधद्रत्नानि सुमृलीको अग्ने गोपाय नो जीवसे जातवेदः ९
कृष्णा रजांसि पत्सुतस्त्वे वसूनि पुर्वणीक होतः १०

मरुतस्त्वेषसंदृश ग्रा यात यमाविव
शुभ्रा हिरगयखादयः
वातत्विषो मरुतः श्रिये कमिति वा ११ ५
ज्ञातयोऽसंविदाना बहुदेवतामिष्टिं निर्वपेरन् १

ग्रग्निः प्रथमो वसुभिर्नो ग्रव्यात्सोमो रुद्रैरभि रक्षतु त्मना
इन्द्रो मरुद्भिर्ऋतुथा कृणोत्वादित्यैर्नो वरुणः शर्म यंसत्

समग्निर्वसुभिर्नो ग्रव्यात्सं सोमो रुद्रियाभिस्तनूभिः समिन्द्रो रातहव्यो मरुद्भिः समादित्यैर्वरुणो विश्ववेदाः २
संज्ञानमिति च जपेरन् ३ ६

मित्रविन्दायाः १ पञ्चदश सामिधेनीः २ ग्रग्निना रयिं गयस्फान इत्याज्यभागौ ३

ग्रग्निः सोमो वरुणो मित्र इन्द्रो बृहस्पतिः सविता यः सहस्री
पूषा नो गोभिरवमा सरस्वती त्वष्टा रूपाणि समनक्तु यज्ञैः

त्वष्टा रूपाणि दधती सरस्वती पूषा भगं सविता मे ददातु
बृहस्पतिर्ददिन्द्रो बलं मे मित्रः क्षत्रं वरुणः सोमो ग्रग्निः ४

नू नो रास्व सहस्रवदुत नो ब्रह्मन्नविष इति स्विष्टकृतः ५ सहस्रं दक्षिणा ६ देवतानुपूर्व्यं पुरोनुवाक्यावन्निगमेषु ७ याज्यावदादेशे ८ यथासंप्रेषितं वा ९ ७

फाल्गुन्यां पौर्णमास्यां प्रयोगोऽदीक्षितायनानाम् १ वसिष्ठयज्ञस्यामा-वास्यायां साकंप्रस्थाय्यस्य च २ पञ्चदश वर्षाणि दाक्षायणयज्ञस्य ३ संवत्सरं संवत्सरं वा सर्वेषाम् ४ न प्रयुञ्जानस्य नित्यौ दर्शपूर्णमासौ वर्तेते ५ दाक्षायणयज्ञस्य ६ पौर्णमासानि पूर्वेद्युः ७ ग्रग्नीषोमीयो वा ८ ग्रग्नेयः सांनाय्यं चैन्द्रं पौर्णमास्याम् ९ ग्रपरपक्षं दीक्षितव्रतोऽतिथिभ्यो ददाति

१० सत्यव्रतो वा ११ अभ्यञ्जनहताविकपल्पूलितानि न वस्ते १२ हविरुच्छिष्टाशनः १३ न सौहित्यं प्राप्नुयात् १४ सोमं राजानं चन्द्रमसं भक्षयामीति मनसा ध्यायन्नश्नाति १५ आमावास्यानि पूर्वेद्युः १६ ऐन्द्राग्नो वा १७ आग्नेयो मैत्रावरुणी च पयस्यामावास्यायाम् १८ ऋृतेन या उत वां विक्षु १९ पुरा शंयोर्वाकादूर्ध्वं वानावाह्य वाजिनो यजति २० उत्तमे प्रयाजे निगच्छन्ति यथार्थं च सूक्तवाके २१ वाजिनो देवा हविर्जोषयिष्यन्ते वर्धयिष्यन्ते महो ज्यायः करिष्यन्ते २२ शं नो भवन्तु वाजिनो वाजेवाज इत्यूर्ध्वज्ञुरनवानं यजति २३ वाजिनस्याग्ने वीहीत्यनुवषट्कारः २४ यजमानो ब्रह्मा होताध्वर्युराग्नीध्रश्च समुपहूय भक्षयन्ति २५ प्रथमो जघन्यश्च यजमानः २६

यन्मे रेतः प्र धावति यद्वा सिक्तं प्र जायते
राज्ञा सोमेन तद्वयमस्मासु धारयामसि

वाजोऽसि वाजिनमसि वाजो मयि धेहीति भक्षमन्त्रः २७ ८

इलादधस्य १ आग्नेय सरस्वत्यै च २ अग्नीषोमीयः सोपांशुयाजः सांनाय्यं चैन्द्रं पौर्णमास्याम् ३ व्रतानि च दाक्षायणयाज्ञिकानि ४ अग्नेयः सरस्वते च ५ ऐन्द्राग्नो मैत्रावरुणी च पयस्यामावास्यायाम् ६ समानं वाजिनम् ७ ९

सार्वसेनियज्ञे १ उभयानि हवींष्येकस्यामिष्टौ २ पौर्णमासानि पूर्वाणि ३ अर्चन्तस्त्वास्माकमग्ने अध्वरमित्युत्तरस्याग्नेयस्य ४ नामावास्यां यजते ५ पिण्डपितृयज्ञं तु करोति ६ न शौनकयज्ञे साकंप्रस्थाय्ये च विकारो होतुरस्ति ७ १०

सार्वसेनियज्ञेन वसिष्ठहज्ञो व्याख्यातः १ पूर्वाणि त्वामावास्यानि २ न पौर्णमासीं यजते ३ इति दर्शपूर्णमासायनानि ४ काम्यानि ५ पाञ्चदश्यं च सामिधेनीनाम् ६ आग्नेयाग्नावैष्णवौ ७ पौर्णमासीविकारः ८ सदा यजतेऽन्यत्र पर्वणः ९ मुन्ययनमित्याचक्षते १० आग्नेयैन्द्रो वैश्वदेवः ११

अमावास्याविकारः १२ सदा यजतेऽन्यत्र पर्वणः १३ अदीक्षितः कृष्णाजिनं प्रतिमुञ्चते १४ तुरायणमित्याचक्षते १५ संवत्सरप्रयोगे च १६ ११

सौमी श्यामाकेष्टिः १ वैणुयवी च २ ऐन्द्राग्न आग्नेन्द्रो वा वैश्वदेवो द्यावापृथिवीयश्च व्रीहियवानाम् ३ सद्वदाज्यभागे ४ इमं यज्ञं या ते धामानि दिवीति ५ सौम्यस्य मधुपर्को दक्षिणा ६ इयं वामस्य शुचिं नु ७ आ घा ये सुकर्माणः सुरुचः ८ मही द्यौरुर्वी पृथ्वी ९ वैश्वदेवद्यावापृथिवीयौ चोपांशु १० विराजौ स्विष्टकृतः ११ वत्सः प्रथमजो दक्षिणा १२ समानतन्त्रा वा दर्शपूर्णमासाभ्याम् १३ दर्शपूर्णमासौ वा नवानाम् १४ अग्निहोत्रं वा यवाग्वा सायंप्रातः १५ अग्निहोत्रीं वा नवानादयित्वा तस्यै दुग्धेन सायंप्रातरग्निहोत्रं जुहुयात् १६ गार्हपत्ये वा स्थालीपाकं श्रपयित्वाग्रयण-देवताभ्यः स्विष्टकृच्चतुर्थीभ्यः स्वाहाकारेणाहवनीये जुहुयात् १७ १२

फाल्गुन्यां पौर्णमास्यां प्रयोगश्चातुर्मास्यानाम् १ चैत्र्यां वा २ वैश्वानरी-यपार्जन्येष्टिः पूर्वस्यां पौर्णमास्याम् ३ पर्जन्याय यस्य व्रते ४ उत्तरस्यां वैश्वदेवम् ५ आग्नेयः ६ सौम्यसावित्रौ ७ सारस्वतपौष्णौ ८ मरुद्भ्यः स्वतवद्भ्यः ९ वैश्वदेवी १० द्यावापृथिवीयश्च ११ हिरण्यपाणिमूतय उदीरय १२ पूषन्तव शुक्रं ते १३ इहेह वः प्र चित्रम् १४ अग्निमन्थनीयाश्चासन्नषु हविःषु १५ पश्चाद्वेदेरवस्थायाग्नये मथ्यमानायेति संप्रेषितः १६ अभि त्वा देव सवितः । मही द्यौः । त्वामग्ने पुष्करादिति च तिस्रः । उत ब्रुवन्तु जन्तव इति जाताय । आ यं हस्ते न खादिनमिति हस्तेन धार्यमाणाय । उत्तरे प्रह्रियमाणाय । अग्निनाग्निः समिध्यते । त्वं ह्यग्ने अग्निना । तं मर्जयन्तेत्यग्निमन्थनीयाः १७ नव चप्रयाजाः १८ चतुर्थोत्तमावन्तरेण चत्वारः १९ दुरो अग्न आज्यस्य व्यन्तु । उषासानक्ता अग्न आज्यस्य वीताम् । दैव्या होतारा अग्न आज्यस्य वीताम् । तिस्रो देवीरग्न आज्यस्य व्यन्तु २० सद्वन्तावाज्यभागौ २१ सावित्रद्यावापृथिवीयौ चोपांशु २२ विराजौ स्विष्टकृतः २३ वत्सः प्रथमजो दक्षिणा २४ नवानुयाजाः २५ प्रथमद्वितीयौ तु षलन्तरेण २६

देवीर्द्वारो वसुवने वसुधेयस्य व्यन्तु

देवी उषासानक्ता वसुवने वसुधेयस्य वीताम्
देवी जोष्ट्री वसुवने वसुधेयस्य वीताम्
देवी ऊर्जाहुती वसुवने वसुधेयस्य वीताम्
देवा दैव्या होतारा वसुवने वसुधेयस्य वीताम्
देवीस्तिस्त्रस्तिस्त्रो देवीर्वसुवने वसुधेयस्य व्यन्तु २७ समानं वाजिनम् २८ संस्थितायां पौर्णमासम् २९ मांसानशनं ब्रह्मचर्यं प्राङधः शेत ऋतुकाले वा जायामुपेयात्सत्यवदनं चान्तरालव्रतानि ३० १३

आषाढ्यां वरुणप्रघासाः फाल्गुनीप्रयोगस्य १ चैत्रीप्रयोगस्य श्रवणायाम् २ पौष्णान्तानि वैश्वदेविकानि ३ ऐन्द्राग्नो वारुणी पयस्या मारुती कायश्च ४ इमं मे वरुण तत्त्वा यामि ५ मरुतो यद्ध यूयमस्मान् ६ हिरण्यगर्भो यः प्राणत इति ७ आहवनीयाद्याग्नी प्रणयन्ति ८ प्र देवं देव्येति तिसृणामासीनः प्रथमाम् ९ उत्तरे अनुसंयन् १० इलायास्त्वेति साद्यमानयोरिध्मयोः ११ अग्ने विश्वेभिः स्वनीक सीद होतर्नि होता त्वं दूतः १२ इत्यग्निप्रणयनीयाः १३ यत्र चासीनः प्रथमामन्ववोचत्तस्थित्वोत्सृज्यते १४ उत्तरस्यां वेदौ होतृकर्म १५ उपांशु कायः १६ गोमिथुनौ दक्षिणा १७ अध्वर्योर्वेदं स्तृणाति १८ वारुण्या निष्काषेणावभृथमवैति यथा सोमे १९ उरुं हि राजा शतं ते २० समानमन्यद्वैश्वदेवेन २१ १४

कार्त्तिक्यां साकमेधाः फाल्गुनीप्रयोगस्य १ आग्रहायण्यां चैत्रीप्रयोगस्य २ अग्नयेऽनीकवते पूर्वस्यां पौर्णमास्यामिष्टिः पूर्वाह्णे ३ अनीकैर्द्वेषोऽर्दयाग्ने विश्वाभिरूतिभिः । रयिं नो देहि जीवसे ॥ सैनानीकेना ४ मध्यन्दिने मरुद्भ्यः सांतपनेभ्यः ५ सांतपना यो नो मरुतः ६ सायं मरुद्भ्यो गृहमेधेभ्यः ७ अग्निना रयिं गयस्फान इत्याज्यभागौ ८ गृहमेधाम आ गत प्र बुध्न्या वः ९ त्वां चित्रश्रवस्तम यद्वाहिष्ठमिति स्विष्टकृतः १० न निगदमाह ११ न सामिधेनीरन्वाह १२ आज्यभागप्रभृतीज्येलान्ता १३ तस्य निष्काषं प्रातः पूर्णदर्व्यं हुत्वेष्टिं मरुद्भ्यः क्रीलिभ्यः १४ क्रीलं वः पर्वतश्चित् १५ महाहविषि १६ ऐन्द्राग्नान्तानि वारुणप्रघासिकानि १७ माहेन्द्रो वैश्वकर्मणश्च १८ वाचस्पतिं या ते धामानि परमाणीति १९ उपांशु वैश्वकर्मणः २० एकश्चाग्निः प्रणीयते २१ ऋषभो दक्षिणा २२ न वाजिनं नावभृथो भवति २३

समानमन्यद्वरुणप्रघासैः २४ १५

अपराह्णे पित्र्या त्रिहविरिष्टिः १ सोमाय पितृमते पितृभ्यो वा सोमवद्भ्यः पितृभ्यो वर्हिषद्भ्यः पितृभ्योऽग्निष्वात्तेभ्यः २ अग्निश्च कव्यवाहनः स्विष्टकृद्भवति ३ त्वं सोम प्र चिकितः सोमो धेनु त्वं सोम पितृभिरिति सोमस्य पितृमतः ४ उदीरतामङ्गिरसो ये नः पूर्व इति सोमवताम् ५ उपहूता आहं पितॄन्बर्हिषद इति बर्हिषदाम् ६ अव सृज ये चेहाग्निष्वात्ता इत्यग्निष्वात्तानाम् ७ एकैका याज्या द्वे द्वे पूर्वे पुरोनुवाक्ये ८ असंतते नानाप्रणवे ९ ये तातृषुस्त्वमग्न ईलित इत्यग्नेः कव्यवाहनस्य १० प्राचीनापवीत्येता देवता यजति ११ निगमस्थानेषु चानुवर्तयति १२ पितृमन्तं परिहाप्य १३ यज्ञोपवीतीति जातूकर्ण्यः १४ संप्रैषेषु स्वधाशब्दे क्रियमाणे ये स्वधामहे स्वधा नम इति येयजामहवषट्कारयोः स्थाने १५ दक्षिणान्वाहार्यपचनात्परिश्रिते चरन्ति १६ अग्रेण वेदिं दक्षिणा तिष्ठति १७ न च बर्हिराक्रामति १८ उत्सर्गो जपानाम् १९ कर्माणि तूष्णीं जपमन्त्राणि २० उपसदि चेत्याचार्याः २१ कर्म तु न्यायः २२ उशन्तस्त्वेत्येकां सामिधेनीं त्रिरनूच्य नार्षेयमाह २३ अपबर्हिषः प्रयाजानिष्ट्वा नो अग्ने सुचेतुना त्वं सोम महे भगमिति जीवनवन्तावाज्यभागौ २४ उपहूयेलां न प्राश्नन्ति २५ अवघ्राय भागान्प्रास्यन्ति २६ पितृभ्यो दत्ते २७ १६

अया विष्ठा जनयन्कर्वराणि स हि घृणिरुरुर्वराय गातुः
स प्रत्युदैद्धरुणं मध्वो अग्रं स्वां यत्तनूं तन्वामैरयत

इति जपन्त उत्तरेणान्वाहार्यपचनं गत्वा १ सुसंदृशं त्वा वयमक्षन्नमीमदन्तोपो षु शृणुहीत्याहवनीयमुपस्थाय २ मनो त्वा हुवामह इति तृचेन दक्षिणाग्निम् ३ आ म एतु मनः पुनरिति ब्रूयुः ४ अग्निं तं मन्य इति तृचेनाग्ने त्वं न इति च द्वैपदेन गार्हपत्यम् ५ तच्चक्षुरित्यादित्यमुपस्थाय ६ अपबर्हिषाव-नुयाजाविष्ट्वा ७ न सूक्तवाके यजमानस्य नाम गृह्णाति ८ शंय्वन्ता च ९ त्र्यम्बकान्संस्थाप्य मैत्रश्चरुः १० अदितये वा ११ मित्रस्य चर्षणीधृतो महाँ आदित्यः १२ संस्थितायां पौर्णमासम् १३ १७

गुनासीर्ये १ पौष्णान्तानि वैश्वदेविकानि २ शुनासीर्यो वायव्यं पयः सौर्यश्च ३ शुनासीराविमां शुनं नः फालाः ४ तव वायवृतस्पतेऽध्वर्यवश्चकृवांसः ५ तरणिर्विश्वदर्शतो दिवो रुक्म इति ६ उपांशु सौर्यः ७ अश्वः श्वेतो दक्षिणा ८ गौर्वा ९ सीरं वा द्वादशायोगम् १० न वाजिनम् ११ समानमन्यद्वैश्वदेवेन १२ पौर्णमासं त्वमथ्यमाने १३ इन्द्रश्च नः शुनासीराविमं यज्ञं मिमिक्षताम् गर्भान्धत्तं स्वस्तये

ययोरिदं भुवनमा विवेश ययोरानन्दो निहितो महश्च
शुनासीरावृतुभिः संविदाना इन्द्रवन्ता हविरिदं जुषेथाम् १४

इन्द्राय शुनासीराय स्रुचा जुहुतना हविः
जुषतां प्रति मेधिरः
प्र हव्यानि घृतवन्त्यस्मै हर्यश्वाय भरता सजोषाः

इन्द्र ऋभुभिर्ब्रह्मणा संविदानः शुनासीरी हविरिदं जुषस्व १५ शुनं हुवेमाश्वायन्तः १६ साकमेधैरिष्ट्वान्वक्षं शुनासीर्यम् १७ माघ्यां वा पौर्णमास्याम् १८ सोमेनोत्सर्गः पशुनेष्ट्या वा १९ पञ्चवर्षेषु पूर्वेद्युः शुनासीर्यमपरेद्युर्वैश्वदेवम् २० १८

विध्यपराधे प्रायश्चित्तम् १ अर्थलोपे प्रतिनिधिः २ भूर्भुवः स्वः स्वाहा

अयाश्चाग्नेऽस्यनभिशस्तिश्च सत्यमित्त्वमया असि
अयामा मनसा कृतोऽयाः सन्हव्यमूहिषे
अया नः कृणुहि भेषजं । स्वाहा

इति प्रायश्चित्ताहुती सर्वेषु दोषेषु ३ आहवनीयः सर्वाहुतीनाम् ४ जुहूश्च पात्रम् ५ चतुर्गृहीतं प्रायश्चित्तेषु ६ अनन्तरं दोषात्प्रायश्चित्तं न ह्यनिर्हृते दोषे प्रवृत्तिरुत्तरस्यास्ति ७ प्रत्यक्षविहितं चैकेषु दोषेषु प्रायश्चित्तं तत्रोभे कुर्यात्सर्वप्रायश्चित्तं चाधिकारिकं च ८ अनुद्धृतं चेदाहवनीयमभ्यस्तमि-याद्बहुविदा ब्राह्मणेनोद्धरणं । जातरूपं च कुशे प्रबध्याग्रतो हरन्ति ।

रजतमभ्युदिते । वरो दक्षिणा ९ आहवनीयेऽनुगते गार्हपत्यादुद्धरणमग्नये चेष्टिर्ज्योतिष्मते १० उदग्ने शुचयो वि ज्योतिषा ११ गार्हपत्येऽनुगते पूर्वमध्यवसायाहवनीयमन्यं प्रणीय जुहुयात् १२ समारोह्य वोदङ्ङुदवस्येत् १३ उभयोरनुगतयोर्गार्हपत्योल्मुकादुत्तरारण्या मन्थनम् १४ उल्मुकेऽविद्यमानेऽरणी भस्मना संस्पृश्याग्नये च तपस्वते जनद्वते पावकवत इष्टिः १५ आ याहि तपसा जनेष्वाग्ने पावको अर्चिषा । उपेमां सुष्टुतिं मम ॥ आ नो याहि तपसा जनेष्वाग्ने पावक दीद्यत् । हव्या देवेषु नो दधदिति १६ अभ्युदितयोस्त्वभ्यस्तमितयोर्वान्येन वा नष्टयोः कारणेनाग्न्याधेयेनोत्पादयेत् १७ १९

उपसृष्टा चेदग्निहोत्री वाश्येत सूयवसादिति यवसमुष्टिं प्रयच्छेत् १ उपविशेच्चेत्

यस्माद्भीषा निषीदसि ततो नो अभयं कृधि
प्रजाभ्यः सर्वाभ्यो मृल नमो रुद्राय मीलहुषे

इत्यार्द्रदण्डेनोत्थाप्य उदस्थाद्देव्यदितिरायुर्यज्ञपतावधात्
इन्द्राय कृण्वती भागं मित्राय वरुणाय च

इत्यनुमन्त्रयेत २ द्वेष्याय वा दद्यात् ३ हविषि स्कन्नेऽच्छायं वो ययोरो जसा स्कभिता रजांसि वीर्येभिर्वीरतमा शविष्ठा । या पत्येते अप्रतीता सहोभिर्विष्णू अगन्वरुणा पूर्वहूतौ । इत्यद्भिरुपनिनीयास्कानधित प्राजनि । दिवं देवांस्तृतीयं यज्ञोऽगात्ततो मा द्रविणमष्ट्वन्तरिक्षं पितृंस्तृतीयं यज्ञोऽगात्ततो मा द्रविणमष्टु पृथिवीं मनुष्यांस्तृतीयं यज्ञोऽगात्ततो मा द्रविणमष्ट्वित्यनुमन्त्रयेत ४ यद्वाह्मणो जुगुप्सुर्न भक्षयेदेतदुष्टस्य लक्षणम् ५ तस्यापः प्रतिपत् ६ शेषे विद्यमाने तेन समापनम् ७ शेषाभावेऽन्यदुत्पादयेत् ८ तस्मिन्द्रव्येऽविद्यमाने यत्सामान्यतमं मन्येत तत्प्रतिनिदध्यात् ९ एष प्रतिनिधीनां धर्मः १० अविकारश्च शब्दानाम् ११ अप्रत्तदैवते दुष्टे नावृत्तिरस्ति हौत्रस्यान्यद्धविः संस्कृत्य प्रयच्छेद्देवतायै १२ नावृत्तिः प्रत्तदोषेऽस्ति लुप्यते स्विष्टकृदिलं भक्षाश्च १३ आज्येन परम् १४ अन्यासु देवतास्विष्टासु दुष्टेन वा शेषवति

तन्त्रे प्रदानमावर्तते १५ सर्वेष्टिरशेषे १६ कृतस्यानावृत्तिर्गुणलोपे संनिपातप्रधानत्वात् १७ मन्त्रं नानुजपेत् १८ अनुजपेदिति जातूकर्ण्यः १९ अन्याभ्यो गृहीतेऽन्यासु वावाहितासु चोदिताभ्यः प्रयच्छेदाज्येनावाहिता यजेत् २० २०

इष्टिपशुबन्धेषु सोमे च प्रायश्चित्तं ब्रह्मा जुहोति १ ऋग्वेदे चेद्दोषः स्याद्भूः स्वाहेति गार्हपत्ये २ यजुर्वेदे चेद्भुवः स्वाहेत्यन्वाहार्यपचने ३ सोमे त्वाग्नीध्रीये ४ सामवेदे चेत्स्वः स्वाहेत्याहवनीये ५ भूर्भुवः स्वः स्वाहेत्यज्ञायमाने दोषे ६ अनुपस्थाय प्रसर्गे प्रतिदिशमुपस्थानम् ७ उपस्थायाप्रसर्गे यथा प्रोष्य ८ समारोह्याप्रसर्गे मन्थनम् ९ नारण्योरस्त्युपस्थानम् १० नाहोमेनानिज्यया वाग्नीनुत्सृजेत् ११ प्रायश्चित्तं तु कृत्वातीतानि कर्माणि प्रतिनिदध्यात्प्रतिनिदध्यात् १२ २१

इति शाङ्खायनश्रौतसूत्रे तृतीयोऽध्यायः समाप्तः

पत्नीयजमानौ व्रत्यमश्नीयातां प्राग्वत्सापाकरणात् १ यदन्यश्मांसलवणमिथुनमाषेभ्यो येन च द्रव्येण यक्ष्यमाणः स्यात् २ १

अग्नीनन्वादधातीष्टिपशुबन्धेषु पूर्वेद्युः १ आहवनीये महाव्याहृत्योत्तमया २ प्रथमया गार्हपत्ये ३ दक्षिणाग्नौ मध्यमया ४ द्वे द्वे च तूष्णीम् ५ आहवनीये दशमीं समस्ताभिः ६ महाव्याहृतीनां वा स्थाने चतस्रो विहव्यस्यानुपूर्व्येण ७ उपस्थानं च शेषेण ८ अप नः शोशुचदधमिति सप्ताग्ने नय यस्त्वा हृदा त्वं नो अग्ने अधरादिति वा दशभिः ९ प्राग्नये वाचमिमं स्तोममिति चोपस्थानं सुक्ताभ्याम् १० तूष्णीं प्रागहीयम् ११ महाव्याहृतिभिः पैङ्ग्यम् १२ कौषीतकं विहव्येन १३ आरुणमुत्तमम् १४ २

पिण्डपितृयज्ञोऽपराह्णेऽमावास्यायाम् १ दक्षिणाग्नेः पुरस्ताच्छूर्पं स्थालीं स्फ्यं पात्रीमुलूखलमुसले च संसाद्य २ गार्हपत्यस्य पश्चाद्दक्षिणाग्नेषु कुशेषु स्फ्यं निधाय ३ उपरिष्टाद्व्रीहीन्पात्र्याम् ४ पुरस्ताच्छूर्पे स्थालीम् ५ आच्य सव्यं जानु नीचा मुष्टिना व्रीहीन् गृह्णाति पितॄन्ध्यायन् ६ यथाधोबिलाशुतः

स स्यात्पत्नया सकृत्फलीकृतान्दक्षिणाग्नौ श्रपयित्वाभिघार्य प्रत्यञ्चमुद्वास्यावसवि परिसमुह्य परिस्तीर्य पर्युक्ष्य दक्षिणं जान्वाच्य यज्ञोपवीती प्राङासीनो मेक्षणेन जुहोति ७ ३

अग्नये कव्यवाहनाय स्वाहा सोमाय पितृमते स्वाहा यमायाङ्गिरस्वते पितृमते स्वाहेति १ मेक्षणमनुप्रहृत्य दक्षिणा दक्षिणाग्नेरपहता असुरा रक्षांसि वेदिषद इति स्फ्येनोन्मृज्याभ्युक्ष्य ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति । परापुरो निपुरो ये भरन्त्यग्निष्टाँल्लोकात्प्रणुदात्यस्मात् । इत्युल्मुकमुन्मृष्टस्य दक्षिणार्धे निधाय मूले कुशान्सकृल्लूनानुन्मृष्टे निधायासाववनेनिक्ष्व ये च त्वामत्रान्विति पितुर्नामादिश्य कुशेष्वपो निषिञ्चत्यवाचीनपाणिना २ एवं दक्षिणतः पितामहस्य ३ प्रपितामहस्य च ४ असावेतत्ते ये च त्वामत्रान्विति पिण्डान्यथावनेजितं निधाय ५ उभावेकस्मिन्पितृभेदे ६ न जीवपितुरस्ति ७ न जीवान्तर्हिताय ८ येभ्यो वा पिता तेभ्यः पुत्रः ९ होमान्तं वा १० अत्र पितरो मादयध्वं यथाभागं पितर आवृषायध्वमिति ११ उदङ्पर्यावृत्य १२ त्रिरा तमनादासित्वा १३ अमीमदन्त पितरो यथाभागमवीवृषतेति प्रतिपर्यावृत्य १४ तथैवावनेज्य १५ ४

नमो वः पितरो जीवाय
नमो वः पितरः शोषाय
नमो वः पितरो घोराय
नमो वः पितरो रसाय
नमो वः पितरो बलाय
नमो वः पितरो मृत्यवे
नमो वः पितरो मन्यवे
नमो वः पितरः स्वधायै
नमो वः पितरः पितरो नमो वः

येऽत्र पितरः पितरः स्थ यूयं तेषां श्रेष्ठा भूयास्थ । य इह पितरो मनुष्या वयं तेषां श्रेष्ठा भूयास्म । या अत्र पितरः स्वधा युष्माकं सा । य इह पितर एधतुरस्माकं स । गृहान्नः पितरो दत्तेति १ एतद्वः पितरो वासो वध्वं पितर इति त्रीणि सूत्राण्युपन्यस्य २ ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम्

स्वधा स्थ तर्पयत नः पितॄनित्युदकशेषं निनीय ३ अवघ्राय पिण्डान् ४ अवधाय प्राश्नीयात् ५ ब्राह्मणाय वा दद्यात् ६ अपो वाभ्यवहरेत् ७ मध्यमपिण्डं पत्नी पुत्रकामा प्राश्नीयात् । आ धत्त पितरो गर्भं कुमारं पुष्करस्रजम् । यथेह पुरुषोऽसत् । इति ८ उल्मुकमग्नौ कृत्वा ९ सकृदाच्छिन्नाननुप्रहृत्य १० अग्निहोत्रं यवाग्वैव सायंप्रातः ११ स्वयं होमश्च पर्वणि १२ एतेनैव धर्मेणानाहिताग्नेः पिण्डपितृयज्ञः क्रियेत १३ ५

दक्षिणतोन्यायं ब्रह्मकर्म १ पश्चात्तु पित्र्यायाम् २ यजमाननिमित्तो विपर्ययः ३ अग्रेण यजमानमासनम् ४ समानं होत्रा तृणनिरसनम् ५ तथोपवेशनम् ६ कर्मादौ देशपृथक्त्वे च ७ प्रागग्रता विकारः ८ बृहस्पतिर्ब्रह्मा स यज्ञं पातु स यज्ञपतिं स मां पातु बृहस्पतिर्दैवो ब्रह्माहं मानुषो भूर्भुवः स्वरो३मित्युपविश्य ९ साक्ष्यं च सर्वकर्मणाम् १० मन्त्रवत्सु वाग्यमनम् ११ सर्वासु गतिषु यथा व्रजन्त्यन्यथा ततः प्रत्यायन्ति १२ अनुसमेत्यग्नौ प्रणीयमाने १३ सहेध्मेनोपवेशनम् १४ अश्वो ब्रह्मणोऽग्न्याधेये १५ सर्वेषां वा १६ कर्मप्रसवायामन्त्रित ओमित्युक्त्वा यथाकर्म प्रसौति १७ ६

प्रणीताकाले वाग्यमनम् १ हविष्कृता विसर्गः २ इष्टे च स्विष्टकृत्यानुयाज-प्रसवेन विसर्गः ३ मित्रस्य त्वा चक्षुषा प्रतीक्ष इति प्राशित्रं प्रतीक्ष्य ४ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामीति प्रतिगृह्य ५ पृथिव्यास्त्वा नाभौ सादयाम्यदित्या उपस्थ इति प्राग्दण्डं स्थण्डिले निधाय ६ उपकनिष्ठिकयाङ्गुष्ठेन च प्राशित्रं गृहीत्वा ७ अग्नेष्ट्वास्येन प्राश्नामीति प्राश्यासंखादन् ८ शान्तिरसीत्याचम्य ९ प्राणान्संमृशति १० प्राणपा असि प्राणं मे पाहीति नासिके मुखं च ११ चक्षुष्पा असि चक्षुर्मे पाहीति चक्षुषी १२ श्रोत्रपा असि श्रोत्रं मे पाहीति श्रोत्रे १३ इन्द्रस्य त्वा जठरे सादयामीति नाभिम् १४ कोऽदात्कस्मा अदात्कामोऽदात्कामायादात् । कामो दाता कामः प्रतिग्रहीता कामैतत्त इत्यन्वाहार्यं प्रतिगृह्य १५ ब्रह्मन्प्रस्थास्यामीत्युक्तः १६ देव सवितरेतं ते यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे तेन यज्ञमव तेन यज्ञपतिं तेन मामव देवेन सवित्रा प्रसूत इति जपित्वों प्रतिष्ठेति प्रसौति १७ प्रणीतासु विमुक्तासूत्सर्जनं ब्रह्मणः १८ प्राशनं ब्रह्मभागस्य १९ ७

अदब्धेन त्वा चक्षुषावपश्यामि रायस्पोषाय सुप्रजास्त्वाय सुवीर्यायाग्नेर्जिह्वासि सुहूर्देवेभ्यो धाम्नेधाम्ने मे भव यजुषेयजुष इत्याज्यमवेक्षते पत्नी १ तेजो ऽसि शुक्रमस्यमृतमसि वैश्वदेवमसीत्यासन्नं वेदौ यजमानः २ ध्रुवा असदन्नृतस्य योनौ सुकृतस्य लोके ता विष्णो पाहि पाहि यज्ञं पाहि यज्ञपतिमित्यासन्नानि हवींष्यभिमृश्यं । पाहि मां यज्ञन्यमित्यात्मानम् । वृष्टिरसि पाप्मानं मे वृश्च विद्यासि विद्य मे पाप्मानमित्याचम्य । अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम् । इदमहमनृतात्सत्यमुपैमीत्याहवनीये समिधमाधाय वाचं यच्छति ३ अग्ने वायो विद्युच्चन्द्रमः सलोकतां वोऽशीयेति ध्यायात् ४ यत्कामो वा स्यात् ५ अनुपदस्यमन्नाद्यमाप्रवानीत्याकाशं समुद्रं वा ६ ८

मयीदमिन्द्र इन्द्रियं दधात्वस्मान्रायो मघवानः सचन्ताम्
अस्माकं सन्त्वाशिषः सत्या नः सन्त्वाशिषः

इतीलायामुपहूयमानायाम् १ ब्रध्न पिन्वस्व प्राणं मे पाहि प्रजां मे पाहि पशून्मे पाहि ब्रह्म मे धुक्ष्व क्षत्रं मे धुक्ष्व विशो मे धुक्ष्व दिशां क्लृप्तिरसि दिशो मे कल्पन्तां कल्पन्तां मे दिशस्तासु क्लृप्तासु राध्यासम् । अत्र पितरो मादयध्वं यथाभागं पितर आवृषायध्वमिति बर्हिषदं पुरोलाशमभिमृश्य २ अमीमदन्त पितरो यथाभागमवीवृषतेति प्रत्यवधाय ३ प्रजापतेर्भागोऽस्यूर्जस्वान्पयस्वानक्षितिरसि मा मे क्षेष्टा अमुत्रा अमुष्मिंल्लोक इह चेत्यन्वाहार्यमभिमृश्य ४ अनुयाजेष्विष्टेषु व्यूहति स्रुचावग्नेरग्नीषोमयोरुज्जितिमनूज्जेषं वाजस्य मा प्रसवेन प्रोहामीत्युत्तानेन दक्षिणेन जुहूं प्राचीमग्निरग्नीषोमौ तमपनुदन्तु यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मो वाजस्यैनं प्रसवेनापोहामीति नीचा सव्येनोपभृतं प्रतीचीम् ५ यथादेवतमन्यत्र ६ अनिष्टे गृहपतौ गार्हपत्ये स्रुवेण जुहोति ७ ९

यं वां देवा अकल्पयन्नूर्जो भागं शतक्रतू
इदं वां तेन प्रीणामि तस्य तृम्पतमहाहाहुहू स्वाहा
गन्धर्वाभ्यां नारीष्टाभ्यामहाहाहुहूभ्यां स्वाहा

अग्ने पृथिव्या अधिपते वायोऽन्तरिक्षस्याधिपते सवितः प्रसवानामधिपते सूर्य नक्षत्राणामधिपते सोमौषधीनामधिपते त्वष्टः समिधां रूपाणामधिपते मित्र सत्यानामधिपते वरुण धर्माणामधिपत इन्द्र ज्येष्ठानामधिपते प्रजापते प्रजानामधिपते देवा देवेषु पराक्रमध्वम् १ प्रथमा द्वितीयेषु पराक्रमध्वमित्ये-वमेकोत्तरमैकादशभ्यः २ विश्वे देवास्त्रयस्त्रंशास्त्रिरेकादशिन उत्तरोत्त-रवर्त्मान उत्तरसत्वानो विश्वे वैश्वानरा विश्वे विश्वमहस इह मावतास्मिन्ब्रह्म-ण्यस्मिन्क्षत्रेऽस्मिन्कर्मण्यस्यामाशिष्यस्यां प्रतिष्ठायामस्यां देवहूत्यामयं मे कामः समृध्यतां स्वाहेति यत्कामो भवति ३ प्रजापत इति चतुर्थी ४ १०

आ प्यायतां ध्रुवा हविषा घृतेन यज्ञंयज्ञं प्रति देवयड्भ्यो
सूर्याया ऊधोऽदित्या उपस्थ उरुधारा पृथिवी यज्ञे अस्मिन्

इत्याप्याययति ध्रुवाम् १ समिष्टयजुर्हूयमानमन्वारभते २ सदसि सन्मे भूयाः सर्वमसि सर्वं मे भूयाः पूर्णमसि पूर्णं मे भूया अक्षितिरसि मा मे क्षेष्ठा अमुत्रा अमुष्मिंल्लोक इह चेति पूर्णपात्रमभिमृश्य दिशो व्युदुक्षति ३ प्राच्या दिशा सह देवा ऋत्विजो मार्जयन्ताम् । दक्षिणया दिशा सह मासाः पितरो मार्जयन्ताम् । प्रतीच्या दिशा सह गृहाः पशवो मार्जयन्ताम् । उदीच्या दिशा सहाप ओषधयो वनस्पतयो मार्जयन्ताम् । ऊर्ध्वया दिशा सह यज्ञः संवत्सरो यज्ञपतिर्मार्जयन्तामिति ४ सकृत्सकृन्मन्त्रेण द्विर्द्विस्तूष्णीम् ५ आपोहिष्ठीयाभिस्तिसृभिरभिमृश्य । अच्छायं वो ययोरोजसेति प्राचीर्निनीयो-दीचीर्वा

समुद्रं वः प्र हिणोमि स्वां योनिमभि गच्छत
अरिष्टा अस्माकं वीरा मा परा सेचि नो धनम्

इत्यभिमन्त्र्य । शंनोदेवीयाभिश्चतसृभिरुरोऽभिमृश्य । समिन्द्र णः सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सं शिवेन ।
त्वष्टा सुदत्रो वि दधातु राय
इति प्राणान् । अनु नो मार्ष्टु तत्वो यद्विलिष्टम् । इति सुखं विसृज्य ११
विष्णुक्रमान्क्रमते ६ दक्षिणाद्वेदेः श्रोणिदेशादाहवनीयात् १ दिवि

विष्णुर्व्यक्रंस्त जागतेन च्छन्दसा तमहमनु व्यक्रंसि ततो निर्भक्तः स योऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्यभ्युद्धृत्य दक्षिणं पादं हीनतरं सव्यम् २ अन्तरिक्षे विष्णुर्व्यक्रंस्त त्रैष्टुभेन च्छन्दसेति द्वितीयम् ३ पृथिव्यां विष्णुर्व्यक्रंस्त गायत्रेण च्छन्दसेति तृतीयम् ४ दिक्षु विष्णुर्व्यक्रंस्तानुष्टुभेन च्छन्दसेति तिर्यग्विक्रामति ५ समान उदर्कः ६ अगन्म स्वरिति प्राङीक्षते ७ सं ज्योतिषाभूमेत्याहवनीयम् ८ समहं प्रजया सं मया प्रजा समहं रायस्पाषेण सं मया रायस्पोषो वसुर्यज्ञो वसीयान्भूयासमिति प्राङेव ९ स्वयंभूरसि श्रेष्ठो रश्मिरायुर्दा अस्यायुर्मे देहि वर्चोदा असि वर्चो मे देहि तनूपा असि तन्वं मे पाहीदमहमाभ्यो दिग्भ्योऽस्यै दिवोऽस्मादन्तरिक्षा-दस्मादन्नाद्यादस्यै प्रतिष्ठायै द्विषन्तं भ्रातृव्यं निर्भजामि निर्भक्तो द्विषन्भ्रातृव्य इत्यादित्यमुपस्याय । ऐन्द्रीमावृतमावर्त आदित्यस्यावृतमन्वावर्त इति दक्षिणं बाहुमन्वावृत्य । मव्यावृदेत्य गार्हपत्यम् । अग्ने गृहपते सुगृहपतिरहं त्वयाग्ने गृहपतिना भूयासं सुगृहपतिस्त्वं मयाग्ने गृहपतिना भूयाः । अस्थूरि नो
गार्हपत्यानि सन्तु

शतं हिमा मह्यममुष्यादिति पुत्रनामान्यभिव्याहृत्य
भूर्भुवः स्वः सं मा कामेन गमयेत्यस्याङ्गारमुपस्पृश्य
यज्ञो बभूव स आ बभूव स प्र जज्ञे स उ वावृधे पुनः
स देवानामधिपतिर्बभूव सोऽस्मानधिपतीन्कृणोतु

इति जपित्वा । तथैवाचम्य । अग्ने व्रतपते व्रतमचारिषं तदशकं तेनारात्सं य एवास्मि सोऽस्मीत्याहवनीये समिधमाधाय । विसृज्य वाचं १२ यो नो दूरे द्वेष्टि यो नो अन्ति समानो निष्ट्यो अरणश्चिदग्ने । इध्मस्येव प्रक्ष्यायतो मा तस्योच्छेषि किंचन । इत्याहवनीयस्य विक्षामाण्युपसमस्य । गोमाँ अग्न इति तृचं जपति १० उद्वयं तच्चक्षुः संदृशस्ते मा च्छत्सि यत्ते तपस्तस्मै ते मा वृक्षौत्यादित्यमुपस्थाय । तथैवावृत्य । सव्यावृदुपविश्य ।

इदं हविः प्रजननं मे अस्तु दशवीरं सर्वगणं स्वस्तये
आत्मसनि प्रजासन्यभयसनि पशुसनि लोकसनि

अग्निः प्रजां बहुलां मे करोत्वन्नं पयो रेतो अस्मासु धत्त

इति पयोभक्षं प्रजातिकामः १ दधिक्राव्णो अकारिषमिति वा संबुभूषन्द-

धिभक्षम् २ सं यज्ञपतिराशिषेति यजमानभागं प्राश्नाति ३ समिष्टयजुषा सह प्रवसति जुहोति ४ १३

जीवतः कर्माणि १ विसमाप्ते चेदभिप्रेयान्मरणान्तमेकाहेषु नास्ति तस्य समापनम् २ आहवनीये सर्वाणि हवींष्यनुप्रहृत्य ३ संहार्य रोमनखानि प्रेतस्य ४ आप्लुत्यालंकृत्य ५ दक्षिणस्यां दिशि दक्षिणाप्रवणे देशे दक्षिणप्राक्प्रवणे वा ६ अपेत वीतेति पलाशशाखया विमृज्य ७ स्फ्येनोन्मृज्याभ्युक्ष्य ८ प्राग्दक्षिणाचीं चितिं कृत्वा ९ पुरस्तादाहवनीयं पश्चान्निधाय गार्हपत्यं दक्षिणतो दक्षिणाग्निम् १० अन्तरेण गार्हपत्यं दक्षिणाग्निं च हृत्वा ११ उत्तानं चितौ निपात्य १२ दक्षिणतः पश्चाद्वा गामनुस्तरणीमजां वा रोहिणीं दक्षिणामुखीं प्रोभ्य १३ जीवन्त्याः संज्ञप्राया वा वृक्कौ पृष्ठत उद्धृत्य १४ अन्वाहार्यपचने कवोष्णौ कृत्वाति द्रवेत्यृग्भ्यां पाणयोराधाय १५ प्राणायतनेषु हिरण्यशकलान्कृत्वा १६ अग्नेर्वर्मेति वपया मुखं प्रच्छाद्य १७ दक्षिणे पाणौ जुहूम् १८ उपभृतं सव्ये १९ ध्रुवामुरसि २० अग्निहोत्रहवणीं कण्ठे २१ स्रुवौ नासिकयोः २२ प्राशित्रहरणं दक्षिणे कर्णे २३ प्रणीताप्रणयनं सव्ये २४ शिरसि कपालानि २५ अप्सु ग्रावाणः २६ उदरे समवत्तधानीम् २७ पार्श्वयोः पात्र्यौ २८ स्फ्यं दक्षिणे पार्श्वे २९ कृष्णाजिनं सव्ये ३० उपस्थे अरणी ३१ ऊर्वोरष्ठीवतोश्चोलू खलमुसले ३२ पादयोः शूर्पशकटे ३३ पत्तोऽग्निहोत्रपा त्राणि ३४ तानि घृतेन पृषदाज्येन च पूरयित्वा ३५ अयं वै त्वत्वमस्मादयं ते योनिस्त्वमस्य योनिः । जातवेदो वहस्वैनं सुकृतां यत्र लोकः । अयं वै त्वामजनयदयं त्वदधिजायतामसौ स्वाहेत्युपो-हन्त्यग्निभिः ३६ १४

मैनमग्न इति संप्रदीप्ते दश जपित्वा सव्यावृतोऽनवेक्षमाणाः प्रागुदञ्चः प्रक्रामन्ति १ मृत्योः पदमित्यनुमन्त्रयते द्वाभ्याम् २ आपो हि ष्ठा सना च सोमेत्युदकं स्पृशन्ति सूक्ताभ्यामनमन्निमज्जन्तोऽसंधावमानाः ३ असावेतत्त

इत्येकमुदकाञ्जलिं प्रदाय । आपो अस्मानित्युत्क्रम्य । अहतं वासः परिधाय । तच्चक्षुरित्यादित्यमुपस्थाय । कनिष्ठपूर्वाः प्रत्यायन्ति ४ उदपात्रे दूर्वायव-सर्षपाण्योप्यार्द्रे गोमये निधायाश्मन्वतीत्यभ्यक्तमश्मानमग्निमुदपात्रं च संमृशन्ति ५ अधःशय्या हविष्यभक्षता प्रत्यूहनं च कर्मणां वैतानवर्जमेकरात्रं त्रिरात्रं नवरात्रं वाऽवा संचयनाद्व्रतानि ६ नाघाहानि वर्धयेयुरिति ह स्माह कौषीतकिः ७ अपरपक्षे संचित्यायुजासु रात्रिषु । यं त्वमग्न इति द्वाभ्यां सक्षीरेणोदकेनास्थीनि निर्वाप्य । पुराणे कुम्भे शरीरा-ण्योप्य । उत्ते स्तभ्नामीति लोष्टेनापिधाय । उच्छ्ञ्चस्वेति खाते निखाय । उच्छ्ञ्चमानेति परिमितेऽवधाय । अरण्ये निखनन्ति ८ शरीरेष्वदृश्यमानेषु त्रीणि षष्टिशतानि पलाशवृन्तानि ९ तेषामावापस्थानम् १० चत्वारिंशच्छिरसि ११ ग्रीवायां दश १२ अंसान्वंसयोर्बाह्वोः शतम् १३ उरसि त्रिंशत् १४ जठरे विंशतिः १५ षड्वृषणयोः १६ शिश्ने चत्वारि १७ ऊर्वोः शतम् १८ त्रिंशज्जानुजङ्घाष्ठीवतोः १९ पादाङ्गुलीषु विंशतिः २० एवं त्रीणि षष्टिशतानि भवन्ति २१ पुरुषाकृतिं कृत्वोर्णासूत्रैः परिवेष्ट्य यवचूर्णैः प्रलिप्य सर्पिषाभ्यज्याग्निभिः संस्कुर्वन्ति २२ इच्छन्पत्नीं पूर्वमारिणीमग्निभिः संस्कृत्य सांतपनेन वान्यामानीय ततः पुनरादधीत २३ १५

व्रतापवर्गे परिधिकर्म १ आनडुहं रोहितं चर्मोदग्ग्रीवं प्राग्ग्रीवं वोत्तरलोम पश्चादग्नेरुपस्तीर्योपविशन्ति कुशान्वेवमग्रान् २ अन्तरेणाग्निं चैतांश्चाभ्यक्त-मश्मानं निधाय । शम्याः परिधीन्कृत्वा । शमीमयमिध्मं पालाशं वा । वारणेन स्रुवेण कांस्येन वा जुहोति ३ उपस्थकृतः समन्वारब्धेषु ४ इमं जीवेभ्यः परैतु मृत्युरमृतं म आ गाद्वैवस्वतो नो अभयं कृणोतु । पर्णं वनस्पतेरिवाभि नः शीयतां रयिः । सचतां नः शचीपतिः ॥ याश्चारुणे दशान्वाधान इति ५ द्वादश हुत्वा । यथाहातीति दक्षिणमन्वंसं द्वाभ्यां समीक्ष्य । अञ्जनं सर्पिषा संनिनीय । कुशैः स्त्रीणामक्षीण्यनक्तीमा नारीरिति । सकृत्सकृन्मन्त्रेण द्विर्द्विस्तूष्णीम् ६ उत्तिष्ठ ब्रह्मणस्पत इति द्वाभ्यां ब्राह्मणस्य दक्षिणं बाहुमन्वारब्धानुत्तिष्ठतोऽनुमन्त्रयते ७ अनडुहो वा पुच्छम् ८ अनड्वानहतं वासः कांस्यश्च दक्षिणा ९ दक्षिणतो वित्तं नि वर्तध्वमिति सूक्तेन प्रत्येनाः प्रदक्षिणं त्रिः पर्येति १० प्रत्येनसि परिधिकर्म ११ १६

रुद्रं गवा यजते स्वस्त्ययनाय १ शूलगव इत्याचक्षते २ शुद्धपक्ष उपोष्य पुण्ये नक्षत्रे प्रागुदीच्यां दिशि ३ अग्निं मथित्वा प्राञ्चं प्रणीय ४ पुरस्तात्पलाशशाखां सपलाशां निखाय ५ तस्या उत्तरतः पशुमुपस्थाप्य ६ रुद्राय त्वा जुष्टमुपाकरोमि ७ रुद्राय त्वा जुष्टं प्रोक्षामि ८ रुद्राय त्वा जुष्टं नियुनज्मीति नियुनक्ति पलाशशाखायाम् ९ पर्यग्निकृतमुदञ्चं नयन्ति १० तं संज्ञपयन्ति प्राक्शिरसमुदक्पादं प्रत्यक्शिरसं वोदक्पादमरवमाणम् ११

यत्पशुर्मायुमकृतोरो वा पद्भिरा हते
अग्निर्मा तस्मादेनसो जातवेदाः प्र मुञ्चतु

स्वाहेति रवमाणे जुहोति १२ वपामुद्धृत्य प्रक्षाल्य पूर्वेऽग्नौ श्रपयित्वाभि-घार्योद्वास्य शिवंशिवमिति त्रिः पर्युक्ष्याज्याहुतीर्जुहोति १३ १७

या तिरश्ची नि पद्यते अहं विधरणी इति
तां घृतस्य धारया युजे समर्धमीमहम्
स्वाहा १

यस्येदं मर्वं तमिमं हवामहे
म मे कामात्कामपतिः प्र यच्छतु

स्वाहेति द्वितीयाम् २ अग्ने पृथिव्या अधिपत इति तृतीयाम् ३ प्रजापत इति चतुर्थीम् ४ त्रीणि पलाशपलाशानि मध्यमानि संतृड्योपस्तीर्य । वपाम-वधायाभिघार्य ।

यावतामहमीशे यावन्तो मे अमात्याः
तेभ्यस्त्वा देव वन्दे तेभ्यो नो देव मृल

वेद ते पितरं वेद मातरं द्यौस्ते पिता पृथिवी माता । तस्मै ते देव भवाय शर्वाय पशुपतय उग्राय देवाय महते देवाय रुद्रायेशानायाशनये स्वाहेति वपां हुत्वा । अनुप्रहरति पलाशानि ५ वपाश्रपण्यौ च ६ दर्शाय ते प्रतिदर्शाय स्वाहेत्युत्तरामाज्याहुतिं हुत्वा तथैव पर्युक्षति ७ पश्चिमेऽग्नौ स्थालीपाकं

श्रपयति ८ उत्तरतोऽवदानानि ९ स्थालीपाकं यूषं मांसमाज्यमिति संनिनीय शंयोः शंयोरिति त्रिः पर्युक्ष्य जुहोति १० १८

भवाय स्वाहा शर्वाय स्वाहा रुद्राय स्वाहेशानाय स्वाहाग्नये स्विष्टकृते स्वाहेति १ तथैव पर्युक्ष्य २ तान्येव संनिनीय ३ अग्नौ पश्चिमे ४ भवान्यै स्वाहा शर्वाण्यै स्वाहा रुद्राण्यै स्वाहेशानान्यै स्वाहाग्नाय्यै स्वाहेति ५ समानं पर्युक्षणम् ६ षला विकर्तनात्पलाशानि प्रागुदञ्चि निधाय । तेषु लोहितमिश्रमूवध्यमवधाय । रुद्रसेनाभ्योऽनुदिशति ७ आघोषिण्यः प्रतिघोषिण्यः संघोशिण्यो विचिन्वत्यः श्वसनाः क्रव्याद एष वो भागस्तं जुषध्वं स्वाहेति ८ यजमानश्चोपतिष्ठते ९ १९

भूपते भुवपते भुवनपते भूतपते भूतानां पते महतो भूतस्य पते मृल नो द्विपदे च चतुष्पदे च पशवे मृल नश्च द्विपदश्च चतुष्पदश्च पशून्योऽस्मान्द्वेष्टि यं च वयं द्विष्मो दुरापूरोऽसि सच्छायोऽधिनामेन । तस्य ते धनुर्हृदयं मन इषवश्च-क्षुर्विसर्गस्तं त्वा तथा वेद नमस्ते अस्तु सोमस्त्वावतु मा मा हिंसीः

यावरण्ये पतयतो वृकौ जञ्जभताविव
महादेवस्य पुत्राभ्यां भवशर्वाभ्यां नमः १

कद्रुद्रायेमा रुद्राया ते पितरिमा रुद्राय स्थिरधन्वन इति च सूक्तानि २ वरो दक्षिणा ३ उपाकरणं प्रोक्षणं पर्यग्निकरणमित्यावृतः पशुबन्धिक्यः ४ पलाशशाखेति देवतायै वपां देवतायै हविः स्विष्टकृते चान्येषां पशूनाम् ५ आग्नेयः सौम्यश्चाज्यभागौ देवतायै वपां देवतायै हविः स्विष्टकृते चाज्या-हुतिश्चानुमतये स्थालीपाकानाम् ६ २०

षलर्घ्या भवन्त्याचार्य ऋृत्विक् श्वशुरो राजा स्नातकः प्रिय इति १ उदङ्मुखः प्राङ्मुखो वा

अहं वर्ष्म सादृशानां विद्युतामिव सूर्यः
इदं तमधि तिष्ठामि यो अस्माँ अभि दासति

इति कूर्चमध्यास्तेऽधितिष्ठति वा २ विराजो दोहोऽसि विराजो दोहमशीय मयि पद्यायै विराजो दोह इति पाद्यं प्रतिगृह्य ३ अर्घ्यमित्युक्तोऽपः प्रतिगृह्य ४ आचमनीयमित्युक्त आपोहिष्ठीयाभिस्तिसृभिरेकैकयाचम्य ५ मधुपर्क इत्युक्तो यथा प्राशित्रं तथा प्रतीक्ष्य ६ तथा प्रतिगृह्णाति । यशसे ब्रह्मवर्चसायेति विकारः ७ प्रतिगृह्य सव्ये पाणौ कृत्वाङ्गुष्ठेनोपकनिष्ठिकया च पूर्वार्धादुपहत्य पूर्वार्धे कांस्यस्य निलिम्पति वसवस्त्वाग्निराजानो भक्षयन्त्विति ८ पितरस्त्वा यमराजानो भक्षयन्त्विति दक्षिणार्धाद्दक्षिणार्धे ९ आदित्यास्त्वा वरुणराजानो भक्षयन्त्विति पश्चार्धात्पश्चार्धे १० रुद्रास्त्वे- न्द्रराजानो भक्षयन्त्वित्युत्तरार्धादुत्तरार्धे ११ विश्वे त्वादेवाः प्रजापतिराजानो भक्षयन्त्विति मध्यादूर्ध्वम् १२ सकृत्सकृन्मन्त्रेण द्विर्द्विस्तूष्णीम् १३ महाव्याहृतिभिस्तिसृभिरेकैकया प्राश्य १४ अनुपाय चतुर्थम् १५ ब्राह्मणायोच्छिष्टदानम् १६ सर्वपानं वा १७ अपो वाऽभ्यवहरणम् १८ शंनोदेवीयाभिश्चतसृभिरुरोऽभिमृश्य १९ समानं प्राणमंमर्शनम् २० मुख- विमार्जनं च २१ आ गोः प्रवदनात्तूष्णीम् २२ गौरत्युक्त ओं कुरुत २३ माता रुद्राणामिति जपित्वोमुत्सृजत तृणान्यत्त्विति वा २४ कूर्चः पाद्यम- र्घ्यमाचमनीयं मधुपर्को गौरिति वेदयेत वेदयेत २५ २१

इति शाङ्खायनश्रौतसूत्रे चतुर्थोऽध्यायः समाप्तः

आर्षेयान् यूनोऽनूचानानृत्विजो वृणीते सोमेन यक्ष्यमाणः १ चतुरः सर्वान्वा २ चन्द्रमा मे दैवो ब्रह्मेत्युपांशु त्वं मानुष इत्युच्चैः ३ एवं सर्वान् ४ आदित्यो मे दैव उद्गाता त्वं मानुषः ५ अग्निर्मे दैवो होता त्वं मानुषः ६ वायुर्मे दैवोऽध्वर्युस्त्वं मानुषः ७ प्रजापतिर्मे दैवः सदस्यस्त्वं मानुषः ८ ऋतवो मे दैव्या होत्राशंसिनो यूयं मानुषाः ९ भर्गं मे वोचो भद्रं मे वोचो भूतिं मे वोचः श्रियं मे वोचो यशो मे वोचो मयि भर्गो मयि भद्रं मयि भूतिर्मयि श्रीर्मयि यश इति वृतो जपित्वा कच्चिन्नाहीनानुदेश्यन्यस्तार्त्विज्यनीतदक्षिणानाम- न्यतम इति पृष्ट्वा प्रतिशृणोति प्रत्याचष्टे वा १० १

प्राचीनप्रवणं देवयजनम् १ प्रागुदक्प्रवणं यज्ञकामस्य २ अनुब्रुवन्यत्र होताहवनीयमादित्यमपश्च पश्येत्तद्ब्रह्मवर्चसकामस्य ३ शुद्धपक्षे दीक्षा

पुण्ये नक्षत्रे समापनं च ४ २

अपराह्णे दीक्षणीयाग्नावैष्णवीष्टिः १ पौर्णमासीविकारः २ पञ्चदशसामिधेनीका ३ उपांशुहविः ४ विराजौ स्विष्टकृतः ५ नित्ये वा ६ उपहूतोऽयं यजमानोऽस्य यज्ञस्यागुर उदृचमशीयेत्याशास्तेऽयं यजमानोऽस्य यज्ञस्यागुर उदृचमशीयेत्याशास्त इत्याशिषां स्थान इलायां सूक्तवाके च प्राक्तार्तीयमवनिक्याः पुरोलाशेलायाः ७ न सूक्तवाके यजमानस्य नाम गृह्णाति प्राक् सवनीयात् ८ पत्नीसंयाजान्ता च ९ ३

अध्वर्युमन्वारभ्यौद्ग्रभणानि जुहूतं याजमानं मनो मे मनसा दीक्षतां वाङ्मे वाचा दीक्षतां प्राणो मे प्राणेन दीक्षतां चक्षुर्मे चक्षुषा दीक्षतां श्रोत्रं मे श्रोत्रेण दीक्षतामिति १ आहुतीर्वा जुहुयात् २ एकदीक्षे चोपस्थानम् ३ मनो दीक्षामुपैमीत्याहवनीयम् ४ वाचं दीक्षामुपैमीति गार्हपत्यम् ५ प्राणं दीक्षामुपैमीति दक्षिणाग्निम् ६ अपरिमिता दीक्षास्तासामपवर्गे ४ प्रायणीयेष्टिः ७ पथ्यां स्वस्तिमग्निं सोमं सवितारं चाज्येनादितिं चरुणा १ स्वस्ति नः पथ्यासु स्वस्तिरिद्धि । अग्ने नयाग्ने त्वं पारय । त्वं सोम प्र चिकितो या ते धामानि हविषा । तत्सवितुर्वरेण्यं य इमा विश्वा जातानि । सुत्रामाणं महीमूषु २ पञ्चदशसामिधेनीका ३ उपांशुहविः ४ नाज्यभागौ भवतः ५ त्वां चित्रश्रवस्तम यद्वाहिष्ठमिति स्विष्टकृतः ६ शंय्वन्ता च ७ ५

क्रीत्वा राजानमाधाय शकटे सोमाय पर्युह्यमाणायेत्युक्तः १

भद्रादभि श्रेयः प्रेहि बृहस्पतिः पुरएता ते अस्तु
अथेमवस्य वर आ पृथिव्या आरे शत्रून्कृणुहि सर्ववीरः

इत्यन्तरेण वर्त्मनी तिष्ठन्ननूच्य २ इमां धियं शिक्षमाणस्य वनेषु व्यन्तरिक्षं सोम यास्त इति चतस्रोऽनुसंयन्नन्तरेण वर्त्मनी ३ शलामग्रेण शकटमवस्थाप्य प्रपादयन्ति राजानम् ४ येन व्रजेयुस्तेनानुसमियात् ५ या ते धामानि हविषेत्यनुप्रपद्य ६ अग्रेणाहवनीयं दक्षिणा तिष्ठन्नागन्देव इति परिधाय ७ उपस्पृश्योत्सृज्यते ८ मदन्तीभिरुदकार्थोऽत ऊर्ध्वमाग्नीषोमप्रणयनात् ९ ६

आतिथ्या वैष्णवीष्टिः १ पौर्णमासीविकारः २ विष्णोर्नु कं प्रतिद्विष्णुः ३ होतारं चित्ररथं यस्त्वा स्वश्व इति स्विष्टकृतः ४ अग्निमन्थनीयाश्चासन्ने हविषि ५ उपांशुहविः ६ इलान्ता ७ ७
उपस्पृश्य सर्वे १ अनाष्टष्टमस्यनाधृष्यं देवानामोजोऽनभिशस्त्यभिशस्तिपाः अनभिशस्तेन्यमञ्जसा सत्यमुपगेषं सुविते मा धा इति सहिरण्यं ध्रौवमाज्यं पात्रीस्थं बर्हिष्यासन्नं तानूनप्त्रं समवमृश्य २

उपस्पृश्याग्रेणाहवनीयं परीत्यांशूनुपस्पृशन्तो राजानमाप्याययन्ते
अंशुरंशुष्टे देव सोमा प्यायतामिन्द्रायैकधनविदे

आ तुभ्यमिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्व
आ प्याययास्मान्सखीन्सन्या मेधया स्वस्ति ते

देव सोम सत्यामुदृचमशीयेति ३

यमादित्या अंशुमा प्याययन्ति यमक्षितिमक्षितयः पिबन्ति
तेन नो राजा वरुणो बेहस्पतिरा प्याययन्तु भुवनस्य गोपाः

इत्युरांस्यभिमृश्य ४ उपस्पृश्य दक्षिणोत्तानान्पाणीन्प्रस्तरे निधाय निह्नुवते सव्योत्तानानपराह्णे । एष्टा रायः प्रेषे भगाय ऋतमृतवादिभ्यो नमो द्यावा-पृथिवीभ्यामिति ५ आप्यायनप्रभृत्युपसद्युपसदि संस्थितायाम् ६ ८

अप्रवर्ग्यः प्रथमयज्ञः १ विकल्पः श्रोत्रियस्य २ उत्तरेण गार्हपत्यम् ३ महावीरपात्रेषु साद्यमानेषु पूर्वया द्वारा शालां प्रपद्य । उत्तरेणाहवनीयं खरौ पात्राणि च गत्वा । पश्चादुपोपविश्य । होतरभिष्टुहीत्युक्तः । अनवानमेकैकां सप्रणवामभिष्टौति ४

ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः
स बुध्न्या उपमा अस्य विष्ठा सतश्च योनिमसतश्च वि वः ५

इयं पित्रे राष्ट्र्येत्यग्रे प्रथमाय जनुषे भूम नेष्ठाः

तस्मा एतं सुरुचं ह्वारमह्यं घर्मं श्रीणन्ति प्रथमस्य धासेः ६

अभि त्यं देवं सवितारमोण्योः कविक्रतुम्
अर्चामि सत्यसवं रत्नधामभि प्रियं मतिं कविम्
ऊर्ध्वा यस्यामतिर्भा अदिद्युतत् सवीमनि
हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वस्तृपा स्वरिति वा ७

अञ्जन्ति यमिति बिलेऽज्यमाने ८ सं सीदस्वेति साद्यमाने ९ भवा नो अग्ने सुमनास्तपो ष्वग्ने यो नः सनुत्य इत्यङ्गारेषूपोह्यमानेषु १० कृणुष्व पाज इति पञ्च ११ परि त्वा गिर्वणोऽधि द्वयोः १२ शुक्रं ते अर्हन्बिभर्षि १३ पतङ्गमक्तं स्त्रक्वे द्रप्सस्येति सूक्ते १४ पवित्रं त इति द्वे १५

वि यत्पवित्रं धिषणा अतन्वत घर्मं शोचन्तं प्रणवेषु बिभ्रतः
समुद्रे अन्तरायवो विचक्षणं त्रिरह्नो नाम सूर्यस्य मन्वत १६

अयं वेन इति सूक्तं नाके सुपर्णमित्युद्धृत्य १७ गणानां त्वेति सूक्तम् १८ बृहद्वदेम विदथे सुवीरा इति वीरकामायै वीरं ध्यायात् १९ का राधदिति नव २० आ नो विश्वाभिरूतिभिरिति तिस्त्रः २१ प्रातर्यावाणेति पूर्वाह्णे सूक्तम् २२ आ भातीत्यपराह्णे २३ सर्वमीलेद्यावीयमुत्सृज्य वाचम् २४ उत्तमां परिशिष्य रुचितो घर्म इत्युक्तेऽरूरुचदित्यभिष्टुत्य २५ उत्तमया परिधाय २६ उपस्पृश्योत्थायावकाशानामनुवाकेन महावीरमुपस्थायोप-स्पृश्योपविशति २७ ९

उप हूय इति गव्याहूयमानायाम् १ हिंकृण्वतीत्यायत्याम् २ अभि त्वा देव सवितरित्यभिधीयमानायाम् ३ समी वत्सं सं वत्स इवेत्युपसृज्यमानायाम् ४ यस्ते स्तन इति स्तनं वत्सेऽभिपद्यमाने ५ गौरमीमेदित्युन्नीयमाने ६ नमसेदुप सीदत संजानाना इत्युपसीदति ७ दोहेन गां दुहन्ति सप्ता दशभिरात्मन्वत्

समिद्धो अग्निरश्विना तप्तो वां घर्म आ गतम्

दुह्यन्ते गावो वृषणेह धेनवो दस्रा मदन्ति कारवः

समिद्धो अग्निर्वृषणा रयिर्दिवस्तप्तो घर्मो दुह्यते वामिषे मधु
वयं हि वां पुरुतमासो अश्विना हवामहे सधमादेषु कारवः

तदु प्रयक्षतममिति दुह्यमानायाम् ८ अधुक्षदुत्तिष्ठ ब्रह्मणस्पत इत्युत्तिष्ठति ९

उप द्रव पयसा गोधुगो षु मा घर्मे सिञ्च पय उस्रियायाः
वि नाकमख्यत्सविता दमूना अनु द्यावापृथिवी सुप्रणीते

इत्याह्रियमाणयोः पयसोः १० आ सुते सिञ्चत श्रियमा नूनमश्विनोर्ऋषिरित्यासिच्यमानयोः ११ उदु ष्य देवः सविता हिरण्ययेत्युद्यम्यमाने १२ कर्मविपर्यासे यथाकर्म १३ प्रैतु ब्रह्मणस्पतिरिति प्रव्रजत्सु १४ नाके सुपर्णमित्यनुसंयन् १५ होतृषदन उपविश्य १६ घर्मस्य यजेत्युक्तः १७ उभा पिबतं

तप्तो वां घर्मो नक्षति स्वहोता प्र वामध्वर्युश्चरति प्रयस्वान्
मधोर्दुग्धस्याश्विना तनाया वीतं पातं पयस उस्रियायाः

इति समस्ताभ्यां वषट्कृत्य १८ घर्मस्याग्ने वीहीत्यनुवषट्करोतीति पूर्वाह्णे १९ अथापराह्णे २० अस्य पिबतं यदुस्रियास्वाहुतं घृतं पयोऽयं सु वामश्विना भाग आ गतम् । माध्वी धर्तारा विदथस्य सत्पती तप्तं घर्मं पिबतं रोचने दिवः ॥ इति समस्ताभ्यां वषट्कृत्य २१ तथैवानुवषट्कृत्य २२

स्वाहाकृतः शुचिर्देवेषु घर्मो यो अश्विनोश्चमसो देवपानः
तमीं विश्वे अमृतासो जुषाणा गन्धर्वस्य प्रत्यास्ना रिहन्ति

इत्यभिष्टुत्य २३ सखे सखायमित्यायति २४ गन्धर्व इत्थेति साद्यमाने २५ तं घोर्मत्थेति प्रागाथिकामावर्त्स्यति २६ हविर्हविष्म इति पुरा होमात् २७ प्राणभक्षो होतुः २८ प्रत्यक्षो युअजमानस्य २९ दधिघर्मे च ३० हुतं हविर्मधु हविरिन्द्रतमेऽग्नावश्याम ते देव घर्म मधुमतो वाजवतः पितुमत इति

भद्मन्त्रः ३१ संसाद्यमानेषु महावीरपात्रेषु

आ यस्मिन्सप्त वासवा रोहन्ति पूर्व्या रुहः
ऋषिर्हि दीर्घश्रुत्तम इन्द्रस्य घर्मो अतिथिः

इत्यभिष्टुत्य ३२ सूयवसादिति परिधाय ३३ उपस्पृश्योत्सृज्यते ३४ सुत्ये वाहन्याग्नीध्रीये प्रवर्ग्यः स्तुते बहिष्पवमाने माध्यन्दिने च ३५ प्रस्तरे निह्नुत्य १०

उपसदा चरन्ति सप्रवर्ग्ये प्रवर्ग्यं संस्थाप्य ३६ उपसद्यायेति पूर्वाह्णे तिस्रः सामिधेनीरनवानमेकैकां सप्रणवां त्रिस्त्रिराह १ इमां मे अग्ने समिधमिति तिस्रोऽपराह्णे २ तृतीयेन पूर्वस्या वचनेनोत्तरां संधायावस्यति ३ अग्निमावह सोममावह विष्णुमावहेति प्रणवेन संधाय ४ स्रुगादापनेन स्रुचावादाप्य ५ उपांशु यजति ६ अग्निर्वृत्राणि य उग्र इव । त्वं सोम क्रतुभिरषाल्हं युत्सु । यः पूर्व्याय तमु स्तोतारः ७ यावदादिष्टं कुर्यात् ८ विपर्यासोऽपराह्णे याज्यापुरोनुवाक्यानाम् ९ इमां मे अग्ने समिधमिति द्वितीयेऽहनि पूर्वाह्णे तिस्रः सामिधेनीः १० उपसद्यायेत्यपराह्णे ११ यथा प्रथमे तथा तृतीये १२ स्वकालास्तु विवर्धेरन् १३ अहरहर्वा विपर्यासः १४ उपवसथे प्रातरुभे चरणे संस्थाप्य १५ ११

अग्निप्रणयनमप्रवर्ग्ये १ महावीरपात्रोद्वासनं सप्रवर्ग्ये २ तत्र प्रस्तोता साम गायति ३ तत्र होतुर्निधनोपायः ४ व्याख्यातमग्निप्रणयनम् ५ १२

हविर्धानप्रवर्तनायामन्त्रितः १ दक्षिणस्य हविर्धानस्योत्तरं वर्त्मोत्तरस्य च दक्षिणमन्तरेण तिष्ठन् हविर्धानाभ्यां प्रवर्त्यमानाभ्यामित्युक्तः २ अपेतो जन्यं भयमन्यजन्यं च वृत्रहन् । अप चक्रा अवृत्सत ॥ इति दक्षिणेन प्रपदेन प्रत्यञ्चं लोगमपास्य ३ प्रेतां यज्ञस्येति तिष्ठन्ननूच्य ४ द्यावा नः पृथिवी इमं तयोरिद्घृतवद्यमे इवेति दक्षिणस्योत्तरं वर्त्मोपनिश्रितोऽनुसंयन् ५ अधि द्वयोरिति च्छदिष्याधीयमाने ६ विश्वा रूपाणि प्रतीति परिश्रीयमाणयोः ७ आ वामुपस्थमिति नभ्यस्थयोः ८ कर्मविपर्यासे यथाकर्म ९ परि त्वा गिर्वण

इति परिधाय १० यत्र तिष्ठन् प्रथमामन्ववोचत्तत्स्थित्वोत्सृज्यते ११ १३

मितेषु यज्ञागारेष्वग्नीषोमौ प्रणयन्ति १ तत्प्रभृत्यानूबन्ध्यायाः संस्थानादन्तरेण चात्वालोत्करौ तीर्थम् २ तेन प्रपद्य ३ उत्तरेणाग्नीध्रीयं धिष्ण्यं सदश्च गत्वा ४ उत्तरेणाध्वर्यू यज्ञपात्राणि च पूर्वया द्वारा शालां प्रपद्य ५ शालामुखीयस्य पश्चादुपविश्य ६ अग्नीषोमाभ्यां प्रणीयमानाभ्यामित्युक्तः ७ सावीर्हि देव प्रथमाय पित्रे वर्ष्माणमस्मै वरिमाणमस्मै । अथास्मभ्यं सवितः सर्वताता दिवेदिव आ सुवा भूरि पश्वः ॥ इत्यासीनोऽनूच्य ८ उत्तिष्ठ ब्रह्मणस्पते ९ प्रैतु ब्रह्मणस्पतिः १० होता देव उप त्वाग्न इति तृचौ ११ भूतानां गर्भमादध इति गर्भकामायै गर्भं ध्यायादुत्तरेण सदोऽनुसंयन् १२ आग्नीध्रीयेऽग्निं निदधति १३ अग्ने जुषस्वेत्याहुतौ हूयमानायाम् १४ उत्तरेणाग्निं सोमो जिगातीति तिस्रो ऽनुसंयन् १५ उप प्रियमित्याहवनीये हूयमानायाम् १६ तमस्य राजेति प्रपाद्यमाने १७ अन्तश्च प्रागा इत्यनुप्रपद्य १८ दक्षिणे हविर्धाने राजनि सन्न उत्तरतो दक्षिणा तिष्ठञ्छ्येनो न योनिं गणानां त्वास्तभ्नाद् द्याम् १९ एवा वन्दस्वेति परिधाय २० सव्यावृद्धविर्धानयोः पूर्वस्यां द्वार्युपविशति २१ अपरया द्वारा प्रपाद्यमानेऽनुसमेति होता २२ समानमनुवचनम् २३ दक्षिणावृदपरया द्वारा निष्क्रम्य सव्यावृदुत्तरेण हविर्धाने गत्वा तत्रैवोपविश ति २४ १४

अग्नीषोमीयेणोपवसथे पशुना यजते १ यूपायाज्यमानायेत्युक्तोऽञ्जन्ति त्वामित्यन्वाह २ उच्छ्रीयमाणायेत्युक्त उच्छ्रयस्व वनस्पते समिद्धस्य श्रयमाणः पुरस्ताज्जातो जायत ऊर्ध्व ऊ षु ण ऊर्ध्वो नः ३ परिवीय-माणायेत्युक्तो युवा सुवासा इति परिधाय तिष्ठन्नन्वाहाग्निमन्थनीयाः ४ यज्ञेन यज्ञमिति परिधाय सामिधेनीरन्वाह ५ पशुदेवतामावाह्यानन्तरं वनस्पतिम् ६ अध्वर्यू संमृश्य तिष्ठति ७ मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रशिषा प्रयच्छामि यज्ञस्यारिष्ट्या इति यजमानो मैत्रावरुणाय दण्डं प्रयच्छति ८ तेनैव मन्त्रेण यथार्थं प्रतिगृह्य दक्षिणेन होतारं दक्षिणावृत्पूर्वः प्रतिपद्यते ९ उत्तरेण हविर्धाने दक्षिणेनाग्नीध्रीयं धिष्ण्यं गत्वा पूर्वया द्वारा सदः प्रपद्य स्वस्य धिष्ण्यस्य पश्चादुपविश्यैकादश प्रयाजान्यजति १० १५

प्रैषा मैत्रावरुणस्य १ सप्रैषे च पुरोनुवाक्याः २ तथानुवचनानि ३ प्रहाणस्तिष्ठन्दण्डे पराक्रम्य समिधः प्रेष्येत्युक्तो होता यक्षदग्निं समिधेति प्रेष्यति ४ आप्रियः प्रयाजयाज्या यदार्षेयो यजमानः ५ समिद्धो अद्य मनुष इति वा सर्वेषाम् ६ स्वा तु नाराशंसी तत्प्रयाजस्य ७ दशभिश्चरित्वा पर्यग्नय इत्युक्तोऽग्निर्होता नो अध्वर इति तिस्रोऽन्वाह ८ उपप्रेष्य होतरित्युक्तो ऽजैदग्निरित्युपप्रैषमाह ९ उक्त उपप्रैषेऽध्रिगुं होता १० १६

दैव्याः शमितार उत च मनुष्या आरभध्वमुपनयत मेध्या दुर आशमाना मेधपतिभ्यां मेधम् १ प्रास्मा अग्निं भरत स्तृणीत बर्हिरन्वेमं माता मन्यतामनु पितानु भ्राता सगर्भ्योऽनु सखा सयूथ्यः २ उदीचीनाँ अस्य पदो निधत्तात्सूर्यं चक्षुर्गमयताद्वातं प्राणमन्ववसृजतादन्तरिक्षमसुं दिशः श्रोत्रं पृथिवीं शरीरम् ३ एकधास्य त्वचमाक्व्यतात्पुरा नाभ्या अपिशसो वपामुत्खिदतादन्तरेवोष्माणं वारयध्वात् ४ श्येनमस्य वक्षः कृणुतात्प्रशमा बाहू शला दोषणी कश्यपे- वांसाच्छिद्रे श्रोणी कवषोरू स्त्रेकपर्णाष्ठीवन्ता ५ षड्विंशतिरस्य वङ्क्रयस्ता अनुष्ठ्योच्च्यावयताद्गात्रंगात्रमस्यानूनं कृणुतात् ६ ऊवध्यगोहं पार्थिवं खनतात ७ अस्ना रक्षः संसृजतात् ८ वनिष्टुमस्य मा राविष्टोरूकं मन्यमाना नेद्वस्तोके तनये रविता रवच्छमितार इत्यध्रिगौ नवम उच्छ्वासः ९ अध्रिगो शमीध्वं सुशमि शमीध्वं शमीध्वमध्रिगो३ इति त्रिः परिधायोपांशु जपत्युभावपापश्चेति १० न पशुं संज्ञप्यमानमीक्षेत ११ पृषदाज्यावेक्षणं प्रायश्चित्तम् १२ ऋचं वा वैष्णवीं जपेत् १३ १७

स्तोकेभ्य इत्युक्तो जुषस्व सप्रथस्तममिमं नो यज्ञमिति च सूक्तमन्वाह १ स्वाहाकृतिभ्य इत्युक्तो होता यक्षदग्निं स्वाहाज्यस्येति प्रेष्यति २ आप्रीणामुत्तमा याज्या ३ अन्तरेणोत्तमं प्रयाजं वपां च वाग्यमनम् ४ नाज्यभागौ यजति ५ वृधन्वन्तौ वा ६ दार्शपौर्णमासिका निगमास्तेषु निगच्छतः ७ न प्रैषेषु ८ अग्नीषोमाविममिति वपायाः पुरोनुवाक्या ९ होता यक्षदग्नीषोमाविति प्रैषः १० युवमेतानीति याज्या ११ यथाप्रपन्नमुप- निष्क्रम्येदमाप इति तृचेन चात्वाल उपस्पृश्योत्सृज्येते १२ १८

पशुपुरोलाशायामन्त्रितावाग्नीध्रीयमुत्तरेण होतुश्च गत्वा यथाधिष्ण्यमुपविशतः

१ पश्वर्थानि विभवादर्थं साधयन्ति २ पुरोलाशः स्विष्टकृत्समवायेऽपि ३ अतुल्यानामनूहेन ४ न निगमाः सन्ति पशुतन्त्रे चोद्यमानानाम् ५ अग्नीषोमा यो अद्येति पुरोलाशस्य पुरोनुवाक्या ६ होता यक्षदग्नीषोमाविति प्रैषः ७ अग्नीषोमा पिपृतमिति याज्या ८ इलामग्न इति स्विष्टकृतः पुरोनुवाक्या ९ होता यक्षदग्निं पुरोलाशस्येति प्रैषः १० अग्निं सुदीतिमिति याज्या ११ इलामुपहूय पशुना चरन्ति १२ मनोतायै हविष इत्युक्तस्त्वं ह्यग्ने प्रथमो मनोतेति मनोतासूक्तमन्वाह १३ अग्नीषोमा य आहुतिमिति पशोः पुरोनुवाक्या १४ होता यक्षदग्नीषोमाविति प्रैषः १५ अग्नीषोमा हविष इत्यर्धर्चे याज्याया विरमत्या वसाहोमात् १६ हुते वषट्करोति १७ देवेभ्यो वनस्पत इति वनस्पतेः पुरोनुवाक्या १८ होता यक्षद्वनस्पतिमिति प्रैषः १९ वनस्पते रशनयेति याज्या २० पिप्रीहि देवानिति स्विष्टकृतः पुरोनुवाक्या २१ होता यक्षदग्निं स्विष्टकृतमिति प्रैषः २२ अनिगदा याज्या २३ इलामुपहूयैकादशा-नुयाजान्यजति २४ १९

देवं बर्हिः सुदेवं देवैरित्यनवानं प्रेष्यति १ यथा चातुर्मास्येषु तथा यजति २ अष्टमनवमावन्तरेणागन्तू ३ देवो वनस्पतिर्वसुवने वसुधेयस्य वेतु । देवं बर्हिर्वारितीनां वसुवने वसुधेयस्य वेतु ४ सूक्ता प्रेष्येत्युक्तोऽग्निमद्य होतारमिति सूक्तवाकप्रैषमाह ५ सौमिकं सवनीये ६ शंयोरुक्ते यथाप्रपन्नमु-पनिष्क्रम्योत्सृज्यते मैत्रावरुणः ७ शालां होता गत्वा पत्नीसंयाजान्तं नक्तं संस्थापयति संस्थापयति ८ २०

इति शाङ्खायनश्रौतसूत्रे पञ्चमोऽध्यायः समाप्तः

व्याख्यातोऽग्नीषोमीयः प्रकृतिः पशूनाम् १ आर्षमाम्नानं मन्त्राणां प्रकृतौ २ यथार्थमुत्तरस्यां ततावर्थविकारस्योत्पत्तिरूपेणानभिधानाच्छब्दविकारमूहं ब्रुवते ३ अृक्षु विकारो न विद्यते ४ यजमानाभ्यां यजमानेभ्यः । मेधपतये मेधपतिभ्यः । मेधौ मेधान् । आददादन् । घस्तु घसन्तु । अघसदघसन् । अघदक्षन्निति वा । रभौ । साविव रभीयस इव । अग्रभीदग्रभीषुः । अवीवृधतावीवृधन्त । अश्यासुः । अृध्यौसुः । अचीकमेतामचीकमन्त । इत्यर्थभे दाच्छब्दविकारः ५ बर्हिश्चक्षुः श्रोत्रं प्राणोऽसुस्त्वङ्‌ नाभिरूष्मा ज्ञातिनामानि श्येनं शला कश्यपा कवषा स्रेकपर्णोवध्यगोहमस्नेति

यथासमाम्नातम् ६ चोदनासंदेहे च ७ शेषभूतान्यपूर्वाणि ८ आयनिगदाश्च ९ एकधैकधा षड्विंशतिः षड्विंशतिरिति समासेन वा १० एष सङ्ख्यान्यायः ११ एकदेवतद्विदेवतयोश्च बहुवत् १२ पुंवन्मिथुनेषु समान्याम् १३ अप्य-न्यतरस्याम् १४ एवेत्यकारेण संधानं देवतानामधेयस्य स्वरादेर्द्विदेवत्यस्य १५ सकृद्बध्नन्पशुभेदे १६ सूपस्थाश्च १७ उदगयनस्याद्यन्तयोरैन्द्राग्नो निरूल्हपशुबन्धः १८ सांवत्सरो वा १९ काम्या बहवः २० अग्निप्रणयनादयो हृदयशूलान्ताः पशवोऽग्नीषोमीयसवनीयौ परिहाप्य २१ आग्नावैष्णवी च यक्ष्यमाणस्य २२ निर्वचनं चाशिषाम २३ अन्यत्र चाग्नीषोमीयात्सूक्तवाके नामग्रहणम् २४ प्रातरनुवाकप्रभृत्यादिप्रदिष्टानि शस्त्रानुवचनयोः सूक्तानि २५ एकां प्रतीयादन्यत्र २६ १

महारात्रे प्रातरनुवाकायामन्त्रितोऽग्रेणाग्नीध्रीयं धिष्ण्यं तिष्ठन्प्रपदो जपति १ भूः प्रपद्ये भुवः प्रपद्ये स्वः प्रपद्ये भूर्भुवः स्वः प्रपद्य ओम् प्रपद्ये वाचमृचं प्रपद्ये मनो यजुः प्रपद्ये साम प्राणं प्रपद्ये चक्षुः श्रोत्रं प्रपद्ये नमो देवेभ्यो नमो देवताभ्यो नमो महते देवाय नमो गन्धर्वाप्सरोभ्यो नमः सर्पदेवजनेभ्यो नमो भूताय नमो भविष्यते नमः पितृभ्यः प्रतिनमस्कारेभ्यो वोऽपि नमः २ दिशो यथारूपमुपतिष्ठते ३ २

अस्यां मे प्राच्यां दिशि सूर्यश्च चन्द्रश्चाधिपती सूर्यश्च चन्द्रश्च मैतस्यै दिशः पातां सूर्यं च चन्द्रं च स देवतानामृच्छतु यो नोऽतोऽभिदासतीति प्राचीम् १ अस्यां मे दक्षिणस्यां दिशि यमश्च मृत्युश्चाधिपती यमश्च मृत्युश्च मैतस्यै दिशः पातां यमं च मृत्युं च स देवतानामृच्छतु यो नोऽतोऽभिदासतीति दक्षिणाम् २ अस्यां मे प्रतीच्यां दिशि मित्रश्च वरुणश्चाधिपती मित्रश्च वरुणश्च मैतस्यै दिशः पातां मित्रं च वरुणं च स देवतानामृच्छतु यो नोऽतोऽभिदासतीति प्रतीचीम् ३ अस्यां म उदीच्यां दिशि सोमश्च रुद्रश्चाधिपती सोमश्च रुद्रश्च मैतस्यै दिशः पातां सोमं च रुद्रं च स देवतानामृच्छतु यो नो ऽतोऽभिदासतीति सव्यावृदुदीचीम् ४ अस्यां म ऊर्ध्वायां दिशि बृहस्पतिश्चेन्द्रश्चाधिपती बृहस्पतिश्चेन्द्रश्च मैतस्यै दिशः पातां बृहस्पतिं चेन्द्रं च स देवतानामृच्छतु यो नोऽतोऽभिदामतीति प्राङूर्ध्वाम् ५ अस्मिन्म अन्तरिक्षे वायुश्च वृष्टिश्चाधिपती वायुश्च वृष्टिश्च मैतस्यै दिशः पातां वायुं च

वृष्टिं च स देवतानामृच्छतु यो नोऽतोऽभिदासतीत्यन्तरिक्षम् ६ अस्यां मे पृथिव्यामग्निश्चान्नं चाधिपती अग्निश्चान्नं च मैतस्यै दिशः पातामग्निं चान्नं च स देवतानामृच्छतु यो नोऽतोऽभिदासतीति पृथिवीम् ७ बृहद्रथन्तरे म ऊरू वामदेव्यमात्मा यज्ञायज्ञीयं प्रतिष्ठा भूरहं भुवरहं स्वरहमश्माहमश्माखणः सुत्रामाणमिति जपित्वा दक्षिणावृदाग्नीध्रीये भूर्भुवः स्वः स्वाहाग्नये स्वाहोषसे स्वाहाश्विभ्यां स्वाहा सरस्वत्यै स्वाहा जुषाणानि महांसि सवनान्याज्यस्य व्यन्तु स्वाहेति स्रुवेण हुत्वा सव्यावृद्धविर्धानयोः पूर्वस्यां द्वार्युपविशति ८ देवेभ्यः प्रातर्यावभ्य इत्युक्तो हिंकृत्य मध्यमया वाचा प्रातरनुवाकमन्वाह ९ त्रीणि पदानि समस्य पङ्क्तीनामवस्येद्द्वाभ्यां प्रणुयात् १० आपोरेवतीमनूच्य ३ आग्नेयं गायत्रं क्रतुम् ११ उपप्रयन्तो अध्वरम् । अग्निमीले पुरोहितम् । अग्निं दूतं वृणीमहे । अश्वं न त्वेति दश । जुषस्व सप्रथस्तमम् । अभि त्वा गोतमा गिरा । अग्निर्होता पुरोहितः । दूतं वः । अग्ने मृल । अर्चन्तस्त्वा । अग्निं स्तोमेन । उपसद्याय । इमे विप्रस्य । समिधाग्निम् अग्निं हिन्वन्तु । प्राग्नये वाचम् । त्वमग्ने यज्ञानामिति षड्विंशतिः १ अथानुष्टुभम् २ तेते अग्न इत्येका । होताजनिष्ट । त्वं हि क्षैतवदिति नव अग्ने कदा तअानुषगिति पञ्च ३ अथ त्रैष्टुभम् ४ ससस्य यदिति पञ्च । यो मर्त्येष्विति त्रीणि । प्र वो देवमिति पञ्च सूक्तानि । अग्ने बृहन्निति च सप्त अगन्म महा ५ अथ बार्हतम् ६ एना वः । प्र वो यह्वम् । अग्ने विवस्वदिति द्वादश । सखायस्त्वेत्यष्टौ । अदर्शीति चतस्रः । समिद्ध-श्चिदिति तिस्रः अयमग्निः सुवीर्यस्य ७ अथौष्णिहम् ८ त्वामग्ने मनीषिणः । ईलिष्वा हि पुरु त्वा ९ अथ जागतम् १० वेदिषद इति सप्त । एति प्र होता । यज्ञेन वर्धत । जनस्य गोपाः ११ अथ पाङ्क्तम् १२ अग्निं तं मन्ये १३ ४

अथोषस्यं गायत्रम् १ कस्त उष इति तिस्रः । प्रति ष्या सूनरी २ अथानुष्टुभम् ३ उषो भद्रेभिः ४ अथ त्रैष्टुभम् ५ उपोरुरुच इति चत्वारि ६ अथ बार्हतम् ७ प्रत्यु अदर्शि । सह वामेन ८ अथौष्णिहम् ९ उषस्तच्चित्रमिति तिस्रः १० अथ जागतम् ११ एता उ त्या इति चतस्रः १२ अथ पाङ्क्तम् १३ महे नः १४ ५

अथाश्विनं गायत्रम् १ अश्विना यज्वरीरिष इति तिस्रः प्रातर्युजेति चतस्रः ।

आश्विनावश्वावत्येति तिस्रः । एषो उषाः । गोमदू ष्विति द्वे । दूरादिहेवेति षट्त्रिंशत् । उदीराथाम् । आ मे हवम् २ अथानुष्टुभम् ३ आ नो विश्वाभिरूतिभिः । यदद्य स्थः परावतीति सूक्ते ४ अथ त्रैष्टुभम् ५ आ भातीति सूक्ते । नासत्याभ्यामिति त्रीणि । वसू रुद्रेति तिस्रः । युवो रजांसीति सूक्ते । तं युञ्जाथामिति सूक्ते । ग्रावाणेव । धेनुः प्रत्नस्य । क उ श्रवदिति सूक्ते । स्तुषे नरेति सूक्ते परिहाप्य पञ्चपदाम् । आ वां रथो रोदसी बद्बधान इति पञ्च सूक्तानि ६ अथ बार्हतम् ७ इमा उ वां दिविष्टयः अयं वां मधुमत्तम इति प्रथमा तृतीया पञ्चमी च ८ अथौष्णिहम् ९ युवोरु षू रथमिति पञ्च १० अथ जागतम् ११ त्रिश्चिन्नो अद्य । ईलेद्यावीयम् । घोषां च सपुत्राम् १२ अथ पाङ्क्तम् १३ प्रति प्रियतममिति १४ उत्तमया परिधायोत्सृज्य वाचम् । अया वाजमिति जपति १५ इति साहस्रः प्रातरनुवाकः १६ छन्दोऽनन्तरेण वा प्रतिपत्समारोहणीयानां चैतस्य समाम्नायस्य त्रीणि षष्टिशतानि १७ ऊर्ध्वं वा शताद्याथाकामी १८ पाङ्क्तानि नान्तरियात् १९ पुरोदयादुपांशुं होष्यन्तीति स कालः परिधानस्य २० आन्तर्यामाद्वाग्यमनम् २१ ६

अप इष्य होतरित्युक्तः प्र देवत्रेति द्वादशीं परिहाप्य १ नवानूच्यैकादशी-माहुतावप्सु हूयमानायाम् २ आवृत्तासु दशमीम् ३ प्रति यदाप इति दृश्यमानासु ४ समन्या इति समायतीषु ५ आपो न देवीरिति होतृचमसे ऽवनीयमानासु ६ आ धेनव इत्यायतीषु सर्वामुक्त्वा प्रणवेनावस्यति ७ अध्वर्यवैषीरपा ३ इत्यध्वर्युं पृच्छति ८ उतेव नम्नमुरिति प्रत्याह ९ प्रत्युक्तो निगदं तास्वध्वर्यवाधावेन्द्राय सोममूर्जस्वन्तं पयस्वन्तं मधुमन्तं वृष्टिवनिं वसुमते रुद्रवत आदित्यवत ऋभुमते विभुमते वाजवते बृहस्पतिमते विश्वदेव्यावते । यस्य पीत्वा मद इन्द्रो वृत्राणि जङ्घनत् । प्र स जन्यानि तारिषः । अम्बय इत्यध्यर्धामनूच्य । उपोत्थायाध्वर्युमन्वावृत्योत्तरामध्य-र्धामनूच्य । उपोत्तमां च सूक्तस्य । उत्तमया परिधाय । पर्यावृत्योपविशति १० ७

प्राणं मे पाहि प्राणं मे जिन्व स्वाहा त्वा सुभव सूर्यायेत्युपांशुं हूयमानमनुप्राणिति १ अपानं मे पाह्यपानं मे जिन्व स्वाहा त्वा सुभव

सूर्यायेत्यन्तर्याममन्ववानिति २ उत्तरेणाहवनीयं बहिष्पवमानेन स्तुवते ३ दक्षिणतो ब्रह्मा मैत्रावरुणश्चोपविश्य ४ ब्रह्मन्स्तोष्यामः प्रशास्तरित्युक्तौ ५ आयुष्मत्य ऋचो मा गात तनूपाः साम्नः स्तुत देवस्य सवितुः प्रसव इति जपित्वा ६ ओं स्तुतेति ७ प्रसवः सर्वेषां स्तोत्राणाम् ८ असतो मा सद्गमय तमसो मा ज्योतिर्गमयान्तान्मानन्तं गमय मृत्योर्मामृतं गमयेति यजमानः पवमानानुषसरिष्यन् ९ श्येनोऽसि पत्वा गायत्रच्छन्दा अनु त्वारभे स्वस्ति मा संपारयास्य यज्ञस्योदृचमिति स्तुते बहिष्पवमाने १० सुपर्णोऽसि पत्वा त्रिष्टुप्छन्दा इति माध्यन्दिने ११ सखासि पत्वा जगच्छन्दा इत्यार्भवे १२ समान उदर्कः १३ उपहूता देवा अस्य सोमस्य पवमानस्य विचक्षणस्य भक्ष उप मां देवा हूयन्तामस्य सोमस्य पवमानस्य विचक्षणस्य भक्षे मनसा त्वा भक्षयामि वाचा त्वा भक्षयामि प्राणेन त्वा भक्षयामि चक्षुषा त्वा भक्षयामि श्रोत्रेण त्वा भक्षयामीति स्तुते बहिष्पवमाने होता १४ ८

आग्नेयः सवनीयः १ ऐन्द्राग्नो वा २ ऐकादशिना वा ३ एकयूपेष्वैकादशि-नेष्वावर्तते परिव्ययणीया रशनापृथक्त्वात्त्रिस्त्रिः ४ नानायूपेषु ५ अग्निष्ठे परिव्ययणीयामुक्त्वा नवसु सप्तसप्ताह ६ एकादशेऽन्तरेण परिव्ययणीयां प्रगाथं च यान्वो नर इति च सूक्तशेषमन्वाह ७ उत्तमयोपशयमनुमन्त्रयते ८ पूर्वेद्युरुच्छ्रितेष्वपरिवीयमाणेषु पूर्वया परिदध्यात् ९ संतानार्थो वार्धर्चेनैव काङ्क्षेत् १० समानजातीया अनुममियात् ११ यथोत्तमे तथोहेन १२ पशुदे-वतामावाह्य वनस्पतिं च । इन्द्रं वसुमन्तमावहेन्द्रं रुद्रवन्तमावहेन्द्र-मादित्यवन्तमृभुमन्तं विभुमन्तं वाजवन्तं बृहस्पतिमन्तं विश्वदव्यावन्तमावहेति सवनदेवताः १३ नान्येषु निगमस्थानेषु निगच्छन्ति १४ सूक्तवाके वा १५ अध्वर्यू संमृश्य प्रवरानुपूर्व्येण प्रवृताहुती जुहोति १६ जुष्टो वाचो भूयासं जुष्टो वाचस्पतेर्देवि वाग्यत्ते वाचो मधुमत्तमं तस्मिन्नो अद्य धाःस्वाहा सरस्वत्या इति पूर्वाम् १७ तूष्णीमुत्तराम् १८ ९

अग्ने नयेति तिस्रो भुवो यज्ञस्य प्र वः शुक्राय प्र कारव इत्याग्नेयस्य १ आ नो दिवो बृहतः पर्वतादा सरस्वतीं देवयन्तः सरस्वत्यभि नः पावीरवी कन्या प्र क्षोदसेमा जुह्वाना इति सारस्वतस्य २ त्वं सोम प्र चिकितस्त्वमिमा ओषधीः सोमो धेनुं या ते धामानि दिव्यषाल्हं युत्सु या ते धामानि हविषेति

सौम्यस्य ३ पूषेमा आशाः प्रपथे पथां पथस्य यः शुक्रं ते यास्ते पूषन्पूषा सुबन्धुरिति पौष्णस्य ४ आ दैव्या वेधसं बृहस्पतिः समजयत्स हि शुचिः स सुष्टुभा स ऋक्वता म आ नो योनिमिति बार्हस्पत्यस्य ५ विश्वे अद्य मरुतो विश्व ऊती यं देवामोऽवथ विश्वे देवाः शृणुत ये के च ज्मा ते हि यज्ञेषु यज्ञियाम ऊमाः स्तीर्णे बार्हषीति वैश्वदेबस्य ६ इन्द्रं नर इन्द्रो राजेन्द्र क्षत्रमुरुं न आ नो विश्वाभिरूतिभिः सजोषा आ ते शुष्पो वृषभ इत्यैन्द्रस्य ७ गोमदश्वावद्धये नरः शुची वोऽरा इवेद्या वः शर्म यूयमस्मानिति मारुतस्य ८ उभा वामा वृत्रहणा ता योधिष्टं शुचिं नु गीर्भिर्विप्रः प्र चर्षणिभ्य इत्यैन्द्राग्नस्य ९ आ नो देवः सविता त्रायमाण आ देवो यातु सविता यन्त्रैर्वाममद्य ये ते पन्था अस्मभ्यं तद्दिव इति सावित्रस्य १० अस्तभ्नाद् द्यां तत्त्वा याम्यव ते हेल एवा वन्दस्वेमां धियं शिक्षमाणस्योदुत्तमं वरुणेति वारुणस्य ११ इत्यैकादशिनानाम् १२ ये चैवंदेवताः पशवः १३ १०

इन्द्रा नु पूषणेत्यैन्द्रापौष्णस्य १ सोमापूषणेति सोमापौष्णस्य २ सं वां कर्मणेत्यैन्द्रावैष्णवस्य ३ नासत्याभ्यामित्याश्विनस्य ४ विष्णोर्नु कमिति वैष्णवस्य ५ रात्रीति रात्र्याः ६ भूरिं द्वे इति द्यावापृथिवीयस्य ७ जनीयन्त इति तिस्रः स वावृधे दिव्यं सुपर्णं

यस्य व्रतं पशवो यन्ति सर्वे यस्य व्रतमुपतिष्ठन्त आपः
यस्य व्रते पुष्टिपतिर्निविष्टस्तं सरस्वन्तमवसे हुवेम

इति सारस्वतः ८ य इमा विश्वा भुवनानीति वैश्वकर्मणस्य चतुर्थीं परिहाप्य ९ आ ते पितरिति रौद्रस्य १० अहं रुद्रेभिरिति वाग्देवत्यस्य ११ तिस्रस्तिस्रः पूर्वाः पुरोनुवाक्या वपायाः पुरोलाशस्य पशोस्तिस्रस्तिस्र उत्तरा याज्याः १२ नैके पशुपुरोलाशं सवनीयस्य १३ कर्म तु न्यायः १४ सावित्रवाग्देवत्यौ चोपांशु १५ आवर्तते पशुगणे मनोता १६ परिव्ययणीयादि वपान्तं प्रातःसवने पशुकर्म कृत्वा निष्क्रम्य तथैवोपस्पृश्य चात्वाले १७ ११

ढिष्णयानुपस्थाय सदः प्रसर्पन्ति १ अग्रेण हविर्धाने तिष्ठन्तस्तंतमीक्षमाणाः २ सम्रालसि कृशानो रौद्रेणानीकेन पाहि मा अग्ने पिपृहि मा नमस्ते अस्तु मा

मा हिंसीरित्याहवनीयम् ३ रौद्रादिरुदर्कः ४ अनुदर्को वा ५ अपिजोऽसि दुवस्वानिति मथित्वानुप्रहृतम् ६ परिषद्योऽसि पवमान इत्यास्तवम् ७ प्रतक्वासि नभस्वानिति चात्वालम् ८ कव्योऽसि हव्यसूदन इति शामित्रम् ९ समुह्योऽसि विश्वभरा इत्युत्करम् १० दक्षिणावृतो विभूरसि प्रवाहण इत्याग्नीध्रम् ११ प्रपत्स्यमानाः सदश्चोपर्यभिमृशन्ति दिवस्पृष्ठमसि मा मा संताप्सीरिति १२ ऋतस्य द्वारौ मा मा संताप्तमिति द्वार्यौ संमृश्य । उत्तरेणाग्नीध्रीयं धिष्ण्यं गच्छन्ति ये प्रत्यञ्चो धिष्ण्यानतिक्रामन्ति १३ मलिम्लुचोऽसि सगर इत्यासादमच्छावाकस्य १४ वह्निरसि हव्यवाहन इति होतुर्धिष्ण्यम् १५ श्वात्रोऽसि प्रचेता इति मैत्रावरुणस्य १६ तुथोऽसि विश्ववेदा इति ब्राह्मणाच्छंसिनः १७ उशिगमि कविरसीति पोतुः १८ अवस्युरसि दुवस्वानिति नेष्टुः १९ अंहारिरसि बम्भारिरित्यच्छावाकस्य २० शुन्ध्युरसि मार्जालीय इत्यवेक्ष्य मार्जालीयम् २१ शुन्ध्युरत्युपसद्य इति ब्रह्मसदनम् २२ ऋतधामासि स्वर्ज्योतिरित्यौदुम्बरीम् २३ समुद्रोऽसि विश्वव्यचा इति सदोऽनुवीक्ष्य २४ अजोऽस्येकपादिति शालामुखीयम् २५ अहिरसि बुध्न्य इति प्राजहितम् २६ अन्नदास्यन्नपतिरिति व्रतश्रपणम् २७ १२

अग्नयः सगराः सगराः स्थ सगरेण नाम्ना रौद्रेणानीकेन पात माग्नयः पिपृत मा नमो वो अस्तु मा मा हिंमिष्टेति सर्वान् १ अध्वनो अधिपतिरसि स्वस्ति नो ऽद्यास्मिन्देवयाने पथि स्तादित्यादित्यमुपस्थाय मैत्रावरुणप्रभृतय उदञ्चो ऽच्छावाकं परिहाप्य पूर्वया द्वारा सदः प्रसर्पन्ति २ विश्वे देवा अनु मा प्रमर्पतेन्द्र त्रिधातु शरणं यत इन्द्र भयामहे सदसस्पतिमद्भुतमिति जपन्तो ऽग्रेणोत्तरेण सर्वान्धिष्ण्यान्गच्छन्ति ३ दक्षिणधिष्ण्योदक्षिणधिष्ण्यः पूर्वो गत्वा स्वस्यस्वस्य धिष्ण्यस्य पश्चादुपविशति ४ उत्तरेण सदो गत्वा ब्रह्मापरया द्वारा सदः प्रपद्य दक्षिणेन मैत्रावरुणं गत्वा यथासनमास्ते ५ नासंस्थिते सवनेऽपरया द्वारा निःसर्पन्ति ६ अन्तरेण होतुर्मैत्रावरुणस्य च धिष्ण्यावधिष्ण्यानां विसंस्थितसंचरः ७ उत्तरेण स्वंस्वं धिष्ण्यं धिष्ण्यवताम् ८ पश्चार्धेनाग्नीध्रीयस्योदञ्चः ९ मार्जालीयस्य वा दक्षिणा १० अव्यावर्तमानाश्च प्रत्यायन्ति ११ ऊर्ध्वं प्रातःसवनात्समस्तोपस्थानप्रभृतिना प्रसर्पन्ति १२ आदित्योपस्थानं रात्रिपर्यायेष्वाश्विने च न विद्यते न विद्यते १३ १३

इति शाङ्खायनश्रौतसूत्रे षष्ठोऽध्यायः समाप्तः

प्रसृप्य पुरोलाशैः सवनीयैश्चरन्ति १ धानावन्तमिति पुरोनुवाक्या २ होता यक्षदिन्द्रं हरिवाँ इत्यनुसवनं प्रैषो यथासमाम्नातम् ३ यथासवनं वितारयति ४ तेनैव यजत्युद्धृत्य होतायक्षं होतर्यजं च ५ अग्ने जुषस्व नो हविरिति स्विष्टकृतः पुरोनुवाक्या ६ होता यक्षदग्निं पुरोलाशानामित्यनुसवनं प्रैषः ७ हविरग्ने वीहीति च याज्या ८ १

ऐन्द्रवायवमैत्रावरुणावाश्विनश्च द्विदेवत्याः १ वायवा याहि दर्शतेन्द्रवायू इम इत्यैन्द्रवायवस्य पुरोनुवाक्ये २ होता यक्षद्वायुं होता यक्षदिन्द्रवायू इति प्रैषौ ३ अग्रं पिब शतेना न इति याज्ये ४ अयं वां मित्रावरुणेति मैत्रवरुणस्य पुरोनुवाक्या ५ होता यक्षन्मित्रावरुणेति प्रैषः ६ गृणाना जमदग्निनेति याज्या ७ प्रातर्युजेत्याश्विनस्य पुरोनुवाक्या ८ होता यक्षदश्विनेति प्रैषः ९ वावृधानेति याज्या १० अनवानं द्विदेवत्यानां पुरोनुवाक्याः प्रैषांश्चाह ११ तथा यजति १२ ऐन्द्रवायवस्य नानाप्रणवे पुरोनुवाक्ये १३ याज्ये नानावषट्कारे १४ सकृत्पुरस्ताज्जपो येयजामहोऽनुमन्त्रणश्च १५ २

ऐतु वसुः पुरूवसुरित्यैन्द्रवायवं प्रतिगृह्योरौ दक्षिणे निधायानपिधानमनवेक्षणं च द्विदेवत्यानामा शेषस्यावनयनात् १ ऐतुवसुर्विदद्वसुरिति मैत्रावरुणं प्रतिगृह्य दक्षिणेनैन्द्रवायवं हृत्वा दक्षिणतः पश्चान्निदधाति २ ऐतु वसुः संयद्वसुरित्याश्विनं प्रतिगृह्य दक्षिणेन पूर्वौ हृत्वोत्तरतःपश्चान्निदधाति ३ सोमस्याग्ने वीहीत्यनुवषट्कारः सर्वासु सोमयाज्यासु द्विदेवत्यर्तुयाजान्परि-हाप्यादित्यग्रहसावित्रग्रहौ पात्नीवतं च ४ उपांशु वा पात्नीवतस्य ५ ३ उन्नीयमानेभ्य इत्युक्त आ त्वा वहन्तु हरय इत्युन्नीयमानसूक्तम् १ होता यक्षदिन्द्रं प्रातः प्रातःसावस्येति प्रैषः २ इदं ते सोम्यं मध्विति यजति ३ नृचक्षसं त्वा नृचक्षाः प्रतीक्ष इति होतृचमसं प्रतीक्ष्य वयोधसं त्वा वयोधाः प्रतिगृह्णामीति प्रतिगृह्योरः संस्पर्शयति द्विदेवत्यांश्च ४ पुनरुन्नीतानां होत्रका यजन्ति ५ मित्रं वयमिति मैत्रावरुणः ६ इन्द्र त्वा वृषभमिति ब्राह्मणाच्छंसी ७ मरुतो यस्येति पोता ८ अग्ने पत्नीरिति नेष्टा ९ उक्षान्नायेत्याग्नीध्रः १० अयालग्नीदित्युक्तेऽयालित्याग्नीध्रः ११ स भद्रमकर्यो नः सोमं पाययिष्यतीति

होता १२ सोमं भक्षयिष्यन्तो याज्ञिकैर्नामधेयैरसा उपह्वयस्वेति कर्तारो ऽन्योऽन्यस्मिन्नुपहवमिच्छन्ते १३ वषट्कर्ता प्रथमो भक्षयति १४ प्रतिभक्षितं द्विदेवत्यशेषं नाराशंसवतां च ग्रहाणां होतृचमसेऽवनयति हुते त्वा भक्षितमवनयाम्यूर्जस्वन्तं देवेभ्य आयुष्मन्तं मह्यमिति १५ द्वैरैन्द्रवायव-शेषस्यावनयनं तत्राभ्यावर्तते मन्त्रः १६ अनवसर्जनं च द्विदेवत्यानामा शेषस्यावनयनात् १७ ४

इह वसुः पुरूवसुरित्यैन्द्रवायवमध्वर्यवे प्रगृह्योपहूतौ वायुरिन्द्रवायू सह प्राणेन सह वर्चसा तयोरहमुपहूतः सह प्राणेन सह वर्चसेति भक्षयित्वा प्रग्रहणमन्त्रेण पुनः प्रगृह्य भक्षमन्त्रेण पुनर्भक्षयति १ इह वसुर्विदद्वसुरिति मैत्रावरुणं प्रगृह्य २ उपहूतौ मित्रावरुणौ सह चक्षुषा सह वर्चसा तयोर-हमुपहूतः सह चक्षुषा सह वर्चसेति भक्षयित्वा ३ आश्विनं प्रदक्षिणं शिरः पर्याहृत्यावेक्ष्य प्रतिपर्याहृत्यावेक्ष्य ४ इह वसुः संयद्वसुरित्याश्विनं प्रगृह्य ५ उपहूतौ देवावश्विनौ सह श्रोत्रेण सह वर्चसा तयोरक्षमुपहूतः सह श्रोत्रेण सह वर्चसेति भक्षयित्वा ६ उपस्पृश्येलामुपह्वयते ७ उपोद्यच्छन्ति चमसान् ८ होतृचमसमन्वारभते ९ असंस्पर्शनं सर्वत्राज्यलेपेन सोमस्य १० उपहूय प्रस्थितान्भक्षयन्ति ११ तेजसे त्वा ब्रह्मवर्चसाय भक्षयामीति भक्षमन्त्रः प्रातःसवने १२ ओजसे त्वेन्द्रियाय भक्षयामीति माध्यन्दिने १३ प्रजायै त्वा पुष्ट्यै भक्षयामीति तृतीयसवने १४ शं नो भव हृद इत्युरोऽभिमर्शनी भक्षयित्वा १५ सव्ये पाणौ चमसान्कृत्वा दक्षिणेनाप्याययन्ति १६ आ प्यायस्व समेतु त इत्याप्यायनी प्रातः सवने १७ सं ते पयांसीत्युत्तरयोः १८ प्रस्थितानाप्याययन्ति १९ आज्ये मरुत्वतीये च २० आज्यपौगयोर्नाराशंसा निष्केवल्यमरुत्वतीययोर्वैश्वदेवे च २१ देवोऽसि नराशंसो यत्ते मेधः स्वर्ज्योतिस्तस्य त ऊमैः पितृभिर्भक्षितस्योपहूतस्योपहूतो भक्षयामीति भक्षमन्त्रः प्रातःसवने नाराशंसानाम् २२ ऊर्वैरिति माध्यन्दिने विकारः २३ काव्यैरिति तृतीयसवने २४ ५

अच्छावाकः सीदेत्युक्तोऽग्रेण मद उत्तरेण स्तुतिमुपविश्य पुरोलाशं प्रतिगृह्याच्छावाक वदस्वेत्युक्तोऽच्छा वो अग्निमवस इति तिस्रोऽन्वाह १ प्रणवान्निगदम् २ यजमान होतरध्वर्योऽग्नीद्ब्रह्मन्पोतर्नेष्टरुतोपवक्तरिषेषय-

ध्वमूर्जोर्जयध्वं नि वो जामयो जिहतां न्यजामयो नि सपत्ना यामनि बाधितासो जेषथाभीत्वरीं जेषथाभीत्वर्याः श्रवद्व इन्द्रः शृणवद्वो अग्निः प्रस्थायेन्द्राग्निभ्यां सोमं वोचतोपो अस्मान्ब्राह्मणान्ब्राह्मणा ह्वयध्वमिति ३ उपहवमयं ब्राह्मण इच्छतेऽच्छावाको वेत्यध्वर्युराह तं होतरुपह्वयस्वेति ४ तं होतोपह्वयते ५ प्रत्येता वामा सूक्तायं सुन्वन्यजमानो अग्रभीदुत प्रतिष्ठोतोपवक्त उत नो गाव उपहूता उतोपहूत इत्युपह्वास्यमानः ६ उत नो गाव उपहूता इत्यातोऽनुपह्वास्यमानः ७ अनुपहूतोऽच्छावाको निवर्तध्वमिति सूक्तस्य यावच्छक्नुयात्तावदनुद्रवेत् ८ होता वा प्रतिकामिनमच्छावाकं प्रत्युपहूय ९ ६

उन्नीयमानायेत्युक्तः प्रत्यस्मै पिपीषत इत्यच्छावाकः सूक्तमन्वाह १ प्रातर्यावभिरिति यजति २ भक्षिताप्यायितं चमसमध्वर्यवे प्रदाय दक्षिणावृदपरया द्वारा सदः प्रपद्य स्वस्य धिष्ण्यस्य पश्चादुपविश्य पुरोलाशं प्राश्नाति ३ पूर्वः प्रसृप्तश्चेदच्छावाकीयां कुर्यात्स्वेन विसंस्थितसंचरेण निष्क्रम्याच्छावाकस्य बहिष्कर्म कृत्वा स्वकर्म कुरुते ४ स्वे तु होता धिष्ण्ये ५ विकल्पो होत्रकाणां याज्यासु ६ प्रातःसवनेऽनवानन्तो यजन्त्यर्धर्चशो वा ७ अत्र व्रतयन्ति ८ ऊर्ध्वं चौपासनेभ्यः ९ ७

अथर्तुयाजैश्चरन्ति १ होता यक्षदिन्द्रं होत्रादित्यृतुप्रैषैरनवानं प्रेष्यति २ तथा यजति ३ येन प्रेष्यति सा याज्योद्धृत्य होतायक्षमसौयजं च ४ मैधातिथ्यो वेन्द्र सोमं पिब ऋतुनेति ५ योयः प्रैषान्ते श्रूयते सस यजति ६ होतरेतद्यजेत्यध्वर्युराह ७ गृहपतिश्च ८ तयोर्यजति ९ ययावषट्कृतं भक्षयन्ति १० द्विरन्ततो होता ११ लिम्पदिवैव जिघ्रदत्र द्विदेवथेषु चेति १२ ८

आज्यं शंसिय्यन्पिता मातरिश्वाच्छिद्रा पदोशिगसीयानुनक्षिषत्सोमो नीथविन्नीथानि नेषद्बृहस्पतिरुक्थामदानि शंसिषदिति जपित्वा शोंमावो३ इत्याहावः शस्त्रादौ प्रातःसवने तेनाहूयोपांशु तूष्णींशंसम् १ अग्निर्ज्योतिर्ज्योतिरग्निरित्यवसायेन्द्रो ज्योतिर्ज्योतिरिन्द्र इत्यवसाय सूर्यो ज्योतिर्ज्योतिः सूर्य इत्यवसाय पच्छोऽवस्यन्पुरोरुचम् २ अग्निर्देवेद्धः । अग्निर्मन्विद्धः । अग्निः सुसमित् । होता देववृतः । होता मनुवृतः । प्रणीर्यज्ञानाम् । रथीरध्वराणाम् । अनूर्तो होता । तूर्णिर्हव्यवाट् । आ देवो देवान्वक्षत् । यक्षदग्नि-

र्देवो देवान् । सो अध्वरा करति जातवेदो३ प्र वो देवायेत्याज्यम् ३ तस्य प्रथममर्धर्चं पच्छोऽनवानम् ४ मरुत्वतीयवैश्वदेवयोश्च ५ सूक्तशेषं शस्त्वाहूयोत्तमया परिधायोक्थवीर्यं जपति भा विभा उषाः स्वर्ज्योतिः श्लोकाय त्वोक्थमवाचीति ६ उक्थशा इत्यध्वर्युराह सर्वासु शस्त्रयाज्यासु ७ अग्न इन्द्रश्चेति यजति ८ ९

आज्ये संस्थिते स्तुवते १ स्तोत्रवतां शस्त्राणामेषेति प्राहोत्तमात्प्रवीहारा-दूर्ध्वमाहूय शंसन्ति २ प्रउगेऽन्तरेण माधुच्छन्दसांस्तृचानृचो व्यवयन्ति ताः पुरोरुच इत्याचक्षते ३ तासां पुरस्तादाहावः ४ परिधानीयायै च ५ षट्पदा वैश्वदेवी ६ तस्यां द्वाभ्यांद्वाभ्यामवसाय द्वाभ्यां प्रणौति ७ सारस्वत्यां विकल्पः । शंसेन्न वा । नित्यस्त्वाहावः ८

वायुरग्रेगा यज्ञप्रीः साकं गन्मनसा यज्ञम्
शिवो नियुद्भिः शिवाभिः
इति सकृच्छस्त्वा वायवा याहि दर्शतेति तिसृणां त्रिः प्रथमाम् ९

हिरण्यवर्तनी नरा देवा पती अभिष्टये
वायुश्चेन्द्रश्च सुमखौ
इन्द्रवायू इम इति तिस्रः १०

काव्ययोराजानेषु क्रत्वा दक्षस्य दुरोणे
रिशादसा सधस्थ आ
मित्रं हुव इति तिस्रः ११

दैव्यावध्वर्यू आ गतं रथेन सूर्यत्वचा
मध्वा यज्ञं समञ्जाथे
अश्विना यज्वरीरिष इति तिस्रः १२

इन्द्र उक्थेभिर्मन्दिष्ठो वाजानां च वाजपतिः
हरिवान् सुतानां सखा
इन्द्रा याहि चित्रभानो इति तिस्रः १३

विश्वान्देवान्हवामाहेऽस्मिन्यज्ञे सजोषसः
त इमं यज्ञमागमन्देवासो देव्या धिया
ये यज्ञस्य तनूकृतो विश्व आ सोमपीतये
ओमासश्चर्षणीधृत इति तिस्रः १४

वाचामहं देवीं वाचमस्मिन्यज्ञे सुपेशसम् । सरस्वतीं हवामहे ॥ पावका नः सरस्वतीति तिसृणामुत्तमया परिधायोक्थवीर्यं जपति वाचं मे जिन्व । प्राणं मे तृम्प । चक्षुर्मे पाहि । श्रोत्रं मेऽव । वर्णं मे यच्छ । तन्वं मे पाहि । यशो मे धेहि । घोषाय त्वोक्थमवाचीति १५ शिश्वेभिः सोम्यं मध्विति यजति १६ १०

तृचाः स्तोत्रियानुरूपाः प्रगाथान्परिहाप्य १ आ नो मित्रावरुणा नो गन्तमिति स्तोत्रियानुरूपौ मैत्रावरुणस्य २ प्र वो मित्रायेत्युक्थमुखम् ३ प्र मित्रयोरिति नवानामुत्तमया परिधायोप नः सुतमा गतमिति यजति ४ ११

आ याहि सुषुमेति ब्राह्मणाच्छंसिनः स्तोत्रियानुरूपौ १ शेषः सूक्तस्योक्थमुखमुत्तमे परिहाप्य २ इन्द्र त्वा वृषभम् ३ उद्धेदभौति तिसृणामुत्तमया परिधायेन्द्रक्रतुविदमिति यजति ४ १२

इन्द्राग्नी आ गतं सुतमित्यच्छावाकस्य स्तोत्रियानुरूपौ १ शेषः सूक्तस्योक्थमुखम् २ इहेन्द्राग्नी उप ह्वय इति पञ्च ३ इयं वामस्य मन्मन इति नवानामुत्तमया परिधायेन्द्राग्नी आ गतं सुतमितियजति ४ १३

मित्रं वयमिन्द्रमिद्गाथिन इन्द्रे अग्नेति स्तोत्रिया बृहत्पृष्ठस्य १ राथन्तरमच्छावाकः स्तोत्रियमनुरूपं कुरुते २ अनुरूपमुक्थमुखम् ३ चतुराहावा होत्रकाः ४ होता चातिरिक्तोक्थेषु ५ स्तोत्रियानुरूपाभ्यां यच्चानन्तरमनुरूपात्परिधानीयायै च ६ अनुरूपादनन्तरः प्रगाथस्तस्मादूर्ध्वं पञ्चमं मध्यन्दिने ७ उक्थमुखात्सर्वेषां रात्रौ ८ यदाध्वर्युराह प्रशास्तः प्रसुहीत्यों सर्पतेति प्रशास्त आह ९ दक्षिणावृतोऽपरया द्वारा निःसर्पन्त्युत्तरेणौदुम्बरीं दक्षिणेन ब्रह्मा १० अग्रेण शालामुदञ्चः ११ माध्यन्दिनाय सवनाय

यथानिःसृप्तं प्रसृप्य यथासनमुपविशन्ति १२ १४

आदौ माध्यन्दिनस्य सवनस्य राजानमभिषुणवन्ति १ ग्रावस्तुत्पूर्वया द्वारा हविर्धाने प्रपद्योत्तरस्य हविर्धानस्य दक्षिणं चक्रमग्रेण दक्षिणा तिष्ठन्सोमोपनहनेन मुखं परिवेष्ट्य ग्रावघोषं श्रुत्वासंप्रेषितोऽभिष्टौत्यमंत- न्वन्नर्धर्चशोऽनवानं वा २ अभि त्वा देव सवितर्युञ्जते मन उत युञ्जते धिय आ तू न इन्द्र क्षुमन्तमा नो भर दक्षिणेनोप क्रमस्वा भर ३ आ प्यायस्व समेतु त इत्याप्यायितवतीनां तिसृणां प्रथमामभिष्टुत्यार्बुदस्य द्वे ४ द्वितीयाम- भिष्टुत्यार्बुदस्य द्वे ५ तृतीयामभिष्टुत्यार्बुदस्यैकाम् ६ मृजन्ति त्वा दश क्षिप एतमु त्यं दश क्षिप एतं मृजन्ति मर्ज्यमिति मृष्टवतीरभिष्टुत्य ७ आ कलशा अनूषता कलशेषु धावति परि प्र सोम ते रस इति कलशवतीरभिष्टुत्य ८ आप्यायितवतीप्रभृत्येवं विहृतो द्वितीयोऽपि सवः । षष्ठीप्रभृतयः पञ्चार्बुदस्य ९ एवं विहृतस्तृतीयोऽपि सवः । तिस्रोऽर्बुदस्यैकादशीप्रभृतयः १० यस्मिन्सवे बृहच्छब्दं कुर्युर्बृहद्वदन्तीति तत्र ११ षष्ठीं प्रथमे १२ वितते पवित्रे पवित्रं त इति द्वे वि यत्पवित्रमित्येका १३ प्राम्य धाराः प्र धारा अस्य प्र ते धारा इति प्रक्षरन्तीषु धारासु १४ ग्रहेषु गृह्यमाणेषु याः कामयेत पावमानीनाम् १५ इन्द्रायेन्द्रो मरुत्वत इति तिस्रो नियच्छति १६ उत्तमे ग्रहे गृहीते ऽर्बुदस्योत्तमया परिधायादायोष्णीषमुत्सृज्यते १७ सत्राहीनानां त्वन्त्येऽहनि १८ अर्बुदं वा शुद्धमभिष्टुयात् १८ १५

माध्यन्दिनेन स्तुते पवमानेन दधिधर्मेण चरन्ति यदि प्रवर्ग्यवान् १ होत- र्वदस्वेत्युक्त उत्तिष्ठताव पश्यतेति प्रथमामभिष्टौति २ श्रातं हविरित्युक्ते द्वितीयां सूक्तस्य ३ दधिघर्मस्य यजेत्युक्तस्तृतीयया यजति ४ अनवानमेकैकां सप्रणवामभिष्टौति ५ तथा यजति ६ दधिघर्मस्याग्ने वीहीत्यनुवषट्कारः ७

मयि त्यदिन्द्रियं बृहन्मयि दक्षो मयि क्रतुः
घर्मस्त्रिशुग्विरोचत आकूत्या मनसा सह
विराजा ज्योतिषा सह तस्य दोहमशीमहि

इति भक्षमन्त्रः ८ पशुपुरोलाशेन चरित्वातः पुरोलाशैः सवनीयैश्चरन्ति ९ १६

माध्यन्दिनस्य सवनस्येति पुरोनुवाक्या १ माध्यन्दिने सवन इति स्विष्टकृतः २ असावि देवमित्युन्नीयमानसूक्तम् ३ होता यक्षदिन्द्रं माध्यन्दिनस्य सवनस्येति प्रैषः ४ पिबा सोममभि यमुग्रेति यजति ५ द्वितीया मैत्रावरुणस्य ६ तृतीया ब्राह्मणाच्छंसिनः ७ अर्वाङेहीति पोतुः ८ तवायं सोम इति नेष्टुः ९ इन्द्राय सोमाः प्रदिवो विदाना इत्यच्छावाकस्य १० आपूर्णो अस्येत्याग्नीध्रस्य ११ न द्विदेवत्यर्तुयाजा उत्तरयोः सवनयोः १२ न बहिष्कर्माच्छावाकस्य १३ समानमन्यत्प्रातःसवनेन १४ इलामुपहूय प्रस्थितान्भक्षयित्वा १५ एष दक्षिणाकालः १६ द्वादशं शतं गवां दद्यात् १७ एकविंशतिप्रभृति वा यथोपपादम् १८ १७

अग्नये त्वा मह्यं वरुणो ददातु सोऽमृतत्वमशीय । आयुर्दात्र एधि मयो मह्यं प्रतिगृह्णत इति हिरण्यं प्रतिगृह्णाति १ रुद्राय त्वा मह्यं वरुणो ददातु सोऽमृतत्वमशीय । गौर्दात्र एधि मयो मह्यं प्रतिगृह्णत इति गाः २ बृहस्पतये त्वा मह्यं वरुणो ददातु सोऽमृतत्वमशीय । त्वग्दात्र एधि मयो मह्यं प्रतिगृह्णत इति वासः ३ यमाय त्वा मह्यं वरुणो ददातु सोऽमृतत्वमशीय । हयो दात्र एधि मयो मह्यं प्रतिगृह्णत इत्येकशफम् ४ प्रजापतये त्वा मह्यं वरुणो ददातु सोऽमृतत्वमशीय । प्राणो दात्र एधि मयो मह्यं प्रतिगृह्णत इत्यन्यत् ५ ओमिति वा सर्वम् ६ कोऽदात्कस्मा अदादित्यनुमन्त्रयते प्राणि ७ उपस्पृशतीतरत् ८ अस्मद्राता मधुमतीर्देवत्रा गच्छत प्रदातारमा विशत इति दत्त्वा जपति ९ १८

इन्द्राय मरुत्वत इत्युक्तः १ इन्द्र मरुत्व इति पुरोनुवाक्या २ होता यक्षदिन्द्रं मरुत्वन्तमिति प्रैषः ३ सजोषा इन्द्र सगण इति यजति ४ तं भक्षयित्वा मरुत्वतीयं शंसति ५ अध्वर्यो शोंसावो३ इत्याहावः शस्त्रादौ माध्यन्दिने सवने ६ प्रातःसवनिकोऽन्तःशस्त्रम् ७ आ त्वा रथं यथोतय इति प्रातिपदं तृचं शस्त्वाहूय ८ इदं वसो सुतमन्ध इत्यनुचरं तृचं शस्त्वाहूय ९ इन्द्र नेदीय एदिहीतीन्द्रनिहवं प्रगाथं शस्त्वाहूय १० प्र नूनं ब्रह्मणस्पतिरिति ब्राह्मणस्पत्यं प्रगाथं शस्त्वाहूय ११ अग्निर्नेतेत्येकां शस्त्वाहूय १२ त्वं सोम क्रतुभिरित्येकां शस्त्वाहूय १३ पिन्वन्त्यप इत्येकां शस्त्वाहूय १४ जनिष्ठा

उग्र इति षट्छस्त्वाहूय निविदम् १५ मद्वानस्मिन्प्रथमः प्रतिगरः १६ एकया भूयसीः शस्त्वा विषमर्चानाम् १७ मध्ये समर्चानाम् १८ एकां शस्त्वा तृचानाम् १९ सूक्तविवृद्धावन्त्ये २० प्रथमे त्वाहावः २१ उत्तमाः परिशिष्य तृतीयसवने २२ वियतं पच्छो निविदः शंसति २३ उत्तमे प्रणवः पदे २४ सूक्तशेषं शस्त्वाहूयोत्तमया परिधायोक्थवीर्यं जपित्वा ये त्वाहिहत्य इति यजति २५ १९

रथन्तरं पृष्ठं निष्केवल्यस्य १ बृहद्वा २ अभि त्वा शूराभि त्वा पूर्वपीतय इति स्तोत्रियानुरूपौ प्रगाथौ रथन्तरस्य ३ त्वामिद्धि हवामहे त्वं ह्येहि चेरव इति बृहतः ४ यद्वावानेति धाय्या ५ पिबा सुतस्य रसिन इति प्रगाथो रथन्तरस्य ६ उभयं शृणवदिति बृहतः ७ इन्द्रस्य नु वीर्याणीति रथन्तरपृष्ठे ८ तमु ष्टुहीति बृहत्पृष्ठे ९ नितरां परिधानीयां शंसेत् १० उक्थवीर्यं जपित्वा पिबा सोममिन्द्र मन्दतु त्वेति यजति ११ २०

उभयसामिन् १ रथन्तरपृष्ठे यः सूक्तात्पूर्वः प्रगाथस्तमुद्धृत्य बृहतो योनिं शंसति २ बृहत्पृष्ठे रथन्तरस्य ३ ऊर्ध्वं सामप्रगाथादुत्तरासु संस्थासु ४ एतद्योन्यनुशंसनमित्याचक्षते ५ बृहद्रथन्तरयोरेवानुशंसेदिति ह स्माह कौषीतकिः ६ परिमितशस्यः प्राकृतोऽग्निष्टोमस्तस्मात्प्रगाथमुद्धरति ७ स्तोत्रियायाहावोऽनुरूपाय धाय्यायै प्रगाथाय सूक्ताय निविदे परिधानीयायै च ८ अश्वो निविद्वरो वरो वा ९ २१

वामदेव्यं मैत्रावरुणस्य १ कया नश्चित्रः कया त्वं न ऊत्येति स्तोत्रियानुरूपौ २ कस्तमिन्द्रेति सामप्रगाथः ३ सद्यो ह जातः ४ एवा त्वामिन्द्र वज्रिन्नत्र ५ उशन्नु षु ण इति यजति ६ २२

नौधसं ब्राह्मणाच्छंसिनो रथन्तरपृष्ठे १ श्यैतं बृहत्पृष्ठे २ तं वो दस्मं तत्त्वा यामि सुवीर्यमिति स्तोत्रियानुरूपौ प्रगाथौ नौधसस्य ३ अभि प्र वः प्र सु श्रुतमिति श्यैतस्य ४ उदु त्ये मधुमत्तमा इति सामप्रगाथः ५ इन्द्रः पूर्भिदिति नौधसे ६ असावि सोमः पुरुहूतेति श्यैते ७ उदु ब्रह्माणीति समानम् ८ ऋजीषी वज्रीति यजति ९ २३

कालेयमच्छावाकस्य १ तरोभिर्वस्तरणिरित्सिषासतीति स्तोत्रियानुरूपौ प्रगाथौ २ उदिन्वस्य रिच्यत इति सामप्रगाथः ३ भूय इद्वावृधे ४ इमामू षु ५ पिबा वर्धस्वेति यजति ६ २४

शस्त्रेषु १ प्रायेणायथासमाम्नातम् २ बृहती पूर्वा ककुब्वा सतोबृहत्युत्तरा तं प्रगाथ इत्याचक्षते ३ बार्हतो बृहत्यां पूर्वस्याम् ४ काकुभः ककुभि ५ बृहतीं शस्त्वोत्तमं पादं प्रत्यादायोत्तरस्याः प्रथमेनावसाय द्वितीयेन प्रणुत्य तं प्रत्यादाय तृतीयेनावसायोत्तमेन प्रणौति ६ तास्तिस्रो भवन्ति बृहती पूर्वोत्तरे ककुभौ ७ बृहद्रथन्तरयोः ८ होत्रकाणां च यत्रैते पृष्ठे प्रगाथस्थे ९ सर्वत्र यज्ञायज्ञीयस्य १० इन्द्रनिहवब्राह्मणस्पत्यानां च ११ अतोऽन्यत्र बार्हतानाम् १२ बृहतीं शस्त्वोत्तमं पादं द्विः प्रत्यादायावसायार्धर्चेनोत्तर-स्याः प्रणुत्य द्वितीयं पादं द्विः प्रत्यादायावसायोत्तमेनार्धर्चेन प्रणौति १३ तास्तिस्रो बृहत्यः १४ उत्तमं ककुभः प्रत्यादत्ते १४ सतोबृहत्या द्वितीयम् १५ तास्तिस्रः ककुभः १६ स्तोत्रियत्वादनुरूपत्वाद्वा २५ एतं धर्मं प्रगाथा लभन्ते १७ २५

इन्द्रनिहवोऽस्तोत्रियः १ ब्राह्मणस्पत्याश्च २ द्वाभ्यामवसायद्वाभ्यामवसायै-केन प्रणौति पङ्क्तीनाम् ३ पच्छस्त्रिष्टुब्जगतीनामक्षरपङ्क्तीनां द्विपदानां च ४ सप्रणवो द्वितीयश्च चतुर्थश्च ५ यास्तु पञ्चपदास्त्रैष्टुभे प्राये जागते वा यत्र पुनःपदं स्यात्तौ तत्र समस्येन्न पदेन पुनःपदस्य विप्रयोगोऽस्ति ६ उत्तमाव-पुनःपदे ७ द्वाभ्यामवसायद्वाभ्यामवसाय द्वाभ्यां प्रणौति षट्पदानां पुनःपदानाम् ८ द्वाभ्यामवसायापुनःपदानामेकेन प्रणौति द्वाभ्यामवसायैकेन ९ अष्टाक्षरस्तु प्रणवनीयः १० एकेनावसाय सप्तप्रदानां द्वाभ्यां प्रणौति द्वाभ्यामवसाय द्वा-भ्याम् ११ प्रथमेषु रात्रिपर्यायेषु गायत्राणां स्तोत्रियानुरूपाणां प्रथमान्पा-दानभ्यस्यन्ति १२ मध्यमान्मध्यमेषु १३ उत्तमानुत्तमेषु १४ अर्धर्चशो वा प्रातःसवनम् १५ स्तोत्रियानुरूपांश्च प्रगाथान्परिहाप्य १६ २६

त्रिपदा गायत्री १ उष्णिक् २ पुरौष्णिक् ३ ककुप् ४ विराट् च पूर्वा ५ चतुष्पदोत्तरा विराट् ६ बृहती ७ सतोबृहती ८ जगती ९ अनुष्टुप् १०

त्रिष्टुप् च ११ पञ्च पङ्क्तेः १२ षट्सप्तेत्यतिच्छन्दसाम् १३ स हि शर्धो न मारुतमित्यष्टौ १४ द्वौ द्विपदायाः १५ तेऽष्टाक्षराः प्रायेण १६ द्वादशाक्षरा जगत्याः १७ तृतीयौ चोष्णिग्बृहत्योः १८ सतोबृहत्याश्च प्रथमतृतीयौ १९ मध्यमः ककुभः २० प्रथमःपुरउष्णिहः २१ एकादशाक्षरास्त्रिष्टुब्बिराजोः २२ उत्तरस्या दशाक्षराः २३ तामक्षरपङ्क्तिरित्यप्याचक्षते २४ पञ्चभिः पञ्चाक्षरैः पदपङ्क्तिः २५ षलप्यष्टाक्षरा जगत्याः २६ एकेन द्वाभ्यामित्यूनके निचृत् २७ अतिरिक्ते भुरिक् २८ संपाद्यपादभागेनाहार्यस्यर्चः संमितास्तस्य पादभागेन संपन्नाः २९ गायत्र्युष्णिहावनुष्टुब्बृहत्यौ पङ्क्तिश्च त्रिष्टुब्जगत्यावि- त्यानुपूर्व्यं छन्दसां चतुर्विंशत्यक्षरादीनां चतुरुत्तराणां चतुरुत्तराणाम् ३० २७

इति शाङ्खायनश्रौतसूत्रे सप्तमोऽध्यायः समाप्तः

यथा मध्यन्दिनायैवमूर्ध्वं मध्यन्दिनात्प्रसर्पन्ति १ आदौ तृतीयसवनस्या- दित्यग्रहेण चरन्ति २ आदित्येभ्य इत्युक्तः ३ आदित्यानामवसेति पुरो- नुवाक्या ४ होता यक्षदादित्यानिति प्रैषः ५ आदित्यासो अदितिरिति यजति ६ नाहुतिमन्वीक्षते न भक्षयति ७ सावित्रग्रहे च ८ आर्भवेण स्तुते पवमानेन मनोतादीलान्तं पशुकर्म कृत्वातः पुरोलाशैः सवनीयैश्चरन्ति ९ १

तृतीये धानाः सवन इति पुरोनुवाक्या १ अग्ने तृतीये सवन इति स्विष्टकृतः २ इहोप यातेत्युन्नीयमानसूक्तम् ३ होता यक्षदिन्द्रं तृतीयस्य सवनस्येति प्रैषः ४ इन्द्र ऋभुभिर्वाजवद्भिरिति यजति ५ इन्द्रावरुणा सुतपाविति मैत्रावरुणः ६ इन्द्रश्च सोममिति ब्राह्मणाच्छंसी ७ आ वो वहन्त्विति पोता ८ अमेव न इति नेष्टा ९ इन्द्राविष्णू पिबतमित्यच्छावाकः १० इमं स्तोममित्याग्नीध्रः ११ समानमन्यत्प्रातःसवनेन १२ इलामुपहूय प्रस्थितान्भक्षयित्वा पुरोलाशस्य परिवापमिश्रस्य नाराशंसानां सन्नानां यथाचमसं दक्षिणतस्त्रींस्त्रीन्पिण्डा- नुपास्यन्त्यत्र पितरो मादयध्वं यथाभागं पितर आवृषायध्वमिति पिण्डेपिण्डे १३ २

देवाय सवित्र इत्युक्तः १ अभूद्देव इति पुरोनुवाक्या २ होता यक्षद्देवं सवि- तारमिति प्रैषः ३ दमूना देवः सविता वरेण्यो दधद्रत्नं दक्षपितृभ्य आयुनि ।

पिबात्सोमममदन्नेनमिष्टयः परिज्मा चिद्रमते अस्य धर्मणि ॥ इति यजति ४ अध्वर्यो शोशोंसावो ३ इत्याहावः शस्त्रादौ तृतीयसवने सोक्थे ५ प्रातः-सवनिकोऽन्तःशस्त्रम् ६ षोलशिप्रभृतौ च ७ तत्सवितुर्वृणीमहेऽद्या नो देव सवितरिति तृचौ प्रतिपदनुचरौ वैश्वदेवस्य ८ अभूद्देव इति सावित्रम् ९ एकया च दशभिश्च स्वभूते द्वाभ्यामिष्टये विंशती च । तिसृभिश्च वहसे त्रिंशता च नियुद्भिर्वायविह ता वि मुञ्चः १० प्र द्यावा यज्ञैः पृथिवी ऋतावृधेति द्यावापृथिवीयम् ११ मद्वानस्मिन्प्रतिगरः १२ सुरूपकृत्नुमित्येका १३ तक्षन्रथमित्यार्भवम् १४ अयं वेनो येभ्यो मातैवा पित्र इत्येकपातिन्यः १५ आ नो भद्रा इति वैश्वदेवस्योत्तमे शिष्ट्वा निविदम् १६ परिधानीयोत्तमा १७ पच्छो द्विरर्धर्चशस्तृतीयम् १८ उक्थवीर्यं जपित्वा विश्वे देवाः शृणुतेममिति यजति १९ ३

घृतस्य यजेत्युक्तो घृतं मिमिक्ष इत्युपांशु यजति १ सौम्यस्य यजेत्युक्तस्त्वं सोम पितृभिरिति यजति २ घृतस्य यजेत्युक्त उरु विष्णो वि क्रमस्वोरु क्षयाय नस्कृधि । घृतं घृतयोने पिब प्र प्र यज्ञपतिं तिर ॥ इत्युपांशु यजति ३ विकल्पः परीज्यायाम् ४ सौम्यं होतावेक्ष्याङ्गुलिभ्यां सर्पिरुपस्पृशति ५ चक्षुष्पा असि चक्षुर्मे पाहीति चक्षुषी विमार्ष्टि ६ ४

अग्नीत्पात्नीवतस्य यजेत्युक्त ऐभिरग्ने सरथमित्युपांशु यजति १ अभक्षयित्वा ग्रहमादाय पूर्वया द्वारा सदः प्रपद्य २ उत्तरतो नेष्टारमुपोपविश्य ३ उपस्थे वा ४ नेष्टरुपह्वयस्वेत्युक्त्वा ५ भक्षयित्वोपस्पृश्य ६ यथेतं प्रत्येत्य ७ ५

यज्ञायज्ञीयं स्तोत्रमाग्निमारुतस्य १ वैश्वानराय पृथुपाजस इति वैश्वानरीयम् २ आ ते पितरित्येका ३ प्रत्वक्षस इति मारुतम् ४ यज्ञा यज्ञा वो अग्नये देवो वो द्रविणोदा इति स्तोत्रियानुरूपौ प्रगाथौ यज्ञायज्ञीयस्य ५ प्र तव्य-सीमिति जातवेदसीयम् ६ आपोहिष्ठीयास्तिस्रः ७ उत नोऽहिर्बुध्न्यः शृणोत्वित्येका ८ देवानां पत्नीरिति द्वे ९ राकामहमिति द्वे १० अविद-द्दक्षमित्यक्षरपङ्क्तयस्तिस्रः ११ उदीरतामिति पैत्र्यस्तिस्रः १२ इमं यम मातली कव्यैरङ्गिरोभिरिति याम्यः १३ स्वादुष्किलीयास्तिस्रः १४ मद्वानासु प्रतिगरः १५ ययोरोजसा विष्णोर्नु कं तन्तुं तन्वन्नित्येकपातिन्यः १६ एवा न इन्द्रो

मघवेति परिधायोक्थवीर्यं जपित्वाग्ने मरुद्भिः शुभयद्भिरिति यजति १७ ६

प्रथमा निविन्मरुत्वतीयस्य १ द्वितीया निष्केवल्यस्य २ तृतीयाप्रभृतयो वैश्वदेवाग्निमारुतयोः ३ उत्तमा षोलशिनः ४ यावन्ति सूक्तानि तावत्यो निविदः ५ सूक्तस्यसूक्तस्याहावः पुरस्तात् ६ निविदोनिविदश्च ७ एकैकस्याश्चैकपातिन्याः ८ परिधानीयायै च ९ वैश्वदेवे प्रतिपदनुचरयोः १० आग्निमारुते स्तोत्रियानुरूपयोः ११ आपोहिष्ठीयानाम् १२ देवानां पत्नीनाम् १३ राकायाश्च १४ अक्षरपङ्क्तीनाम् १५ पैत्रीणाम् १६ यामीनाम् १७ स्वादुष्किलीयानां च १८ वियतं शस्त्रं वैश्वदेवस्य १९ अभ्यग्रमाग्निमारुतस्यापोहिष्ठीयाः परिहाप्य २० अप्सुसोमान्सादयित्वानुयाजादि शंय्वन्तं पशुकर्म कृत्वा २१ हारियोजनेन चरन्ति २२ ७

तिष्ठा सु कमिति पुरोनुवाक्या १ धानाः सोमानामिन्द्रेति प्रैषः २ युनज्मि त इति याज्या ३ धानाः सोमानामग्ने वीहीत्यनुवषट्कारः ४ सोमस्याग्न इति वा ५ अप्सु धूतस्य देव सोम ते मतिविदो नृभि ष्टुतस्तोत्रस्य शस्तोक्थस्येष्टयजुषो योऽश्वसनिर्गोसनिर्भक्षस्तस्य त उपहूतस्योपहूतो भक्षयामीति प्राणभक्षान्भक्षयित्वा धाना व्यादधते ६ भूयिष्ठा होता लिप्सेत ७ येन प्रातः सवने प्रसर्पन्ति तेन निःसर्पन्ति ८ यथा ह त्यद्वसव इति धिष्ण्याव्समीक्ष्याग्नीध्रीयमुत्तरेणाहवनीयमायन्ति ९ भूर्भुवः स्वः स्वाहा स त्वं नो अग्नेऽवमस्त्वं नो अग्ने वरुणस्य तदस्तु मित्रावरुणेत्याग्नीध्रीये प्रायश्चित्ताहुतीर्जुह्वति १० आपुरस्ता मा प्रजया पशुभिः पूरयतेत्याहवनीयस्य भस्मान्ते धाना न्युप्य ११ पञ्चपञ्च शकलानादधते १२ ८

आत्मकृतस्यैनसोऽवयजनममि मनुष्यकृतस्यैनसोऽवयजनमसि पितृकृतस्यैनसोऽवयजनमसि देवकृतस्यैनसोऽवयजनमसि यच्चाहमेनो विद्वांश्चकारयच्चाविद्वांस्तस्य सर्वस्यावयजनमसीति १ सव्यावृत उत्तरेणाहवनीयमप्सु सोमान्यथाचमसं पश्चादुपोपविश्य पवित्राण्यवधाय चेष्टयन्ते समापो अद्भिरग्मत समोषधयो रसेन । सं रेवतीर्जगतीभिः पृच्यन्तां सं मधुमतीर्मधुमतीभिः पृच्यन्तामिति २ समुपहूताः स्म इति ३ अप्सु धूतस्य देव सोम ते मतिविदो योऽश्वसनिर्गोसनिर्भक्षस्तस्य त उपहूतस्योपहूतो भक्षयामीति

प्राणभक्षान्भक्षयित्वा ४ अच्छायं वो ययोरोजसेति प्राचीर्निनीयोदीचीर्वा ५ समुद्रं व इत्यभिमन्त्र्य ६ शंनोदेवीयाभिश्रतसृभिरुरोऽभिमृश्य ७ समानं प्राणसंमर्शनं मुखविमार्जनं च ८ दक्षिणावृत आग्नीध्रीये दधि प्राश्य यथा दधिभक्षम् ९ पत्नीसंयाजान्संस्थाप्य हुतेषु समिष्टयजुःषु ९ अवभृथमवैति १०
पुनर्मामैत्विन्द्रियं पुनरात्मा द्रविणं ब्राह्मणं च ।
पुनरग्नयो धिष्णयासो यथा स्थानं धारयन्तामिहैव ।
इति यजमानो धिष्णयान्समीक्ष्यात्रानूबन्ध्योयां वा संस्थितायामृत्विजः समीक्षेत उभा कवी युवाना सत्यादा धर्मणा सत्यस्य धर्मणस्पती वि सख्यानि सृजामहै । इति १ उरुं हि राजेत्यनुसंयन् २ सर्वे साम्नो निधनमुपयन्ति ३ नमो वरुणायाभिष्ठितो वरुणस्य पाश इत्यप्सु पादमव धाय ४ १०

वारुणीष्टिः १ पौर्णमासीविकारः २ अप्स्वग्नेऽप्सु मे सोम इति वाप्सुमन्तौ ३ तिष्ठन्यजति ४ उदुत्तमं वरुणाव ते हेलः ५ स त्वं नो अग्नेऽवमस्त्वं नो अग्ने वरुणस्य विद्वानित्यग्नीवरुणावादिशति ६ न निगदमाह ७ ब्रूयाद्वा ८ अपबर्हिषः प्रयाजानुयाजान्यजति ९ प्रयाजादिरनुयाजान्ता १० स्विष्टकृदन्ता वा ११ आज्यभागौ वा परिहाप्यानुयाजौ च १२

येन स्त्रियावकुरुतं येनापामृशतं सुराम्
येना क्षामभ्यषिञ्चतं येनेमां पृथिवीं महीम्
यद्वां तदश्विना यशस्तेन मामभिषिञ्चतम्
इति होताभ्युक्षते १३

उपेच्छिवेन चक्षुषा गृहान्पैरैमि मानुषः
इत्यागच्छन्यजमानः १४

इहो सहस्रदक्षिणो अपि पूषा नि षीदतु
इत्युपविश्याहवनीये समिधावादधाति देवानां समिदसीति पूर्वां तूष्णीमुत्तराम् १५ तूष्णीं पत्नी गार्हपत्ये १६ ११

प्रायणीययोदयनीया व्याख्याता १ विपर्यासो याज्यापुरोनुवाक्यानां स्वि-

ष्टकृतः परिहाप्य २ पथ्यां स्वस्तिं चतुर्थीं यजति ३ तृतीयं सवितारम् ४ मैत्रावरुणी च वशानूबन्ध्या ५ पयस्या वा ६ आ वां मित्रावरुणा तत् सुवां मित्रावरुणा नो मित्रावरुणेति पुरोनुवाक्याः ७ युवं वस्त्राणि यद्बंहिष्ठं प्र बा-हवेति याज्याः ८ दीक्षणीयाप्रभृत्यानूबन्ध्यायाः संस्थानान्न वेदे पत्नीं वाचयति न स्तृणाति ९ अनूबन्ध्यायां वाचयित्वाग्रेणाग्नीध्रीयं धिष्ण्यं स्तृणाति १०
मापो मौषधीर्हिंसीः शुगसि यं द्विष्मस्तं ते शुगृच्छतु
धाम्नोधाम्नो राजंस्ततो वरुन नो मुञ्च
यदापो अघ्न्या इति वरुणेति शपामहे ततो वरुण नो मुञ्च

इति हृदयशूलमुपस्थाय सुमित्रिया न आप ओषधयः सन्त्वित्युपस्पृश्यदु-र्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्म इति दक्षिणा निरुक्षन्ति ११ आज्यभागप्रभृति वा पयस्या १२ अमावास्याविकारः १३ अनिगदेलान्ता १४ १२

उदङ्ङुदवसाय वैष्णव्यर्चा पूर्णाहुतिं हुत्वोदवसानीयया यजति १ आग्नेयीष्टिः २ पौर्णमासीविकारः ३ याः पुनराधेये ता हविषः स्विष्टकृतश्च ४ पञ्चकपाले पौनराधेयिकीष्टिः ५ संस्थितायां सायमग्निहोत्रं जुहोति ६ १३

मन्द्रया वाचा प्रातःसवनम् १ उच्चैस्तरामाज्यात्प्रउगम् २ मध्यमया माध्यन्दिनम् ३ उच्चैस्तरां मरुत्वत्तीयान्निष्केवल्यम् ४ उत्तमया तृतीयसवनम् ५ उच्चैस्तरां वैश्वदेवादाग्निमारुतम् ६ उत्तमया वा माध्यन्दिनम् ७ मन्द्रया तृतीयसवनम् ८ मध्यमया वा ९ १४

यस्मै प्रेष्यत्या तस्यापवर्गाद्वाचं यच्छति १ आहावप्रभृति चानुवषट्कारात् २ प्रातरनुवाके ब्रह्मा ३ भक्षयित्वा चा स्तोत्रप्रसवात् ४ प्रसवप्रभृति चानुवषट्कारात् ५ अतिप्रैषान्तं श्रुत्वा वसतीवरीणां परिहरणात् ६ यस्ते द्रप्सः स्कन्दति द्रप्सश्चस्कन्देति विप्रुषां होमः पुरस्तात्पवमानानाम् ७ सर्पतश्चानुसर्पति ८ मैत्रावरुणश्च ९ अग्निचित्यायां चाग्नौ प्रणीयमानेऽप्रतिरथं जपति १०

विश्वा आशा दक्षिणतः सर्वान्देवानयालिह
स्वाहाकृतस्य घर्मस्य मध्वः पिबतमश्विना

इति महावीरमनुसंयन् ११

अश्विना घर्मं पातं हार्द्वानमहर्दिवाभिरूतिभिः
तन्त्रायिणे नमो द्यावापृथिवीभ्याम्

इति वषट्कृते १२

अपातामश्विना घर्ममनु द्यावापृथिवी अमंसाताम्
इहैव रातयः सन्तु

इत्यनुवषट्कृते १३ समानमनिर्दिष्टम् १४ इति सोमे ब्रह्मकर्म १५ १५

इन्द्रो मरुत्वान्सोमस्य पिबतु । मरुत्स्तोत्रो मरुद्गणः । मरुद्वृधो मरुत्सखा । य ईमेनं देवा अन्वमदन् । अप्तूर्ये वृत्रतूर्ये । शम्बरहत्ये गविष्टौ । अर्चन्तं गुह्या पदा । परमस्यां परावति । वधीद्वृत्रं सृजदपः । मरुतामोजसा सह आदीं ब्रह्माणि वर्धयन् । अनाधृष्टान्योजसा । कृण्वन्देवेभ्यो दुवः । मरुद्भिः सखिभिः सह । इन्द्रो मरुत्वाँ इह श्रवदिह सोमस्य पिबतु । प्रेमां देवो देवहूतिमवतु देव्या धिया । प्रेदं ब्रह्म प्रेदं क्षत्रम् । प्रेमं सुन्वन्तं यजमानमवतु चित्रश्चित्राभिरूतिभिः । श्रवद्ब्रह्माण्यावसा गमत् १ अथोक्थवीर्यम् २ रूपमंनुरूपं प्रतिरूपं सुरूपमिहोपोयो भद्रमाशृण्वते त्वोक्थमवाचीन्द्रायेति ३ १६

इन्द्रो देवः सोमं पिबतु । एकजानां वीरतमः । भूरिजानां तवस्तमः । हर्यो स्थाता । पृश्नेः प्रेता । वज्रस्य भर्ता । पुरां भेत्ता । पुरां दर्मा । अपां नेता । सत्वनां नेता । निजघ्निर्दूरेश्रवाः । उपमातिकृद्दंमनावान् । इहोशन्देवो बभूवान् । इन्द्रो देव इह श्रवदिह सोमं पिबतु । प्रेमां देव इति समानम् १ अथोक्थवीर्यम् २ संरालसि स्वरालसि विरालसि राजा-

स्यभिभूरस्यभिभूयास्म वयं यं द्विष्मोऽपश्रृरावते त्वोक्थमवाचीन्द्रायेति ३ १७

सविता देवः सोमस्य मत्सत् । हिरगयपाणिः सुजिह्वः । सुबाहुः स्वङ्गुरिः । त्रिरहन्सत्यसवनः । यः प्रासुवद्वसुधिती । उभे जोष्ट्री स वीमनि । श्रेष्ठं सावित्रमासुवम् । दोग्ध्रीं धेनुम् । वोल्हारमनड्वाहम् । आशुं सप्तिम् । जिष्णुं रथेष्ठाम् । पुरधिं योषाम् । सभेयं युवानम् । सविता देवः परामीवां साविषत्पराघशसम् । इह श्रवदिह सोमस्य मत्सत् । प्रेमां देव इति समानम् १ १८

द्यावापृथिवी सोमस्य मत्सताम् । पिता च माता च । धेनुश्च ऋषभश्च । धन्या च धिषणा च । सुरेताश्च सुदुघा च । शंभूश्च मयोभूश्च । ऊर्जस्वती च पयस्वती च । द्यावापृथिवी इह श्रुतामिह सोमस्य मत्सताम् । प्रेमां दवी देवहूतिमवतां देव्या धिया । प्रेदं ब्रह्म प्रेदं क्षत्रम् । प्रेमं सुन्वन्तं यजमात्रमवताम् । चित्रे चित्राभिरूतिभिः । श्रुता ब्रह्मारयावसा गताम् १ १९

ऋभवो देवाः सोमस्य मत्सन् । विष्ट्वी स्वपसः । कर्मणा सुहस्ताः । धन्या धनिष्ठा । शम्या शमिष्ठाः । शच्या शचिष्ठाः । ये धेनुं विश्वजुवं शिश्व-रूपामतक्षन् । अवक्षन्धेनुमभवद्विश्वरूपी । अबुध्रन्सं कनीना मदन्तः । अयुञ्जत हरी अयुर्देवाँ उप । संवत्सरे स्वपसो यज्ञियं भागमायन् । ऋभवो देवा इह श्रवन्निह सोमस्य मत्सन् । प्रेमां देवा देवहूतिमवन्तु देव्या धिया । प्रेदं ब्रह्म प्रेदं क्षत्रम् । प्रेमं सुन्वन्तं यजमानमवन्तु । चित्राश्चित्राभिरूतिभिः । श्रवन्ब्रह्मारयावसा गमन् १ २०

शिश्वे देवाः सोमस्य मत्सन् । विश्वे वैश्वानराः । महि महान्तः । पक्वान्ना नेमतिथीवानः । आस्क्राः पचतवाहसः । ये द्यां च पृथिवीं चातुस्थुः । अपश्च स्वश्च । ब्रह्म च क्षत्रं च । बर्हिश्च वेदिं च । यज्ञं चोरु चान्तरिक्षम् । वातात्मानो अग्निदूताः । ये स्थ त्रय एकादशासः । त्रयश्च त्रिंशच्च । त्रयश्च त्री च शता । त्रयश्च त्री च सहस्रा । तावन्त उदरणे । तावन्तो निवेशने । तावतीः पत्नीः । तावतीर्ग्नाः । तावन्तोऽभिषाचः । तावन्तो रातिषाचः ।

अतो वा देवा भूयांस स्थ । मा वो देवा अविशसा मा विशसायुरा वृक्षि । विश्वे देवा इह श्रवन्निह सोमस्य मत्सन् । प्रेमां देवा इति समानम् १ अथोक्थवीर्यम् २ भूतमसि भविष्यदसि विभूतमसि प्रभूतमसि सदसि चक्षुरस्योजोऽसि भद्रमसि श्रुतायै त्वावाचीन्द्रायोक्थं देवेभ्यः ३ २१

अग्निर्वैश्वानरः सोमस्य मत्सत् । विश्वेषां देवानाम् समित् । अजस्रं दैव्यं ज्योतिः । यो विड्भ्यो मानुषीभ्यो दीदेत् । द्युषु पूर्वासु दिद्युतानः । अजर उषसामनीके । आ यो द्यां भात्या पृथिवीम् । आर्वन्तरिक्षम् । ज्योतिषा यज्ञियाय शर्म यंसत् । अग्निर्वैश्वानर इह श्रवदिह सोमस्य मत्सत् । प्रेमां देव इति समानम् १ २२

मरुतो देवाः सोमस्य मत्सन् । सुष्टुभः स्वर्काः । अर्कस्तुभो बृहद्वयमः । नभस्या वर्षनिर्णिजः । त्वेषासः पृश्निमातरः । शुभ्रा हिरण्यखादयः । तवसो भन्ददिष्टयः । शूरा अनाधृष्टरथाः । मरुतो देवा इह श्रवन्निह सोमस्य मत्सन् । प्रेमां देवा इति समानम् १ २३

अग्निर्जातवेदाः सोमस्य मत्सत् । स्वनीकश्चित्रभानुः । अप्रोषिवान् गृहपतिः । तिरस्तमांसि दर्शतः । घृताहवन ईड्यः । बहुलवर्मास्तृतयज्वा । प्रतीत्या शत्रूञ्जेतापराजितः । अग्ने जातवेदोऽभि द्युम्नमभि सह आयच्छस्व । स्तुशोऽस्तुशः । समेद्धारमंहसः पाहि । अग्निर्जातवेदा इह श्रवदिह सोमस्य मत्सत् । प्रेमां देव इति समानम् १ अथोक्थवीर्यम् २ तेजोऽसि धृष्टिरसि विधृष्टिरसि प्रधृष्टिरसि विधृतिरसि धरुणमसि धर्त्रमसि धर्योऽस्याश्रुत्यै त्वावाचीन्द्रायोक्थं देवेभ्यः ३ २४

अस्य मदे जरितरिन्द्रः सोमस्य मत्सत् । अस्य मदे जरितरिन्द्रोऽहिमहन् । अस्य मदे जरितरिन्द्रो वृत्रमहन् । अस्य मदे जरितरिन्द्र उद्द्यामस्तभ्नाद्‌प्रथयत्पृथिवीम् । अस्य मदे जरितरिन्द्रो व्यन्तरिक्षमतिरदा सूर्यं दिव्यैरयत् अस्य मदे जरितरिन्द्र उदार्यं वर्णमतिरदव दासं वर्णमहन् । अस्य मदे जरितरिन्द्रोऽपिन्वदपितोऽजिन्वदजुवः । अस्य मदे जरितरिन्द्र ऋष्याँ इव पम्फणतः पर्वतान्प्रकुपिताँ अरम्णात् । अस्य मदे जरितरिन्द्रोऽपां वेगमैरयत्

अस्य मदे जरितरिन्द्र इह श्रवदुप गिरि ष्ठात् । अस्य मदे जरितरिन्द्र इह श्रवदिह सोमस्य मत्सत् । प्रेमां देव इति समानम् १ अथोक्थवीर्यम् २ रोहोभ्यां रोहो ब्रध्नस्य विष्टपं स्वर्ग्या तनूर्नाक इति नाक इति ३ २५

इति शाङ्खायनश्रौतसूत्रेऽष्टमोऽध्यायः समाप्तः

पूर्वार्धः समाप्तः

व्याख्यातीऽग्निष्टोमः प्रकृतिर्द्वादशाहस्यैकाहानां च १ तस्य विकारं व्याख्यास्यामः २ श्रूयमाणं प्राकृतं नामधेयमन्यस्मिन्द्रव्ये प्रकृतिं निवर्तयति ३ प्रतिषेधः ४ अर्थः ५ परिसंख्या ६ उपजनो वा ७ आग्निमारुता-दूर्ध्वमागमात्त्रयाणां शस्त्राणामुक्थ्यो भवति ८ एकागमादूर्ध्वमुक्थ्येभ्यः षोलशी ९ त्रयोदशागमादूर्ध्वं षोलशिनोऽतिरात्रः १० अन्तरेणाग्निमारुत-मनुयाजांश्चैतेषां स्थानम् ११ १

साकमश्वं मैत्रावरुणस्य १ एह्यू षु ब्रवाणीति स्तोत्रियानुरूपौ २ चर्षणीधृतमस्तभ्नाद्द्यामिति तृचौ ३ इन्द्रावरुणा युवमध्वराय नः ४ आ वां राजानौ ५ इन्द्रावरुणा मधुमत्तमस्येति यजति ६ २

सौभरं ब्राह्मणाच्छंसिनः १ वयमु त्वामपूर्व्य यो न इन्दमिदमिति स्तोत्रियानुरूपौ प्रगाथौ २ प्र मंहिष्ठाय यो अद्रिभिदिति तृचौ ३ अस्तेव सु प्रतरमित्युत्तमामुद्धृत्योदप्रुत इति शस्त्वा या पूर्वस्योद्धृता तया परिधाय बृहस्पते युवमिन्द्रश्चेति यजति ४ ३

नार्मेधमच्छावाकस्य १ अधा हीन्द्रेति स्तोत्रियानुरूपौ २ ऋतुर्जनित्री ३ विष्णोर्नु कम् ४ प्र वः पान्तमन्धसः ५ सं वां कर्मणा ६ इन्द्राविष्णू मदपती मदानामिति यजति ७ ४

षोलशिने स्तोष्यमाणेषु

यस्माज्जातो न परो अन्यो अस्ति य आ बभूव भुवनानि विश्वा
प्रजापतिः प्रजया संरराणस्त्रीणि ज्योतींषि सचते स षोलशी

इति यजमानः षोलशिग्रहमुपतिष्ठते १

इन्द्र जुषस्व प्र वहा याहि शूर हरिह
पिबा सुतस्य मतिर्न मध्वश्चकानश्चारुर्मदाय

इन्द्र जठरं नव्यं न पृणस्व मधोर्दिवो न
अस्य सुतस्य स्वर्णोप त्वा मदाः सुवाचो अस्युः

इन्द्रस्तुराषाणिमत्रो न जघान वृत्रं यतिर्न
बिभेद वलं भृगुर्न ससाहे शत्रून्मदे सोमस्य

इति स्तोत्रियं शस्त्वा २ त्वावतः पुरूवसो ३ इत्येका ३ आ त्वा वहन्तु हरयः स्वादोरित्थेति गायत्रं तृचं पाङ्क्तं च विहरति ४ प्रथमेन गायत्रेण पादेन प्रथमं पाङ्क्तं पादं संधायावस्यति ५ द्वितीयेन गायत्रेण द्वितीयं संधाय प्रणौति ६ तृतीयेन गायत्रेण तृतीयं संधायावस्यति ७ द्वौ पङ्क्तेः परिशिष्टौ ताभ्यां प्रणौति ८ इन्द्राय साम गायता मन्द्रैरिन्द्र हरिभिरित्यौष्णिहं तृचं बार्हतं च विहरति ९ प्रथमेनौष्णिहेन पादेन प्रथमं बार्हतं पादं संधायावस्यति १० द्वितीयेनौष्णिहेन द्वितीयं संधाय प्रणौति ११ अष्टाक्षरमौष्णिहस्य पादस्याष्टाक्षरं बार्हतस्य ताभ्यामवस्यति १२ चतुरक्षरे शिष्टे ते समस्योत्तमं बार्हतं पादं संधाय प्रणौति १३ ५

आ धूर्षूरुं न इति द्विपदां च विंशत्यक्षरां त्रिषुभं च विहरति १ प्रथमेन द्वैपदेन पञ्चाक्षरेण प्रथमं त्रैष्टुभं पादं संधायावस्यति २ द्वितीयेन पञ्चाक्षरेण द्वितीयं संधाय प्रणौति ३ तृतीयेन पञ्चाक्षरेण तृतीयं संधायावस्यति ४ चतुर्थेन पञ्चाक्षरेण चतुर्थं संधाय प्रणौति ५

एष ब्रह्मा य ऋत्विय इन्द्रो नाम श्रुतो गृणे
विश्रुतयो यथा पथ इन्द्र त्वद्यन्ति रातयः
त्वामिच्छवसस्पते यन्ति गिरो नः संयतः
प्र ते मह इति द्वैपदं तृचं जागतं च विहरति ६

प्रथमेन द्वैपदेन चतुरक्षरेण प्रथमं जागतं पादं संधायावस्यति ७ द्वितीयेन चतुरक्षरेण द्वितीयं संधाय प्रणौति ८ तृतीयेन चतुरक्षरेण तृतीयं संधायावस्यति ९ चतुर्थेन चतुरक्षरेण चतुर्थं संधाय प्रणौति १० इन्द्रो दधीच इति तिसृणां गायत्रीणां द्वाभ्यामवसाय पादाभ्यां द्वाभ्यां प्रणौति द्वाभ्यामवसाय द्वाभ्याम् ११ उत्तमेन गायत्रेण पादेन प्रोष्वस्मै पुरोरथमित्येतस्याः पादं संधायावस्यति १२ द्वाभ्यां प्रणौति द्वाभ्यामवसाय द्वाभ्याम् १३ प्र प्र वस्त्रिष्टुभमति तृचम् १४ आ यत्पतन्तीत्येका १५ यो व्यतीनिति तिसृणामुत्तमां परिशिष्य निविदम् १६ स्तोत्रिये चाहावो निविदे पारधानीयायै च १७ उद्यद्ब्रध्नस्येति परिधायोक्थवीर्यं जपित्वापाः पूर्वेषामिति यजति १८ एतस्मिन्स्तोत्रिये चत्वारिंशत्संपदानुष्टुभः १९ विक्रियमाणे यथासमाम्नातम् २०

इन्द्रश्च संराड्वरुणश्च राजा तौ ते भक्षं चक्रतुरग्र एतम्
तयोरहं भक्षमनुभक्षयामि वाग्देवी जुषाणा सोमस्य तृप्यतु

इति ग्रहं भक्षयति २१ ६

पान्तमा वो अन्धम इति स्तोत्रियानुरूपौ होतुः प्रथमेषु रात्रिपर्यायेषु १ न प्रथमस्य प्रथममाम्रेलयति २ शेषः सूक्तस्योक्थमुखम् ३ अभि त्वं मेषमिति जागतम् ४ अध्वर्यवो भरतेन्द्रायेति यजति ५ ७

प्र व इन्द्राय मादनं प्रकृतानीति मैत्रावरुणस्य १ सुरूपकृत्नुमित्युक्थमुखम् २ त्यं सु मेषमिति जागतस्य नवमीं चोत्तमां चोद्धृत्य चतुर्दशीं पूर्वां शस्त्वा त्रयोदश्या परिधाय पाता सुतामन्द्रो अस्तु सोमं हन्ता वृत्रमिति यजति ३ ८

वयमु त्वा तदिदर्था वयमु त्वा दिवा सुत इति ब्राह्मणाच्छंसिनः १ इन्द्र त्वा वृषभमित्युकामिखम् २ वार्त्रहत्याय शवस इति वोत्तमामुद्धृत्य ३ न्यू षु वाचमिति जागतम् ४ वृषा मद इन्द्र इति यजति ५ ९

इन्द्राय मद्वने सुतमिन्द्रमिद्गाथिनो बृहदित्यच्छावाकस्य १ शेषः सूक्तस्योक्थ-मुखम् २ मा नो अस्मिन्निति जागतम् ३ इदं त्यत्पात्रमिति यजति ४ १०

अयं त इन्द्र सोमोऽयं ते मानुषे जन इति स्तोत्रियानुरूपौ होतुर्मध्यमेषु रात्रिपर्यायेषु १ उद्धेदभीत्युक्थमुखमुत्तमामुद्धृत्य २ अहं भुवमिति जागतम् ३ अपाय्यस्येति यजति ४ ११

आ तू न इन्द्र द्युमन्तमा तू न इन्द्र वृत्रहन्निति मैत्रावरुणस्य १ एन्द्र सानसिमित्युक्थमुखम् २ प्र वः सतामिति जागतम् ३ अस्य मदे पुरु वर्पांसीति यजति ४ १२

अभि त्वा वृषभाभि प्र गोपतिमिति ब्राह्मणाच्छंसिनः १ आ तू न इन्द्र मद्र्यगित्युक्थमुखम् २ तदस्मै नव्यमिति जागतम् ३ यस्ते रथ इति यजति ४ १३

इदं वसो सुतमिन्द्रेहि मत्सीत्यच्छावाकस्य १ शेषः सूक्तस्योक्थमुखम् २ अजातशत्रुमिति जागतस्योत्तमामुद्धृत्योद्यत्सह इति परिधायेदं ते पात्रं सनवित्तमिन्द्रेति यजति ३ १४

इदं ह्यन्वोजसा महाँ इन्द्रो य ओजसेति स्तोत्रियानुरूपौ होतुरुत्तमेषु रात्रिपर्यायेषु १ शेषः सूक्तस्योक्थमुखमुत्तमास्तिस्र उद्धृत्य २ विश्वजित इति जागतम् ३ तिष्ठा हरी इति यजति ४ १५

आ त्वेता नि षोदता त्वशत्रवा गहीति मैत्रावरुणस्य १ यस्य संस्थ इति सप्तोक्थमुखम् २ अहं दां गृणत इति जागतम् ३ प्र घा न्वस्येति यजति ४ १६

योगेयोगे युञ्जन्ति ब्रध्नमिति ब्राह्मणाच्छंसिनः १ शेषः सूक्तस्योक्थमुखम् २ इमां ते धियमिति जागतस्योत्तमामुद्धृत्य तदस्येदं पश्यतेति परिधाय प्रो द्रोण इति यजति ३ १७

इन्द्रः सुतेषु सोमेष्विन्द्रं वर्धन्त्वित्यच्छावाकस्य १ उत्तमानि चतुरक्षराण्यभ्यस्यन्ति २ उप नः सुतमा गहि सोममिन्द्रेत्युक्थमुखम् ३ प्र ते मह इति जागतम् ४ प्रोग्रां पीतिमिति यजति ५ १८

अथाच्छावाकस्याहीनिक्याः १ पन्यंपन्यमित्सोतारः पन्य इदुप गायतेति स्तोत्रियानुरूपौ प्रथमे २ आ त्वा विशन्त्विन्दव आ त्वा विशन्त्वाशव इत्युत्तमे ३ संस्थाप्य रात्रिपर्यायान् ४ आश्विनाय स्तोष्यमाणेषु प्रवृताहुती जुहोति ५ १९

समया वाचा शंसेत् १ उत्तरोत्तरिणया वा २ यः प्रातरनुवाकस्तदाश्विनम् ३ तस्य विकारं व्याख्यास्यामः ४ यथाछन्दसं शस्त्रम् ५ बार्हतीनां प्रतिपदां प्रथमंप्रथमं प्रगाथं पुनरादायं ककुप्कारम् ६ अग्निर्होता गृहपतिरिति प्रतिपदापोरेवतीमुद्धृत्य ७ चतुर्दश गायत्रादुद्धरति ८ आनुष्टुभाद्द्वे ९ त्रैष्टुभात्त्रयोदशं शतम् १० नित्यानि काक्षीवतान्यागस्त्यानि च ११ प्रथमं तु काक्षीवतं शस्त्वा काराधद्धोत्रिया नव १२ ऊर्ध्वमागस्त्येभ्यस्त्रिशतं सुपर्णम् १३ अन्यासां वाश्विनीनां तावत् १४ समिद्धश्चिदिति तिस्र उद्धरति १५ अयं वां मधुमत्तम इत्यष्टौ यथास्थानम् १६ एकादशौष्णिहात् १७ तथाग्नेयाज्ञागतात् १८ उत्तमेन पाङ्क्तेन पादेनोदयं काङ्क्षेत् १९ उदिते सौर्याणि २० उदु त्यं जातवेदसमिति नव २१ चित्रं देवानाम् २२ नमो मित्रस्य २३ इन्द्र क्रतुमिति प्रगाथः २४ मही द्यौरिति तिस्रः २५ विश्वस्य देवी मृशयस्य जन्मनो न या रोषाति न ग्रभ इति द्विपदा २६ बृहस्पते अति यदर्यो अर्हादिति परिदधाति २७ प्रांतपदे चाहावः परिधानीयायै च २८ तत्संपदा बृहतीसहस्रं संपद्यते २९ इमे सोमासस्तिरोअह्न्यास इति पुरोनुवाक्या ३० होता यक्षदश्विना सोमानां तिरोअह्न्यानामिति प्रैषः ३१ उभा पिबतं प्र वामंधांसीत्यध्यर्धां संधायार्धर्चेन वषट्करोति ३२ विराजैवेति कौषीतकिः ३३ अश्विना वायुनेति वा ३४ २०

त्रिवृद्बहिष्पवमानः १ सन्धिषाम च २ पञ्चादितः पञ्चदशानि ३ रात्रिश्च ४ पञ्च सप्तदशानि ५ पञ्चैकविंशानि ६ इति ज्योतिषः स्तोमाः ७ एत एवाभिप्लवस्य ८ २१

अग्निं तु चेष्यमाणस्यादीक्षितस्येष्टिः १ अग्नये ब्रह्मण्वतेऽग्नये क्षत्रवतेऽग्नये क्षत्रभृते २ पौर्णमासीविकारः ३ ब्रह्म प्रजावदा भर ब्रह्म च ते जातवेद इ-त्यग्नये ब्रह्मण्वते ४ अर्चन्तस्त्वास्माकमग्ने अध्वरमग्ने द्युम्नन स्वदस्व हव्येत्य-ुत्तरयोः ५ बहूनां चेष्यमाणानां संनिवपनीया ६ एकस्योखासंभरणीया ७ २२

प्राजापत्यश्च पशुबन्धः १ वायव्यो वा २ अग्नये वा कामाय ३ पुरुषोऽजोऽविको गौरश्च इति पञ्च पशवः ४ अजो वा तूपरः ५ प्राजापत्ये चैके वायव्यं पशुपुरोलाशं कुर्वन्ति ६ प्राजापत्यं वायव्ये ७ वैश्वानरीयमाग्नेये ८ हिरण्यगर्भ इति पुरोनुवाक्यास्तिस्र उत्तरा याज्याः प्राजापत्यस्य ९ उपांशु १० एकया च राये नु कुविदङ्गेति पुरोनुवाक्याः पीवोअन्नान्प्र याभिर्यासि प्र वायुमच्छति वायव्यस्य ११ आ ते वत्सो मनो यमत्तुभ्यं ता अङ्गिरस्तमाग्निः परेषु धामस्विति पुरोनुवाक्या वयं ते अद्याश्याम तमीले च त्वेत्याग्नेयस्य १२ बहुवत्पशुनिगमाः पञ्चसु क्रियमाणेषु पृथिवीं शरीराणीत्यातः १३ एकवदत ऊर्ध्वम् १४ २३

त्रिहविश्च दीक्षणीया १ आग्नावैष्णवो वैश्वानरीय आदित्येभ्यश्च २ त्यान्नु क्षत्रियान्धारयन्तः ३ पञ्चहविर्वा ४ अदितये चतुर्थः पञ्चमः सरस्वत्यै ५ पञ्चहविर्वातिथ्या ६ आग्नेयैन्द्रौ वैश्वदेवबार्हस्पत्यौ वैष्णवश्च ७ शुचिमर्कैस्तं शग्मासः ८ चितिभ्यः प्रणीयमानाभ्य इत्युक्तः पुरीष्यासः प्रो त्ये अग्नयोऽग्निषु विश्वेभिरग्ने अग्निभिरग्ने विश्वेभिरग्निभिरित्युपांश्वनुब्रुवन्पश्चादनुसमेति ९ २४

संचिते परिष्टुतेऽग्न्युक्थमनुशंसेत्युक्तश्चित्यस्य पश्चादुपविश्याज्येयस्तूष्णीं-शंसस्तेनानाहूय सजपेनानुशंसति १ वैश्वानरायेत्युक्तः पुरोनुवाक्यामनूच्य याज्यया यजति प्रयाजानुयाजान्वा परिहाप्य २ २५

अग्नीषोमीयस्य पशुपुरोलाशमन्वञ्चि देवसूभ्यो हवींषि १ अग्नये गृहपतये सोमाय वनस्पतये सवित्रे सत्यप्रसवाय रुद्राय पशुपतये बृहस्पतये वाचस्पतय इन्द्राय ज्येष्ठाय मित्राय सत्याय वरुणाय धर्मपतये २ अग्निर्होता गृहपतिर्हव्य-वालग्निरा विश्वदेवं न प्रमिय इन्द्रं वयं महाधन उरुं नः ३ सर्वपृष्ठाहवींषि च ४ २६

अग्नये वासन्तिकाय गायत्राय त्रिवृते राथन्तरायेन्द्राय ग्रैष्माय त्रैष्टुभाय पञ्चदशाय बार्हताय विश्वेभ्यो देवेभ्यो वार्षिकेभ्यो जागतेभ्यः सप्तदशेभ्यो वैरूपेभ्यो मित्रावरुणाभ्यां शारदाभ्यामानुष्टुभाभ्यामेकविंशाभ्यां वैराजाभ्यां बृहस्पतये हैमन्तिकाय पाङ्क्ताय त्रिणवाय शाक्वराय सवित्रे शैशिरायाति-

च्छन्दसाय त्रयस्त्रिंशाय रैवतायानुमतयेऽग्नये वैश्वानराय कायादितये विष्णु-
पत्न्यै १ अर्चन्तस्त्वास्माकमग्ने अध्वरमृतेन यौ प्र बाहवा बृहस्पते जुषस्वैवा
पित्रेऽनागसो वाममद्य

अन्वद्य नो अनुमतिर्यज्ञं देवेषु मन्यताम्
अग्निश्च हव्यवाहनो भवतं दाशुषे मयः

अन्विदनुमते त्वं मन्यासै शं च नस्कृधि
क्रत्वे दक्षाय नो हिनु प्र ण आयूंषि तारिषः

इति २ न पशुतन्त्रे हवींषि चोद्यमानानि निगमान्लभन्ते ३ वपां संस्था-
प्यानूबन्ध्यायास्त्वाष्ट्रेण पशुनोपांशु पत्नीशाले चरन्ति ४ पर्यग्निकृतमुत्सृजन्ति
न संस्थापयन्ति ५ आज्येन वा पशुधर्मणा संस्थापयन्ति ६ शिवस्त्वष्टः
प्रथमभाजम् ७ २७

देविकाहवींषि चान्वञ्चि पशुपुरोलाशम् १ अनुमत्यै कुह्वै राकासिनीवा-
लीभ्यां धात्रे २

कुहूमहं सुवृतं विद्मनापसमस्मिन्यज्ञे सुहवां जोहवीमि
सा नो ददातु श्रवणं पितृणां तस्यै ते देवि हविषा विधेम

कुहूर्देवानाममृतस्य पत्नीर्हव्या नो अस्य हविषः कृणोतु
सं दाशुषे किरतु भूरि वामं रायस्पोषं चिकितुषे ददातु

धाता ददातु दाशुषे प्राचीं जीवातुमक्षितिम्
वयं देवस्य धीमहि सुमतिं सत्यधर्मणः

धाता प्रजाया उत राय ईशे धातेदं विश्वं भुवनं जजान
धाता पुत्रं यजमानाय दाता तस्मा उ हव्यं घृतवज्जुहोत

इति ३ देवीभ्यश्च हवींषि ४ अद्भ्य ओषधीभ्यो गोभ्य उषसे रात्रये सूर्यायै

दिवे पृथिव्यै वाचे गवे ५ आपो हि ष्ठ यो वो वृताभ्यः ६ या ओषधीः पूर्वा अति विश्वाः ७ यूयं गावो न ता अर्वा ८ प्रति ष्या सूनरी सत्या सत्येभिः ९ रात्री व्यख्यत् । ये ते रात्रि नृचक्षसो युक्तासो नवतिर्नव । अशीतिः सन्त्वष्टा उतो ते सप्त सप्रतिः १० द्वे ते सुकिंशुकं ११ एन्द्र याहि हरिभिः सखे विष्णो १२ स्योना पृथिवि बलित्था पर्वतानां १३ देवीं वाचं यद्वाग्वदन्ती १४ माता रुद्राणां वचोविदम् १५ दिशां चावेष्टीः १६ अग्नय इन्द्राय मित्रावरुणाभ्यां बृहस्पतये विश्वेभ्यो देवेभ्यो विष्णवे १७ संस्थितायां चोदवमानीयायां मैत्रावरुण्या पयस्यया नानिष्ट्वाग्निचिन्मैथुनं चरेच्चरेत् १८ २८

इति शाङ्खायनसूत्रे नवमोऽध्यायः समाप्तः

शुद्धपक्षस्याष्टम्यां द्वादशाहाय दीक्षन्ते १ द्वादश दीक्षाः २ द्वादशोपसदः ३ सुत्यान्यहानि द्वादश ४ अतिरात्रः सुत्यानां प्रथमं चोत्तमं च ५ मध्ये दशरात्रः ६ पृष्ठ्यः षलहः ७ त्रयश्छन्दोमाः ८ दशममहः ९ अयं यज्ञ इति याज्या हारियोजनस्य १० अननुवषट्कृत एवासंप्रेषितो मैत्रावरुणः परा याहि मघवन्नित्यनूच्य जायेदस्तमिति वेह मद एव मघवन्नित्यतिप्रैषमाह द्वितीयप्रभृतिषु ११ प्रायणीये वा यथासमाम्नातम् १२ श्वः सुत्या वामिंद्राग्नी तां वां प्रब्रवीमि विश्वेभ्यो देवेभ्यो ब्राह्मणेभ्यः सोम्येभ्यः सोमपेभ्यो ब्रह्मन्वाचं यच्छेत्याग्नीध्रः स्वस्य धिष्ण्यस्य पश्चादुपविश्य १३ नित्यमेतत्प्रागुत्तमादह्नः १४ पत्नीसंयाजान्तता १५ आशिषामनिर्वचनम् १६ नामधेयाग्रहणं च १७ प्रायणीयोदयनीययोः सारस्वतः १८ माधुच्छन्दसे वा १९ द्विरात्रप्रभृतिष्वहः-संघातेषु यत्र होताश्विनं शंसेत्तत्र मैत्रावरुणः प्रातरनुवाकमनुब्रूयात् २० १

त्रिवृत्स्तोमं रथन्तरपृष्ठमग्निष्टोमः प्रथमं दाशरात्रिकम् १ उप प्रयन्तो अध्वरमित्याज्यं व्यूल्हे प्र वो देवायेति समूल्हे २ माधुच्छन्दसः प्रउगः ३ आ यात्विन्द्रोऽवस इति मरुत्वतीयम् ४ आ न इन्द्रो दूरादिति निष्केवल्यम् ५ अग्ने वर्चस्विन्वर्चस्वी त्वं देवेष्वसि वर्चस्व्यहं मनुष्येषु भूयासमित्यतिग्राह्यं भक्षयति ६ युञ्जते मन इहेह वो हयो न विद्वानित्युत्तमे वा परिहाप्येति वैश्वदेवे विकारः ७ पञ्चजनीया परिधानीया सर्वत्र वैश्वदेवस्य ८ प्र शर्धायेत्याग्निमारुते ९ सप्तात ऊर्ध्वमुक्थ्यानि १० षोलश्यन्तं चतुर्थम् ११ २

पञ्चदशस्तोमं बृहत्पृष्ठं द्वितीयं १ अग्निं दूतं वृणीमह इत्याज्यं व्यूल्हे २ त्वं हि क्षैतवदिति समूल्हे सर्वत्रोत्तमां परिहाप्य ३ गार्त्समदः प्रउगः ४ वायो ये ते सहस्रिण इति द्वे तीव्राः सोमास आ गहीत्येका शुक्रस्याद्येत्येकोभा देवा दिविस्पृशेति द्वे अयं वां मित्रावरुणेति चत्वारि तृचान्युत स्या नः सरस्वती घोरेति प्रउगतृचानि ५ विश्वानरस्य व इन्द्र इत्सोमपा इति मरुत्वतीयस्य प्रतिपदनुचरौ ६ उत्तिष्ठ ब्रह्मणस्पत इति ब्राह्मणस्पत्यः प्रगाथः ७ इन्द्र सोमं सोमपत इति मरुत्वतीयम् ८ या त ऊतिरिति निष्केवल्यम् ९ इन्द्रौजस्विन्नोजस्वी त्वं देवेष्वस्योजस्व्यहं मनुष्येषु भूयासमित्यतिग्राह्यं भक्षयति १० विश्वो देवस्येति वैश्वदेवस्य प्रतिपत् ११ अस्य हि स्वयशस्तर-मित्युत्तरे १२ आ विश्वदेवमित्यनुचरः १३ तद्देवस्य ते हि द्यावापृथिवी यज्ञस्य व इति वैश्वदेवे विकारः १४ पृक्षस्य वृष्णो वृष्णे शर्धाय नू चित्सहोजा इत्याग्निमारुते १५ ३

सप्तदशस्तोमं वैरूपपृष्ठं तृतीयम् १ युक्ष्वा हि देवहूतमानित्याज्यं व्यूल्हे २ त्वमग्ने वसूनिति समूल्हे सर्वत्रोत्तमां परिहाप्य ३ औष्णिह आत्रेयः प्रउगः ४ वायवा याहि वीतय इत्येका वायो याहि शिवेति द्वे इन्द्रश्च वायवेषां सुतानामिति द्वे अयं सोमश्चमूसुत इत्येका मित्रे वरुणेऽश्विनावहे गच्छतमा याह्यद्रिभिः सजूर्विश्वेभिर्देवेभिरुत नः प्रियेति प्रउगतृचानि ५ तं तमित्त्रय इन्द्रस्य सोमा इति मरुत्वतीयस्य प्रतिपदनुचरौ ६ प्रैतु ब्रह्मणस्पतिरिति ब्राह्मणस्पत्यः प्रगाथः ७ त्र्यर्यमेति मरुत्वतीयम् ८ यद्द्याव इन्द्र यदिन्द्र यावत इति वैरूपस्य स्तोत्रियानुरूपौ प्रगाथौ ९ इन्द्र त्रिधात्विति सामप्रगाथः १० अहं भुवं यो जात इति निष्केवल्यम् ११ सूर्य भ्राजस्विन्भ्राजस्वी त्वं देवेष्वसि भ्राजस्व्यहं मनुष्येषु भूयासमित्यतिग्राह्यं भक्षयति १२ अभि त्वा देवेत्यनुचरः १३ उदु ष्य देवः सविता हिरण्यया घृतवती भुवनानामिति तृचावनश्वो जातः परावत इति वैश्वदेवे विकारः १४ वैश्वानराय धिषणां धारावरास्त्वमग्ने प्रथमो अङ्गिरा ऋषिरित्याग्निमारुते १५ ४

एकविशस्तोमं वैराजपृष्ठं चतुर्थम् १ आग्निं न स्ववृक्तिभिरित्याज्यं व्यूल्हे ऽग्निं नर इति समूल्हे २ आनुष्टुभः प्रउगः ३ वायो शुक्रो अयामि त इत्येका

वि हि होत्रा इति द्वे इन्द्रश्च वायवेषां सोमानां यश्चिकेता नो विश्वाभिरूतिभिरा त्वा गिरोऽपत्यमित्येका यूयं हि ष्ठेति द्वे इयमददादिति प्रउगतृचानि ४ प्रणो देवीति समूल्हे ५ तं त्वा यज्ञेभिरिति प्रतिपन्मरुत्वतीयस्य ६ ये त्र्यहस्य प्रथमस्य त उत्तरस्यानुचराः सब्राह्मणस्पत्याः ७ श्रुधी इवमिन्द्रेन्द्र मरुत्व इमं नु मायिनमिति तृचाविति मरुत्वतीयम् ८ पिबा सोममिन्द्र मन्दतु त्वेति वैराजस्य स्तोत्रियानुरूपौ न्यूङ्खम् ९ मध्यमस्य पादस्य द्वितीयसप्तमयोर-क्षरयोर्द्विष्पूर्वं द्विरुत्तरमित्यानुष्टुभः १० यं तो३ ओ३ सुषाव हर्यो३ ओ३ श्वाद्रिरिति ११ द्वितीयेऽक्षरे द्वादशकृत्व एकैकं दीर्घं ह्रस्वांस्त्रींस्त्रीनन्तरेणेति वैराजः १२ यं तो सुषावेति १३ द्वितीयचतुर्थयोरक्षरयोः प्रतिगरस्यानुष्टुभः प्रतिन्यूङ्खः १४ द्वितीये वैराजः १५ ओथो३ ओ३ मोदो३ ओ३ एवेति १६ ओथो मोदैवेति १७ इन्द्रमिद्देवतातय इति सामप्रगाथः १८ तुभ्येदिमेति तिसृणां पूर्वयोर्न्यूङ्खः १९ कुह श्रुतो यध्मस्य ते त्यमु वः सत्रासाहमिति तिस्र इति निष्केवल्यम् २० द्वितीयादह्नः प्रतिपत् २१ हिरण्यपाणिमित्यनुचरः २२ आ देवो यातु सविता सुरत्नः प्र द्यावा यज्ञः पृथिवी नमोभिः प्र ऋभुभ्यः प्र शुक्रैतु देवीति वैश्वदेवे विकारः २३ प्र सम्राजः क ईं व्यक्ता हुवे वः सुद्योत्मानमित्याग्निमारुते २४ ५

त्रिणवस्तोमं शाक्वरपृष्ठं पञ्चमम् १ इममू ष्विति नवर्चमाज्यं व्यूल्हेऽग्निं तं मन्य इति समूल्हे २ तस्य प्रथमायै पदमवगृह्य पदमवगृह्य द्वे अवगृह्यैकेन प्रणौति ३ पङ्क्तिशंसं पराः ४ बार्हतः प्रउगः ५ आ नो यज्ञं दिविस्पृशमिति द्वे आ नो वायवित्येकाऽवां सहस्रमिति तिस्र ऋधगित्थेति द्वे प्र मित्रायेत्येकेमा उ वां दिविष्टय आ नो विश्वासु हव्यो देवं देवं वोऽवसे देवं देवमियमददादिति प्रउगतृचानि ६ उत स्या नः सरस्वती घोरेति समूल्हे ७ यत्पाञ्चजन्ययेति मरुत्वतीयस्य प्रतिपत् ८ इत्था हि सोमेऽवितासि मरुत्वाँ इन्द्र वृषभोऽयं ह येनेति तिस्र इति मरुत्वतीयम् ९ महानाम्न्यः स्तोत्रियः १० यथा तिस्रो ऽनुष्टुभस्तथैकैका ११ उत्तमायाः पङ्क्तिरुत्तमा १२ उत्तमार्धे च पञ्च पदानि पच्छः पुरीषमित्याचक्षते तन्निविच्छंसम् १३ प्रत्यस्मै पिपीषते यो रयिवो रयिंवमस्त्यमु वो अप्रहणमिति त्रयस्तृचा अस्मा अस्मा इति दशम्येवा ह्यसि वीरयुरिति वा सोऽनुरूपः १४ यदिन्द्र नाहुषीष्वेति सामप्रगाथः १५ इन्द्रो मदाय प्रेदं ब्रह्माभूरेकस्तमिन्द्रं वाजयामसीति तिस्र इति निष्केवल्यम् १६

तत्सवितुर्वरेण्यमित्यनुचरः १७ उदु ष्य देवः सविता दमूना इति तिस्रो मही द्यावापृथिवी इति चतस्र ऋभुर्विभ्वा को नु वां मित्रावरुणौ प्र शंतमेति वा वैश्वदेवे विकारः १८ हविष्पान्तं वपुर्वग्निर्होता गृहपतिरिति तिस्र इत्याग्निमारुते १९ मूर्धानमा रुद्रास इममू ष्विति नवेति समूल्हे २० ६

त्रयस्त्रिंशस्तोमं रैवतपृष्ठं षष्ठम् १ नित्याभिर्याज्याभिः पारुच्छेपीः संधाय यजन्ति २ आ त्वा जुव आ वां धिय इत्यैन्द्रवायवस्य पुरोनुवाक्ये ३ स्तीर्णं बर्हिरा वां रथ इति याज्ये ४ सुषुमेति मैत्रावरुणस्य पुरोनुवाक्योत्तरा याज्या ५ युवां स्तोमेभिरित्याश्विनस्य पुरोनुवाक्योत्तरा याज्या ६ वृषन्निन्द्र तां वां धेनुं विश्वेषु हि त्वा मो षु वो अस्मदा यन्नः पत्नीस्ता नो रासन्निति नेष्टुर्द्विपदा त्रिष्टुप्चाग्निं होतारं दध्यङ् हेति प्रातःसवने प्रस्थितानां यजन्ति ७ तुभ्यं हिन्वान इति सूक्तयोरेकैकोर्ध्वमृतुप्रैषेभ्यः ८ स्वयं यजतोऽध्वर्युर्गृहपतिश्च ९ चित्यस्य पश्चादुपविश्याध्वर्युः शालामुखीयस्य गृहपतिः १० पिबा सोममिन्द्र सुवानमिन्द्राय हि द्यौस्त्वया वयं मघवन्पाहि न इन्द्र नू इत्था तेऽवर्मह इन्द्र वनोति हि सुन्व न्नति माध्यन्दिने विकारः ११ उत माता बृहद्दिवेति नेष्टुस्तृतीयसवने १२ अनवानन्तो यजन्ति १३ ऐकाहिकीभिर्वा १४ ७

अयं जायतेत्याज्यम् १ आतिच्छन्दसः प्रउगः २ स्तीर्णं बर्हिरा वां रथोऽयं मित्राय युवां स्तोमेभिर्वृषन्निन्द्रेत्येकाऽवर्मह इन्द्रेति द्वे ओ षू णो अग्न इयमददादिति प्रउगतृचानि ३ उत नः प्रियेति समूल्हे ४ स पूर्व्य इति प्रतिपन्मरुत्वतीयस्य ५ यं त्वं रथं स यो वृषा मरुत्वां इन्द्र मीढ्व इति तिस्र इति मरुत्वतीयम् ६ रेवतीर्नो रेवाँ इद्रेवत इति रैवतस्य स्तोत्रियानुरूपौ ७ मा चिदन्यदिति सामप्रगाथः ८ एन्द्र याह्युप प्र घा न्वस्योप नो हरिभिरिति तिस्र इति निष्केवल्यम् ९ अभि त्यं देवमिति प्रतिपद्वैश्वदेवस्य १० तस्याः षोलशाक्षरेण विगृह्याष्टादशाक्षरेण प्रणुत्य पञ्चदशाक्षरेणावसाय पञ्चदशाक्षरेण ११ अस्य हि स्वयशस्तरमित्युत्तरे १२ तृतीयादह्नोऽनुचरः १३ उदु ष्य देवः सविता सवाय कतरा पूर्वा किमु श्रेष्ठ इदमित्थेत्युत्तमे परिशिष्य ये यज्ञेनेति शस्त्वा परिशिष्टे शंसतीति वैश्वदेवे विकारः १४ अहश्च कृष्णं प्रयज्यव इमं स्तोममित्याग्निमारुते १५ मध्यमात्र्यहान्निष्केवल्यमरुत्वतीययोरुत्तमांस्तृचा-न्समूल्ह उत्सृजति १६ स्वस्ति नो मिमीतामिति च तिस्रोऽन्ते वैश्वदेवानां

करोति १७ ततं म इत्यार्भवं चतुर्थस्य १८ प्र यन्तु वाजा इति च तिस्रोऽन्ते मारुतस्य १९ वसुं न चित्रमहसमिति जातवेदसीयम् २० परोक्षपृष्ठस्य बृहद्रथन्तरपृष्ठस्योपाङ्कृयपृष्ठस्यापर्क्यपृष्ठस्य तनूपृष्ठस्य च्छन्दोरुट्स्तोमस्य च च्छन्दोगवशेन स्तोत्रियानुरूपान्सामप्रगाथांश्च २१ समानमन्यत्समूल्हेन २२ तथा विश्वजिति २३ ८

चतुर्विंशस्तोमं बृहत्पृष्ठमुभयसाम सप्तमम् १ प्र वः शुक्रायेत्याज्यम् २ त्रैष्टुभः प्रउगः ३ प्र वीरया ते सत्येनोद्वां चक्षुरा गोमता नो देव प्र वो यज्ञेषु प्र चोद-सेति प्रउगतृचानि ४ ये त्र्यहस्य प्रथमस्य प्रतिपदनुचराः सब्राह्मणस्पत्यास्ते छन्दोमेषु स्वरसामस्वभिप्लवे च ५ प्रथमादेव प्रथमस्याह्नश्छान्दोमिकस्य ६ द्वितीयाद्द्वितीयस्य ७ तृतीयात्तृतीयस्य ८ एवं त्र्यहस्य पूर्वस्याभि-प्लविकस्य ९ एवमुत्तरस्य १० एवं स्वरसाम्नाम् ११ कया शुभा त्यं सु मेषमिति मरुत्वतीयम् १२ तमु ष्टुह्यभि त्यं मेषमिति निष्केवल्यम् १३ न कण्वरथन्तरस्य योनिमनुशंसेत् १४ ये प्रथमयोरह्नोः प्रतिपदनुचरा वैश्वदेवस्य ते छन्दोमेष्वभिप्लवे च १५ तत्सवितुर्वरेण्यं प्रेतां यज्ञस्यायं देवायेति तृचानृजुनीतीति पञ्चा याहि वनसा सहौमासश्चर्षणीधृत इति तिस्र इति वैश्वदेवे विकारः १६

वैश्वानरो न ऊतये
वैश्वानरो न आ गमदिमं यज्ञं सजूरुप
अग्निरुक्थेन वाहसा

वैश्वानरो अङ्गिरसां स्तोमं यज्ञं च जीजनत्
ऐषु द्युम्नं स्वर्यमत्

प्र यद्वस्त्रिष्टुभमिति पञ्चदश नव वार्चन्तस्त्वेत्याग्निमारुते १७ ९

चतुश्चत्वारिंशस्तोमं रथन्तरपृष्ठमष्टमम् १ अग्निं वो देवमित्याज्यम् २ त्रैष्टुभः प्रउगः ३ कुविदङ्गेति प्रथमातृतीये आ वायो भूषेति चैका यावत्तरः प्रति वां सूर उदितेऽप स्वसुरयं सोमः प्र ब्रह्माण उत स्या नः सरस्वती जुषाणेति

प्रउगतृचानि ४ महाँ इन्द्रो नृवदिमा उ त्वा पुरुतमस्य क्व स्य वीर इति सर्वत्र चतस्र उत्तमाः परिहाप्य महश्चित्तमस्य द्यावापृथिवी इति मरुत्वतीयम् ५ त्वं महाँ इन्द्र तुभ्यं हत्वं महाँ इन्द्र यो हापूर्व्या तां सु ते कीर्तिमिमां ते धियमिति निष्केवल्यम् ६ हिरण्यपाणिमूतय इति चतस्रो मही द्यौर्युवाना पितरेति तृचौ देवानामिदिमा नु कं विश्वे देवा ऋतावृध इति तिस्र इति वैश्वदेवे विकारः ७

वैश्वानरो अजीजनदग्निर्नो नव्यसीं मतिम्
क्षमया वृधान ओजसा

वृषा पावक दीदिह्यग्ने वैश्वानर द्युमत्
जमदग्निभिराहुतः

ऋतावानं वैश्वानरं कद्ध नूनं कधप्रियो दूतं वो विश्ववेदसमित्याग्निमारुते ८ १०

अष्टाचत्वारिंशस्तोमं बृहत्पृष्टं नवमम् १ अगन्म महा सोमस्य मा तवसमित्याज्यम् २ पूर्वं वा ३ त्रैष्टुभः प्रउगः ४ आ वायो भूषेति प्रथमातृतीये चोत्तमा च द्वितीयाचतुर्थ्यौ चार्वन्तो न अवस इति च दिवि क्षयन्ता विश्ववारेन्द्रं नर ऊर्ध्वो अग्निः प्र क्षोदसेति प्रउगतृचानि ५ त्र्यर्यमेन्द्रो रथाय तिष्टा हरी गायत्साम प्र मन्दिन इति मरुत्वतीयम् ६ आ सत्यो यात्वस्मा इदु द्यौर्न य इन्द्र तत्त इन्द्रियमहं भुवं विश्वजित इति निष्केवल्यम् ७ अभि त्वा देव प्र वां महि द्यवी इति तृचाविन्द्र इष इत्येका ते नो रत्नानीति द्वे अग्निरुक्थइतिप्रभृति पञ्च मनोः सूक्तानि ये त्रिंशतीत्युपोत्तमामुद्धृत्य न हि वो अस्त्यर्भक इत्येका ऽशर्मेति चतस्रो बभ्रुरेक इति वा मनुप्रवल्हो विश्वे देवास आ गतेति तृचं भारद्वाजमिति वैश्वदेवे विकारः ८

दिवि पृष्टो अरोचताग्निर्वैश्वानरो बृहन्
ज्योतिषा बाधते तमः

स विश्वं प्रति चाक्लृपदृतूनुत्सृजते वशी
यज्ञस्य वय उत्तिरन्

अग्निः परेषु धामसु मरुतो यस्याग्निर्होता पुरोहित इत्याग्निमारुते ९ यानि त्र्यहस्य प्रथमस्य प्रातःसवनतृतीयसवनानि तानि समूल्हे छन्दोमानाम् १० निष्केवल्यमरुत्वतीययोश्च जागतान्युत्सृजति ११ स यो वृषेति पञ्चदशोर्ध्वं कयाशुभीयात् १२ यो जात इति तमुष्टहीयात् १३ बृहद्रथन्तरपृष्ठे द्विषूक्ताः सर्वे १४ ११

अविवाक्यं चतुर्विंशस्तोमं दशममहः १ त्रयस्त्रिंशमग्निष्टोमसाम २ त्रिकं मानसम् ३ वामदेव्यस्य योनौ रथन्तरं पृष्ठम् ४ अप्रतिभायामन्यः स्वाध्यायम् ५ उद्धृत्यानुष्टुभमितरेषां छन्दसां संपदानुष्टुभां पञ्चदशं सहस्रमेकस्मिन्सवनीये ६ द्वात्रिंशतं गायत्र्यः ७ अग्निं नरः प्रति ष्या सूनर्या शुभ्रेति तृचाननुष्टुभां स्थाने ८ चतुर्विंशतिं त्रिष्टुभः ९ तथा जगत्यः १० पञ्चदश प्रागाथान् ११ औष्णिहाँश्च तृचान्पञ्चदश १२ पाङ्क्तानि च १३ अनुष्टुभां प्रातरनुवाकः पञ्चदशे शते १४ तृतीयाचतुर्थ्यौ स्तोक्यानामुद्धृत्याभि प्रवन्तेति द्वे १५ अच्छा नः शीरशोचिषमिति तिस्रोऽच्छा वो अग्निमवस इत्येतासां स्थाने १६ प्रति श्रुतायेति तिस्रः प्रत्यस्मै पिपीषत इत्येतासां स्थाने १७ १२

अग्ने तमद्येत्याज्यम् १ तस्य प्रथमायां पञ्चाक्षरेण विगृह्य द्वाभ्यां पञ्चाक्षराभ्यामवसाय द्वाभ्यां प्रणौति २ माधुच्छन्दसः प्रउगः ३ द्वाविंशतिं गायत्र्यः ४ मृजानो वारे पवमानो अव्यय इति ग्रावस्तुतो याथाकाम्यम् ५ उत्तिष्ठन्नोजसेत्येकोत्तिष्ठतावपश्यतेत्येतस्याः स्थाने ६ त्रिकद्रुकीया प्रतिपन्मरुत्वतीयस्य ७ तस्याः षोलशाक्षरेण विगृह्य षोलशाक्षरेण प्रणुत्य षोलशाक्षरेणावसाय षोलशाक्षरेण ८ तुविशुष्मेत्युत्तरे ९ बृहदिन्द्रायेति सूक्तात्पूर्वौ प्रगाथौ पिन्वन्त्यपीयया संशंसतीति मरुत्वतीयम् १० वामदेव्यस्य स्तोत्रियानुरूपौ शस्त्वोर्ध्वं धाय्याया राथन्तरं प्रगाथं स्तोत्रियानुरूपौ च ११ सखाय आ शिषामहीति नव १२ आ धूर्ष्वस्मै वज्रमेक इति च द्विपदे १३ हैरण्यस्तूपीयं च १४ प्राग्धैरण्यस्तूपीयात्प्रगाथेन संशंसति १५ इति निष्केवल्यम् १६ षष्ठात्प्रतिपदनुचरौ वैश्वदेवस्य १७ पुरस्ताच्चानोभद्रीयात्प्र-शुक्रीयमिति वैश्वदेवे विकारः १८ उरु विष्णवित्युद्धृत्य भवा मित्र इति यजति १९ अग्निं नर इत्यग्निष्टोमसाम्नः स्तोत्रियानुरूपौ २० आयं गौर्मही द्यौरिति स्तोत्रियानुरूपौ २१ तं प्रत्नथेति त्रयोदश २२ यज्ञो बभूवेति परिधाय २२

प्रजापत इति यजति २३ उक्थैराहावो व्याख्यातः २४ इति समूल्हे ऽतिरिक्तोक्थम् २५ पुरा पत्नीसंयाजेभ्यः संस्थाप्य वा गार्हपत्ये हुत्वा पूर्वया द्वारा सदः प्रपद्य स्वस्य धिष्ण्यस्य पश्चादुपविश्य मानसेन स्तुत आयं गौरिति सार्पराज्ञीः पराङुपांश्वप्रणुवन् २६ अध्वर्यो३ इत्यामन्त्रितो होयि होतरिति सर्वत्र प्रतिशृणोति २७ ओं होतरूथा होतरित्याचद्वाणेऽनुगृणाति २८ १३

अध्वर्यो३ इति दशहोतरि वदिष्यन् १ प्रजापतिरकामयत बहुः स्यां प्रजायेय सर्वं वेदमनुष्याद्यदिदं किंचेति । स एतं दशहोतारं यज्ञक्रतुमपश्यदग्निहोत्रम् २ इत्युक्त्वाथोपांशु ३ चित्तिः स्रुक् । चित्तमाज्यम् । वाग्वेदिः । आधीतं बर्हिः । केतो अग्निः । विज्ञातमग्नीत् । वाचस्पतिर्होता । मन उपवक्ता । प्राणो हविः । सामाध्वर्युः । इति होतारः ४ अथ ग्रहः ५ वाचस्पते हृद्विधेनामन् । वाचस्पतिः सोममपादा अस्मासु नृम्णं धाः ६ इत्युपांशु ७ तेन देवान्मनुष्यानसुरानित्येतांस्त्रयानजनयत्प्रजापतिः । स येषां वा एवंविद्वान्होता भवति । प्र वै स होता प्रजया पशुभिर्जायते । प्र ते यजमानाः प्रजया पशुभिर्जायन्ते येषामेवंविद्वान्होता भवतीति ८ १४

अध्वर्यो३ इति चतुर्होतरि वदिष्यन् १ ते द्वया एवान्वावृत्ता आसन्देवाश्च मनुष्याश्च । पराञ्चो हास्मादसुरा आसन्सोऽकामयत वीरो म आजायेत येनेमानसुरानभिभवेयमिति । स एतं चतुर्होतारं यज्ञक्रतुमपश्यद्दर्शपूर्णमासौ २ इत्युक्त्वाथोपांशु ३ पृथिवी होता । द्यौरध्वर्युः । त्वष्टाग्नीत् । मित्र उपवक्ता । इति होतारः ४ अथ ग्रहः ५ वाचस्पते वाचो वीर्येण संभृततमेनायच्छसे । यज्ञपतये वसु वार्यमासंस्करसे । वाचस्पतिः सोमं पिबतु । जजनदिन्द्रमिन्द्रियाय स्वाहा ६ इत्युपांशु ७ तेनेन्द्रं वीरमजनयत्तत एनानसुरानभ्यभवत्प्रजापतिः । स येषां वा एवंविद्वान्होता भवति । आ वै तस्य होतुर्वीरो जायते । आ तेषां यजमानानां वीरा जायन्ते । अभि वै स होता द्विषन्तं भ्रातृव्यं भवति । अभि ते यजमाना द्विषतो भ्रातृव्यान् भवन्ति येषामेवंविद्वान्होता भवतीति ८ १५

अध्वर्यो३ इति पञ्चहोतरि वदिष्यन् १ तस्मा इन्द्राय देवता ज्येष्ठ्याय श्रेष्ठ्याय नातिष्ठन्त । स एतं पञ्चहोतारं यज्ञक्रतुमपश्यच्चातुर्मास्यानि २ इत्युक्त्वा-

थोपांशु ३ अग्निर्होता । अश्विनावध्वर्यू । रुद्रोऽग्नीत् । बृहस्पतिरुपवक्ता इति होतारः ४ अथ ग्रहः ५ वाचस्पतेऽछिद्रया वाचाछिद्रया जुह्वा । दिवि देवावृधन्होत्रामैरयस्व ६ इत्युपांशु ७ ततो वा इन्द्राय देवता ज्यैष्ठ्याय श्रैष्ठ्यायातिष्ठन्त । स येषां वा एवंविद्वान्होता भवति । तिष्ठन्ते वै तस्मै होत्रे स्वाः श्रैष्ठ्याय । तिष्ठन्ते तेभ्यो यजमानेभ्यः स्वाः श्रैष्ठ्याय येषा-मेवंविद्वान्होता भवतीति ८ १६

अध्वर्यो३ इति षड्ढोतरि वदिष्यन् १ सोऽकामयतान्नादः स्यामन्नपतिरिति । म एतं षड्ढोतारं यज्ञक्रतुमपश्यत्पशुबन्धम् २ इत्युक्त्वाथोपांशु ३ सूर्यस्ते चक्षुः । वायुः प्राणः । अन्तरिक्षमात्मा । यज्ञो नात्राणि । द्यौः पृष्ठम् । पृथिवी शरीरम् । इति होतारः ४ अथ ग्रहः ५ सोमः सोमस्य पिबतु शुक्रः शुक्रस्य पिबतु । श्रातास्त इन्द्र सोमा वातापे हवनश्रुतः ६ इत्युपांशु ७ ततो वै सोऽन्नादोऽन्नपतिरासीत् । स येषां वा एवंविद्वान्होता भवति । अन्नादो वै स होतान्नपतिर्भवति । अन्नादास्ते यजमाना अन्नपतयो भवन्ति येषामेवंविद्वान्होता भवतीति ८ १७

अध्वर्यो३ इति सप्तहोतरि वदिष्यन् १ ते देवा अकामयन्त क्लृप्ताः क्लृप्तेषु लोकेषु स्यामेति । त एतं सप्तहोतारं यज्ञक्रतुमपश्यन्सौम्यमध्वरम् २ इत्युक्त्वाथोपांशु ३ महाहविर्होता । सत्यहविरध्वर्युः । अचित्तपाजा अग्नीत् । अचित्तमना उपवक्ता । अनाधृष्यश्चाप्रतिधृष्यश्चाभिगरौ । अयास्य उद्गाता । इति होतारः ४ अथ ग्रहः ५ वाचस्पते विधेनामन्विधेम ते नाम । विधेस्त्वमस्माकं नाम । मा देवानां तन्तुश्छेदि मा मनुष्याणाम् । सजूर्दिषा पृथिव्योपहूतः सोमस्य पिब स्वाहा ६ इत्युपांशु ७ ततो वै तेभ्योऽकल्पत । ते देवाः क्लृप्ताः क्लृप्तेषु लोकेष्वासन् । अप्यद्य क्लृप्ताः क्लृप्तेषु । स येषां वा एवंविद्वान्होता भवति । कल्पते वै तस्मै होत्रे योगक्षेमः । कल्पते तेभ्यो यजमानेभ्यो योगक्षेमः । अभि वै स होता स्वर्गं लोकमश्नुते प्रत्यस्मिं-ल्लोके प्रतितिष्ठति । अभि ते यजमानाः स्वर्गं लोकमश्नुवते प्रत्यस्मिंल्लोके प्रतितिष्ठन्ति येषामेवंविद्वान्होता भवतीति ८ १८

तनूरतो वदति १ अध्वर्यो येषां वा अन्नादीं प्रजापते स्तन्वं विद्वान्होता

भवत्यन्नादो वै स होता भवत्यन्नादास्ते यजमाना भवन्ति । अध्वर्यो येषां वा अन्नपत्नीं प्रजापतेस्तन्वं विद्वान्होता भवत्यन्नपतिर्वै स होता भवत्यन्नपतयस्ते यजमाना भवन्ति । अध्वर्यो येषां वै भद्रां प्रजापतेस्तन्वं विद्वान्होता भवति भद्रं वै तस्मै होत्रे भवति भद्रं तेभ्यो यजमानेभ्यो भवति । अध्वर्यो येषां वै कल्याणीं प्रजापतेस्तन्वं विद्वान्होता भवति कल्याणं वै तस्मै होत्रे भवति कल्याणं तेभ्यो यजमानेभ्यो भवति । अध्वर्यो येषां वा अनिलयां प्रजापते-स्तन्वं विद्वान्होता भवत्यनिलयो वै स होता भवत्यनिलयास्ते यजमाना भवन्ति अध्वर्यो येषां वा अपभयां प्रजापतेस्तन्वं विद्वान्होता भवत्यभयं वै तस्मै होत्रे भवत्यभयं तेभ्यो यजमानेभ्यो भवति । अध्वर्यो येषां वा अनाप्तां प्रजापतेस्तन्वं विद्वान्होता भवत्यनाप्तो वै स होता भवत्यनाप्तास्ते यजमाना भवन्ति । अध्वर्यो येषां वा अनाप्यां प्रजापतेस्तन्वं विद्वान्होता भवत्यनाप्यो वै स होता भवत्यनाप्यास्ते यजमाना भवन्ति । अध्वर्यो येषां वा अनाधृष्टां प्रजापतेस्तन्वं विद्वान्होता भवत्यनाधृष्टो वै स होता भवत्यनाधृष्टास्ते यजमाना भवन्ति । अध्वर्यो येषां वा अनाधृष्यां प्रजापतेस्तन्वं विद्वान्होता भवत्यनाधृष्यो वै स होता भवत्यनाधृष्यास्ते यजमाना भवन्ति । अध्वर्यो येषां वा अपूर्वां प्रजापते-स्तन्वं विद्वान्होता भवति न वै तस्माद्धोतुरन्यः पूर्वो भवति न तेभ्यो यजमानेभ्योऽन्ये पूर्वे भवन्ति । अध्वर्यो येषां वा अभ्रातृव्यां प्रजापतेस्तन्वं विद्वान्होता भवत्यभ्रातृव्यो वै स होता भवत्यभ्रातृव्यास्ते यजमाना भवन्ति येषामेवंविद्वान्होता भवतीति २ १९

गृहपतिरतो गृहपतिवदनम् १ अध्वर्यो येषां वै गृहपतिर्गृहपतिं विद्वा-न्गृहपतिर्भवति राध्नोति वै स गृहपती राध्नुवन्ति ते यजमानाः । अध्वर्यो येषां वा अपहतपाप्मानसेवंविद्वान्गृहपतिर्भवत्यप वै स गृहपतिः पाप्मानं हतेऽप ते यजमानाः पाप्मानं घ्नते येषामेवंविद्वान्गृहपतिर्भवतीति २ २०

प्रजापत इति मनसा यजति १ मनसा वषट्करोति २ मनसानुवषट्करोति ३ मनसा भक्षः ४ मनसोरोऽभिमर्शनम् ५ औदुम्बरीमन्वारभन्तेऽग्रेण धिष्णानासीनाः ६ पलाशशाखाभिर्ये नातिक्रामेयुः ७ उत्तमौ पाणी होता कुर्वीत ८ उत्तमोऽसानीति ९ अपिधाय सदसो द्वारौ शालायाश्चाध्वर्युर्वाच-मुपाकरोति । वाग्यताः संमील्यासत आ नक्षत्राणां दर्शनात् १० नक्षत्रेषु

दृश्यमानेषु मार्जालीयदेशे तच्चक्षुरिति नक्षत्रेषु चक्षुर्विसृजन्ते ११ सर्वे साम्नो निधनमुपेत्योत्तरस्य हविर्धानस्याधोऽक्षं सर्पन्ति १२ उत्तरस्योत्तरेण वा १३ युवं तमिन्द्रापर्वतेत्यक्षवेलायां जपित्वाग्रेण हविर्धाने समुपविश्य कामान्ध्यायन्ते यत्कामा भवन्ति १४ ये बहुकामा भूर्भुवः स्वरित्येतास्ते व्याहृतीर्जपेयुः १५ ते प्राञ्च उदञ्च उत्क्रम्य वाचं विह्वयन्ते वागैतु वागुपैतु वागुप मैतु वागिति १६ सुब्रह्मण्याप्रतीकं त्रिरुपांश्वभिव्याहृत्य वाचं विसृजन्ते १७ अत्र द्वादशाहः संतिष्ठते १८ कालवादो वा कालवादो वा १९ २१

इति शाङ्खायनसूत्रे दशमोऽध्यायः समाप्तः

व्याख्यातो द्वादशाहः प्रकृतिः सत्राहीनानाम् १ वचनलक्षणो विकारः २ द्विरात्रप्रभृतयोऽहीना द्वादशाहपर्यन्ताः ३ द्वादशाहप्रभृतीनि सत्राणि ४ अहीनेषु प्रायणीयो न विद्यते ५ सत्रधर्माश्च ६ १

चतुर्विंशस्तोमं बृहत्पृष्ठमुभयसामाग्निष्टोम उवथ्यं वाहश्चतुर्विंशभित्याचक्षते १ होताजनिष्टेत्याज्यम् २ माधुच्छन्दसः प्रउगः ३ कयाशुभीयं मरुत्वतीयम् ४ अनुत्तमा त इति परिधानीयोत्तराः पूर्वाः शस्त्वा यत्रास्मिन्धीयते निवित् ५ तदिदासीयं निष्केवल्यम् ६ द्वितीयात्सावित्रद्यावापृथिवीये ७ वैश्वदेवमारुते च ८ आर्भवं षष्ठात् ९ वैश्वानरीयं तृतीयात् १० यज्ञेन वर्धतेति जातवेदसीयम् ११ सामान्तरुक्थाः १२ यज्ञायज्ञीयस्य स्तोत्रियेणोक्थ्यस्तोत्रियान्संशस्य । अनुरूपेणानुरूपान् । अग्ने मरुद्भिर्ऋक्वभिः पा इन्द्रावरुणाभ्यां मत्स्वेन्द्राबृहस्पतिभ्यामिन्द्राविष्णुभ्यां सजूरिति शस्त्वा परिदधाति १३ ग्रहान्तरुक्था एतया शस्तया यजेत् १४ २

एकत्रिके तृचक्लृप्तं शस्त्रम् १ यथास्तुतं स्तोत्रियाञ्छस्त्वा तृचान्वा । यथास्तोत्रियमनुरूपान्सामप्रगाथांश्च शस्त्वा । पर्यासानामुत्तमांस्तृचान्होत्रकाः शंसन्ति २ निविद्धानानां होता ३ सर्वमन्यत्प्रकृत्या ४ ३

अभिप्लवः षलहः पृष्ठ्यविकारः १ यानि त्र्यहस्य प्रथमस्याज्यानि समूल्हे तानि पूर्वेषामाभिप्लविकानाम् २ रथन्तरं बृहदिति पृष्ठे विपर्यासम् ३

ज्योतिरग्निष्टोमः प्रथममुत्तमं च ४ चत्वार्युक्थ्यानि मध्ये ५ गां द्वितीयं चतुर्थं च ६ आयुस्तृतीयं पञ्चमं च ७ इन्द्रो रथायेति मरुत्वतीयम् ८ आ याह्यर्वाङिति निष्केवल्यम् ९ कथा देवनामिति वैश्वदेवम् १० पञ्चमे च ११ मारुतमेकाहात् १२ एति प्र होतेति जातवेदसीयम् १३ समानमन्यत्प्रथमे-नाह्ना १४ ४

इमा उ त्वेति मरुत्वतीयं द्वितीयस्य १ सुत इत्त्वं निमिश्ल इति निष्केवल्यम् २ एकाहात्सावित्रम् ३ ततं म इत्यार्भवम् ४ पञ्चमे च ५ देवान्हुव इति वैश्वदेवम् ६ चतुर्विंशाज्जातवेदसीयम् ७ समानमन्यद्द्वितीयेनाह्ना ८ ५

औष्णिहो वैश्वमनसः प्रउगस्तृतीयस्य १ वायो याहि शिवा वां सहस्रं ता वां विश्वस्या वां वाहिष्ठः सखाय आ शिषामह्युत नो देव्यदितिरुत नः प्रियेति प्रउगतृचानि २ तिष्ठा हरी इति मरुत्वतीयम् ३ एकाहान्निष्केवल्यम् ४ घृतेन द्यावापृथिवी इति तृचम् ५ षष्ठे च ६ एकाहादार्भवं वैश्वदेवं च ७ आ रुद्रासस्त्वामग्न ऋतायव इत्याग्निमारुतम् ८ ६

होताजनिष्टेत्याज्यं चतुर्थस्य १ मैधातिथः प्रउगः २ ये गार्त्समदे ते वायव्यैन्द्रवायवे । मैधातिथ्यस्तु पूर्वाः ३ मित्रं वयं प्रातर्युजा त्वा वहन्त्वैभिरग्न इति तृचानि ४ यानि त्र्यहस्योत्तरस्य सारस्वतानि समूल्हे तान्युत्तरेषामाभिप्लविकानाम् ५ एकाहान्मरुत्वतीयम् ६ उग्रो जज्ञ इति निष्केवल्यम् ७ द्वितीयात्सावित्रद्यावापृथिवीये ८ आर्भवं तृतीयात् ९ अग्निरिन्द्र इति वैश्वदेवम् १० यानि त्र्यहस्य पूर्वस्य वैश्वानरीयाणि तान्युत्तरस्य ११ प्र ये शुम्भन्ते जनस्य गोपा इत्याग्निमारुतम् १२ ७

अग्न ओजिष्ठमित्याज्यं पञ्चमस्य सर्वत्रोत्तमां परिहाप्य १ संहार्यः प्रउगः २ अग्रं षिब तव वायो स त्वं नो देवेति तृचः शतेना न आ नो मित्रावरुणाऽ नो गोमन्तमतश्चिदिन्द्र णो विश्वे देवा ऋतावृध इति तृचानि ३ क्व स्य वीर इति मरुत्वतीयम् ४ एतायामेति निष्केवल्यम् ५ तृतीयात्सावित्रद्यावापृथिवीये ६ प्र वः स्फलक्रंश्चित्र इच्छशोरित्याग्निमारुतम् ७ ८

सखायः सं वः सम्यञ्चमित्याज्यं षष्ठस्य सर्वत्रोत्तमां परिहाप्य १ संहार्यः प्रउगः २ वायवा याहि दर्शत रथेन पृथुपाजसा यदद्य सूर उदिते प्रति वां सूर उदित इति वा पुरुप्रिया ण उप नो हरिभिर्विश्वे देवास आ गतेति भारद्वाजमिति तृचानि ३ महाँ इन्द्रो नृवदिति मरुत्वतीयम् ४ यो जात इति निष्केवल्यम् ५ द्वितीयात्सावित्रम् ६ अबुध्रमु त्य इति वैश्वदेवम् ७ धारावरास्त्वमग्ने द्युभिरित्याग्निमारुतम् ८ इन्द्र दृह्योत वैश्वदेवं षष्ठस्याह्नो द्वितीयेऽभिप्लवे ९ उषासानक्तेति तृतीये १० अग्निरिन्द्र इति चतुर्थे ११ शं न इन्द्राग्नी इति वा १२ प्रथमं वा पूर्वस्मिन्पटले द्वितीयमुत्तरे १३ परावत इति पञ्चमे १४ ९

अभिजित्सर्वस्तोम उभयसामा रथन्तरपृष्ठो बृहत्पृष्ठो वाग्निष्टोमः १ प्र वो देवाय यद्वाहिष्ठमित्याज्यम् २ उभौ माधुच्छन्दसगार्त्समदौ प्रउगौ ३ माधुच्छन्दसानि पूर्वाणि तृचानि गार्त्समदान्युत्तराणि ४ वैश्वदेवं वा गार्त्समदानाम् ५ ऐकाहिकं वा प्रातःसवनम् ६ इन्द्र पिब तुभ्यं सुतो मदायेत्यैकाहिकादूर्ध्वं मरुत्वतीयात् ७ या त ऊतिरिति निष्केवल्यात् ८ पूर्वे तु बृहत्पृष्ठे ९ एकसूक्ते वा । पिबा सोममभि तमु ष्टुहीति । पूर्वस्योत्तमामुत्सृजति १० एकाहात्तृतीयसवनम् ११ १०

सप्तदशस्तोमाः स्वरसामानः १ रथन्तरं पृष्ठं प्रथमस्य बृहद्द्वितीयस्योभयसामा तृतीयो रथन्तरपृष्ठः २ स्वरपृष्ठाः कौषीतकेः ३ बृहद्रथन्तरे पवमानेषु ४ अग्निष्टोमाः पैङ्ग्यस्य ५ उक्थ्याः कौषीतकेः ६ आ यज्ञैर्बृहद्वयोऽग्न ओजिष्ठमित्याज्यानि सर्वत्रोत्तमाः परिहाप्य ७ ये त्र्यहस्य प्रथमस्य ते प्रउगाः ८ क्व स्य वीर इति प्रथमस्य स्वरसाम्नो मरुत्वतीयं कयाशुभीयं द्वितीयस्य गायत्सामेति तृतीयस्य ९ सामप्रगाथांश्च शस्त्वा कद्वतः प्रगाथान् १० कं नव्य इति प्रथमे कदू न्वस्येति द्वितीय इमा उ त्वा पुरूवसो इति तृतीये बृहतश्च योनिः ११ यस्ते साधिष्ठ इत्युत्तमां परिहाप्यार्वाग्रथमिति च प्रथमे गायन्ति त्वापादित उदु नश्चित्रतम इति द्वितीय इन्द्रं विश्वाः सं च त्वे जग्मुरिति तृतीये १२ इति बृहद्रथन्तरपृष्ठानाम् १३ यज्जायथा अपूर्व्येति स्तोत्रियः स्वरपृष्ठानाम् १४ यदिन्द्र चित्र मेहनेति द्वे या इन्द्र भुज इति तृतीयानुरूपस्य १५ मत्स्यपायि ते मह इति वा द्वितीयस्य । प्रथमां तृतीयां करोति १६ मत्सि नो वस्यइष्टय

इति द्वे वयं घ त्वेति तृतीयानुरूपस्य १७ प्रत्यस्मै पिपीषत इति वा तृतीयस्य चतुर्थीं तृतीयां करोति १८ इममिन्द्र सुतं पिबेति द्वे क ईं वेदेति तृतीयानुरूपस्य १९ ११

यतो बृहतीकः स्तोत्रियः स्यात्ततो बृहतीकोऽनुरूपः कार्यः १ धाय्यां शस्त्वा कद्वतश्च रथन्तरस्य योनिं प्रथमे बृहतो द्वितीय उभयोस्तृतीये २ पूर्वां सर्वत्र रथन्तरस्य ३ यमिन्द्र दधिष इति द्वे प्रथमे स्वरन्ति त्वेति द्वितीये दाना मृगो न वारण इति तृतीये ४ इन्द्र तुभ्यमिन्मघवन्निति नवानां तिस्रस्तिस्रोऽन्वहं पूर्वाणि च सूक्तानि ५ तृचानि वोद्धृत्योभयानि सूक्तानि ६ स्वरयोनिषु चोल्हयोः ७ प्रागानुष्टुभात्तृचाद्वा प्रगाथेन संशंसति ८ प्रथमात्त्र्यहात्तृतीय-सवनानीति बृहद्रथन्तरपृष्ठानाम् ९ प्रतिपदश्च स्वरपृष्ठानाम् १० स्वरयोनीनां च ११ अनुचरप्रभृति समूल्हान्मध्यमात्त्र्यहात् १२ उद्धृत्य तु वैश्वदेवाना-मुत्तमानि सूक्तानि तृचं च प्र वः पान्तं रघुमन्यवस्तं प्रत्नथा कदित्थेति करोति १३ अग्निरिन्द्र इति वा प्रथमे १४ प्र ये शुम्भन्त इति च मारुतम् १५ देवान्हुव इति द्वितीये १६ उषासानक्तेति तृतीये १७ १२

एकविंशस्तोमं बृहत्पृष्ठं महादिवाकीर्त्यं वाग्निष्टोमो विषुवान् १ पुरादित्य-स्यास्तमयात्संस्थाप्यः २ उदिते प्रातरनुवाकः ३ यथाप्रकृति वा ४ अग्निं मन्ये पितरमित्युदिते प्रतिपत्प्रातरनुवाकस्य ५ शतं दशशतं विंशतिशतं वानुब्रूयात् ६ वासिष्ठमाप्रीसूक्तम् ७ सौर्यः पशुरुपालम्भ्यः सवनीयस्य ८ चित्रं देवानामिति पुरोनुवाक्यास्तिस्र उत्तरा याज्याः सौर्यस्य ९ उपांशु १० समुद्रादूर्मिरित्याज्यम् ११ त्रैष्टुभः प्रउगः १२ मध्यमाच्छन्दोमात्त्रीणि तृचानि प्रथमे चोत्तमं च १३ प्रथमात्त्रीणि १४ आश्विने तु भानुमती तृतीया १५ प्र ब्रह्मैतु सदनादिति वैश्वदेवम् १६ ऐकाहिकं वा प्रातःसवनम् १७ प्र वो देवाय त्वं हि क्षैतवदिति वा तदाज्यम् १८ माधुच्छन्दसश्च १९ कया शुभा त्यं सुमेषं जनिष्ठा उग्र इति मरुत्वतीयम् २० आयन्त इव सूर्यमिति स्तोत्रियो ऽस्वयोनौ बृहति २१ यद्द्याव इन्द्रेत्यनुरूपः २२ महादिवाकीर्त्यं वा २३ चित्रं देवानामिति स्तोत्रियो महादिवाकीर्त्यस्य २४ उत्तरे च २५ उत्सूर्यो बृहदर्चींषीति तृतीयानुरूपस्य २६ बण्महानुदु त्यद्दर्शतमिति वा स्तोत्रिया-नुरूपौ प्रगाथौ २७ विभ्राड् बृहदिति वा स्तोत्रियो वि सूर्यो मध्य इत्यनुरूपः

२८ विश्वाहा त्वा सुमनस इति वा २९ बरामहानिति सामप्रगाथः ३० यः सत्राहा विचर्षणिरिति वा ३१ रथन्तरस्य योनिं स्वयोनौ बृहति ३२ उभयोरस्वयोनौ ३३ महादिवाकीर्त्ये च ३४ १३

यद्येने पवमाने सामगाः कुर्युः १ नाक्रियमाणयोः शंसेत् २ इन्द्रः किलेत्युक्थमुखीयाः ३ शं नो भव चक्षसेति महादिवाकीर्त्ये ४ द्यौर्नय इन्द्रेति सूक्तं स्वयोनौ बृहति ५ य एक इद्धव्य इत्यस्वयोनौ ६ महादिवाकीर्त्ये च ७ तमु ष्टुहीत्युद्धतबृहद्रथन्तरे ८ अभि त्यं मेषम् ९ ऋतुर्जनित्रीयस्य नव शस्त्वा सर्वहरेर्वा निविदम् १० आ सत्यो यातु ११ विश्वजित इत्युत्तमां परिशिष्य १२ आहूय दूरोहणं रोहति १३ हंसः शुचिषदिति पच्छो ऽर्धर्चशस्त्रिपच्छोऽनवानं त्रिपच्छोऽर्धर्चशः पच्छः १४ उत्तमामुपसंशस्य १५ एष प्र पूर्वीः १६ पतङ्गमक्तम् १७ उरुं नः १८ इति पैङ्ग्यम् १९ अथ कौषीतकम् २० समानमोक्थमुखीयायाः २१ ऋतुर्जनित्रीयमुद्धृतबृहद्रथन्तरे २२ तस्यैवैकादश स्वयोनौ २३ नवान्यत्र २४ एन्द्र याहि हरिभिरिति पञ्चदशोद्धृत्य साव्यम् २५ बरोरेकादश शस्त्वा निविदम् २६ अभूरेक इति साव्यस्य स्थाने २७ तार्क्ष्यः पूर्वः पतङ्गात् २८ एकशतं निष्केवल्यम् २९ प्रथमात्सावित्रम् ३० द्वितीयाद्द्यावापृथिवीयम् ३१ षष्ठादार्भवमारुते ३२ देवान्हुव इति वैश्वदेवम् ३३ तृतीयाद्वैश्वानरीयम् ३४ मूर्धानं मूर्धा दिव इत्यग्निष्टोमसाम्नः स्तोत्रियानुरूपौ ३५ वेदिषद इति जातवेदसीयम् ३६ आवृत्ताः स्वरसामानः ३७ १४

विश्वजित्सर्वस्तोमः सर्वपृष्ठो बृहत्पृष्ठो वाग्निष्टोमः १ अग्निं नर इत्याज्यम् २ त्वं हि क्षैतवदिति बृहत्पृष्ठस्य ३ माधुच्छन्दसः प्रउगः ४ चतुर्विंशान्मध्यन्दिनः ५ वैराजस्य स्तोत्रियानुरूपौ शस्त्वा सर्वपृष्ठे प्रगाथं च रथन्तरस्य योनिं बृहतश्च ६ अनुचरप्रभृति षष्ठात्तृतीयसवनम् ७ कथा देवानामिति वैश्वदेवं सात्त्रिकस्य बृहत्पृष्ठस्य ८ आनोभद्रीयमेकाहस्य ९ सर्वपृष्ठे विश्वजिति पुरस्तान्मारुतस्य सूक्तस्य होतैवयामरुतं शंसति १० जगतीशंसमन्यूङ्खम् ११ पङ्क्तिशंसं वा न्यूङ्खम् १२ अन्यूङ्खं वा १३ त्वमग्ने यज्ञानामित्याग्निष्टोमसाम्नः स्तोत्रियानुरूपौ स्तोत्रियानुरूपौ १४ १५

इति शाङ्खायनसूत्र एकादशोऽध्यायः समाप्तः

होत्रकाणाम् १ प्रातःसवने कर्म २ आ नो मित्रावरुणा मित्रं वयं मित्रं हुवे ऽयं वां मित्रावरुणा पुरूरुणा चित्प्रति वां सूर उदिते प्र वो मित्राय यदद्य सूर उदिते प्र मित्रयोस्ता नः शक्त्वमिति स्तोत्रिया मैत्रावरुणस्य ३ आ याहि सुषुमेन्द्रमिद्गाथिन इन्द्रेण सं हीन्द्रो दधीच उत्तिष्ठन्नोजसा सह भिन्धि विश्वाः प्र सम्राजं चर्षणीनां तमिन्द्रं वाजयामसि महाँ इन्द्रो य ओजसा युञ्जन्ति ब्रध्नमिति ब्राह्मणाच्छंसिनः ४ इन्द्राग्नी आ गतं सुतमिन्द्रे अग्ना नमो बृहदियं वामस्य मन्मनस्ता हुवे ययोरिदमिन्द्राग्नी युवामिमे यज्ञस्य हि स्थ ऋत्विजेयं वामस्य मन्मनस्ता हुवे ययोरिदमिन्द्रे अग्ना नमो बृहत्तमीलिष्व ता हि शश्वन्त इति वाच्छावाकस्य ५ १

द्विरात्रप्रभृतिष्वहःसंघातेष्वनुरूपाः श्वःस्तोत्रियाः समानस्तोत्रियेष्वपि १ परे वा २ नित्यांस्तृचानन्त्याञ्छत्त्राणां पर्यासा इत्याचक्षते ३ प्रति वां सूर उदित इति मैत्रावरुणस्य ४ काव्ये भरदाभ्येति स्तोत्रिये वा ५ सति श्वःस्तोत्रिये वा ६ उद्धेदभीति ब्राह्मणाच्छंसिनः ७ इन्द्राग्नी अवसेत्यच्छावाकस्य ८ अन्तरेणानुरूपं पर्यासं चावापस्थानम् ९ एकया द्वाभ्यां वा स्तोममतिशंसन्ति १० भूयसा त्रिवृति ११ सर्वपृष्ठे च विश्वजिति १२ एकया दशमेऽहनि १३ युवं दक्षमा नो बर्ही रिशादसो यं रक्षन्ति कथा राधाम ऋजुनीती नो मा कस्याद्भुतक्रनू मित्रो नो अत्यंहतिं महि वो महतां सोमस्य मित्रावरुणा ते नः सन्तु युजः प्र यो वां मित्रावरुणा महि घीणामित्येकपातिन्यः १४ काव्येभिरदाभ्या नो गन्तमिति तृचौ १५ सप्तचत्वारिंशन्मैत्रावरुण्यो गायत्र्यो दाशतयीषु तासां मैत्रावरुणः १६ चतुश्चत्वारिंशदैन्द्राणि गायत्राणि तेषां ब्राह्मणाच्छंसी १७ इहेन्द्राग्नी उप ह्वये तोशा वृत्रहणेति षलृचे १८ यत्सोम आ सुत इति द्वे १९ उप स्रक्वेष्वित्येका २० जुषेथां यज्ञमिति सप्त २१ षट्चत्वारिंशदैन्द्राग्न्यो गायत्र्यो दाशतयीषु तासामच्छावाकः २२ दशमादह्नः स्तोत्रिया विश्वजिति सर्वपृष्ठे २३ षष्ठस्याह्नः स्तोत्रियाननु-रूपान्कृत्वेतरेषां पञ्चानां स्तोत्रियाञ्छंसन्ति २४ आवृत्तानावृत्तस्तोमेषु २५ ऊर्ध्वानिकाहभूतस्य २६ पर्यासैः परिदधति २७ २

माध्यन्दिनेषु विकारः १ अन्त्यानि सूक्तान्युत्तरयोः सवनयोः पर्यासा इत्याचक्षते २ द्विषूक्ता मध्यन्दिनाः ३ चतुःसूक्तान्युक्थानि ४ अप प्राच इति सदा मैत्रावरुणस्योक्थमुखीया ५ शंसा महां यन्न इन्द्र इति द्वितीये ६ युध्मस्य ते कथा महामिति तृतीये ७ प्र वो महे महिवृधे भरध्वं यजामह इन्द्रमिति तृचौ ८ सद्यो हा न इन्द्रो दूरादा न आसादिति चतुर्थे ९ प्रो अस्मा उभे यदिन्द्रेति तृचौ १० गर्भे नु सन्का सुष्टुतिरिति पञ्चमे ११ इन्द्राय हि द्यौरिति तृचम् १२ आ नः स्तुत उप वाजेभिरूत्या सत्यो यात्विति षष्ठे १३ तदहीनसूक्तम् १४ मध्यमे त्र्यहे तृचाञ्छिल्पानीत्याचक्षते १५ यदन्यत्स्तोत्रियानुरूपाभ्यां तृचेभ्यश्च तत्प्रदेशे प्रतीयेत १६ यत्प्रथमयोरह्नोः शस्त्रं सर्वेषां तत्प्रथमे छन्दोमे १७ यत्तृतीयपञ्चमयोस्तन्मध्यमे १८ यच्चतुर्थषष्ठयोस्तदुत्तमे १९ त्वं महाँ इन्द्र तुभ्यं हेति यत्र होताहीनसूक्तं शंसेत् २० त्वे ह यत्पितरश्चिन्न इन्द्रेत्येकविंशतिश्छन्दोमेषु पुरस्तात्पर्यासस्य २१ मा चिदन्यद्वि शंसत मा भेम मा श्रमिष्मेत्यस्य स्तोत्रियानुरूपौ प्रगाथौ दशमेऽहनि २२ आ धूर्ष्वस्मा इति च द्विपदा २३ ३

कं नव्य इति ब्राह्मणाच्छंसिनोऽनुरूपादनन्तरः प्रगाथः कद्वानैकाहिकस्य स्थाने १ ब्रह्मणा त इति चोक्थमुखीया २ उदु ब्रह्माणीति सदा पर्यासः ३ वयं घ त्वा क ईं वेदेति स्तोत्रियानुरूपौ तृतीयेऽहनि ४ प्रथमयोश्च च्छन्दोमयोः ५ विपर्यस्तौ तु मध्यमे ६ यदिन्द्र प्रागपागुदगिति वा स्तोत्रियानुरूपौ प्रगाथौ ७ अध्वर्यवो भरतेन्द्रायेत्येकादश तृतीये ८ विश्वाः पृतना इति स्तोत्रियः । तमिन्द्रं जोहवीमि मत्स्यपायि ते महोऽस्मा अस्मा इत्यनुरूपः ९ कदा वसो स्तोत्रं यो वाचा विवाच इति तृचौ १० य एक इद्धव्य इति चतुर्थे ११ इन्द्रो मदाय मदेमदे हीति स्तोत्रियानुरूपौ १२ आ याहि कृणवाम यो न इन्द्राभित इति तृचौ १३ यस्तिग्मशृङ्ग इति पञ्चमे १४ सुरूपकृत्नुमिति स्तोत्रियानुरूपौ १५ त्वया वयं मघवन्निति तृचम् १६ अस्मा इदु प्र तवस इति षष्ठे १७ तदहीनसूक्तम् १८ श्रायन्त इव सूर्यं शग्ध्यू षु शचीपत इति स्तोत्रियानुरूपौ प्रगाथा उत्तमे छन्दोमे १९ त्वं महाँ इन्द्र यो हेत्यहीनसूक्तस्य स्थाने २० इन्द्रं स्तवेति च्छन्दोमेषु पुरस्तात्पर्यासस्य २१ उदु त्ये मधुमत्तमा उदिन्वस्य रिच्यत इति स्तोत्रियानुरूपौ प्रगाथौ दशमेऽहनि २२ त्रिकद्रुकेषु महिष इति वा स्तोत्रियः । उत्तमा च तमिन्द्रं जोहवीमि विश्वाः पृतना इत्यनुरूपः २३

रायस्काम इति च द्विपदा २४ ४

कदू न्वस्येत्यच्छावाकस्यानुरूपादनन्तरः प्रगाथः कद्वानैकाहिकस्य स्थाने १ उरुं न इति चोक्थमुखीया २ अभि तष्टेवेति सदा पर्यासः ३ त्वामिदा वयमेनमिदा ह्य इति स्तोत्रियानुरूपौ प्रगाथौ ४ अपूर्व्या पुरुतमानीति द्वितीये ५ तरणिरित्तिरोभिरिति स्तोत्रियानुरूपौ प्रगाथौ ६ य ओजिष्ठ इति तृतीये ७ यो राजा नकिष्टमिति स्तोत्रियानुरूपौ प्रगाथौ ८ सचायोरिन्द्र इन्द्र सोममिमं पिबेति तृचौ ९ सं च त्वे जग्मुरिति चतुर्थे १० स्वादोरित्थेत्था हि सोम इति स्तोत्रियानुरूपौ ११ यच्चिद्धि सत्याव यत्त्वं शतक्रतविति तृचौ १२ कदा भुवन् रथक्षयाणीति पञ्चमे १३ उभे यदिन्द्रेति स्तोत्रियानुरूपा १४ विदुष्टे अस्य वीर्यस्येति तिस्रः १५ शासद्वह्निरिति षष्ठे १६ तदहीनसूक्तम् १७ नकिष्टं न त्वा बृहन्त इति स्तोत्रियानुरूपौ प्रथमे छन्दोमे १८ उभयं शृणवदिति मध्यमे १९ यत इन्द्र भयामह इत्युत्तमे २० सर्वे प्रगाथाः २१ इच्छन्ति त्वेति च्छन्दोमेषु पुरस्तात्पर्यासस्य २२ अया बाजमिति च द्विपदा दशमे ऽहनि २३ ऐकाहिकं च पूर्वम् २४ ५

अन्तरेण प्रायणीयोदयनीयौ कद्वन्तौ चोक्थमुखीयाश्चाभितष्टीयं च बृहतीकारं च बार्हतानाम् १ अन्तरेणोक्थमुखीयां सूक्ते चावापस्थानम् २ पृष्ठ्यात्सूक्तान्यभिप्लवे ३ अहीनसूक्तानां स्थाने द्वितीयादह्नः सूक्तानि ४ उत्तरं मैत्रावरुणस्य ५ प्रथमात् त्र्यहात्स्वरसामसु ६ चतुर्विंशेऽभिजिति विषुवति बृहत्पृष्ठे विश्वजिति महाव्रते च षष्ठात् ७ विश्वजिति सर्वपृष्ठे ८ महानाम्नीनां मैत्रावरुणः स्तोत्रियानुरूपौ सप्रगाथौ ९ कद्वन्तं प्रगाथं वैरूपस्य ब्राह्मणाच्छंसी १० रेवतीनामच्छावाकः ११ वालखिल्या अविहृता मैत्रावरुणः षट् सूक्तानीन्द्रनिहवं परिहाप्या नो विश्वे सजोषस इति च प्रगाथम् १२ वृषाकपिमृते कुन्तापमन्यूङ्खं ब्राह्मणाच्छंसी १३ द्यौर्न य इन्द्रेत्येवयामरुतः स्थाने विष्णुन्यङ्गमच्छावाकः १४ अभूरेक इति सामसूक्तं मैत्रावरुणस्य १५ यो जात इति ब्राह्मणाच्छंसिनः १६ प्र घा न्वस्येत्यच्छावाकस्य १७ सामसूक्तानि शस्त्वाहीनसूक्तानि शस्त्वैकाहिकीभिः परिदधति १८ एकाहभूतस्यैकाहिकान्पर्यासानूर्ध्वमहीनसूक्तेभ्यः १९ ६

उक्थेषु क्रियमाणेषु वालखिल्या वृषाकपिं विष्णुन्यङ्गमित्युद्धृत्य परिशेषान्मध्यन्दिनेषु शंसन्ति १ षष्ठादह्न उक्थानि २ अथ यदि षष्ठाह्निकं तृतीयसवनमसर्वपृष्ठेऽहनि प्रदिष्टं स्याद्द्वितीयादह्न उक्थानि ३ परोक्षपृष्ठे प्रतिशिल्पानि क्रियन्ते ४ उद्धृत्य वालखिल्या मैत्रावरुणः पिबा सुतस्य रसिन इत्यैन्द्रान्प्रगाथाञ्छस्त्वा ५ वृषाकपिमुद्धृत्य ब्राह्मणाच्छंसीन्द्रो मदायेति पङ्क्तीरैन्द्रीः शंसति ६ विष्णुन्यङ्गमेवाच्छावाकः ७ इति परोक्षपृष्ठे ८ ७

अथ विश्वजिच्छिल्पे १ ऐकाहिकान्प्रगाथाञ्छस्त्वा वालखिल्या वृषाकपिं विष्णुन्यङ्गं नाभानेदिष्ठं च सर्वशस्तृचान्वा २ चतुर्ऋचं वालखिल्यानाम् ३ सामसूक्तानामहीनसूक्तानां पर्यासानां त्रींस्त्रींस्तृचान्होत्रकाः शंसन्ति ४ इति विश्वजिच्छिल्पे विकारः ५ निविद्धानीयांश्च तृचान् ६ युवोर्यदीति तृचम् ७ ये यज्ञेनेति च सूक्तम् ८ स्वस्ति नो मिमीतामिति तृचं निविद्धानीयम् ९ एवयामरुतश्च तृचम् १० यथास्तोमं प्रातःसवनम् ११ ८

त्रिवृद्दशरात्रस्य तृचक्लृप्तं शस्त्रम् १ आज्यानामाद्यांस्तृचान् २ निविद्धानानामुत्तमान् ३ एकैकामितरेषां सूक्तानां शिल्पानां च ४ षष्ठस्य तु समानं विश्वजिच्छिल्पेन शिल्पानाम् ५ नाभानेदिष्ठस्य ६ एवयामरुतश्च ७ यदि गवामयने ब्राह्मणाच्छंसिने प्राग्विषुवत ऐन्द्रेषु प्रगाथेष्वभीवर्तमन्वायातयेयुर्यस्मिन्स्तुवते स स्तोत्रियः श्वःस्तोत्रियोऽनुरूपः ८ यदि वा षट्प्रगाथेन ९ तृतीयेऽहनि बृहत्यः १० तं वो दस्मं तत्त्वा याम्यभि प्र वः प्र सुश्रुतमा त्वा सहस्रमा मन्द्रैरिन्द्र यो राजा नकिष्टं न त्वा बृहन्तस्त्वमिन्द्र यशास्त्वमिन्द्र प्रतूर्तिषु पिबा सुतस्य रसिनोऽध्वर्यो द्रावयेति वा ११ विषुवत्यादित्यव्रतम् १२ चित्रं देवानामिति स्तोत्रियानुरूपौ १३ विकर्णं वा १४ बणमहानुदु त्यद्दर्शतमिति स्तोत्रियानुरूपौ प्रगाथौ विकर्णस्य १५ इन्द्र क्रतुमिति वा स्तोत्रिय इन्द्र ज्येष्ठमित्यनुरूपः १६ पौरुमीळ्हं मानवं जनित्रं भारद्वाजं श्यैतनौधसे एतान्यभीवर्तस्थान इन्द्रक्रतावेवोर्ध्वं विषुवतः १७ ९

उक्थेषु विकारः १ अनुरूपादनन्तराण्यैन्द्राणि जागतान्यन्यानि नित्यानि वान्यत्र षष्ठान्नित्यानि २ प्र वो वाजाः प्र वः सखाय इति स्तोत्रियानुरूपौ ३ प्र सम्राजे बृहदिन्द्रा को वां वरुणेति मैत्रावरुणस्याहनि द्वितीये ४ आ वां

राजानाविति पर्यासस्तृतीयपञ्चमयोर्मध्यमे च छन्दोमे ५ पुनीषे वामितीतरेषु ६ प्र मंहिष्ठाय गायत प्र सो अग्न इति स्तोत्रियानुरूपौ प्रगाथौ ७ धीरा त्वस्येन्द्रावरुणा युवमध्वरायेति तृतीये ८ अग्निं वो वृधन्तमग्निं स्तोमेनेति स्तोत्रियानुरूपौ ९ रदत्पथः श्रुष्टी वां यज्ञ इति चतुर्थे १० आ ते अग्न इधीमहि सो अग्निर्यो वसुरग्निं तं मन्य इति स्तोत्रियः । आ ते अग्न ऋचेत्यनुरूपः ११ प्र शुन्ध्युवमिन्द्रावरुणा युवमध्वरायेति पञ्चमे १२ १०

द्विपदाः षष्ठे सर्वेषाम् १ अग्ने त्वं न इति स्तोत्रियः २ चतुर्थीं तृतीयां करोति ३ अग्ने भव सुषमिधेत्यनुरूपः ४ विहृताश्च वालखिल्याः ५ पच्छः प्रथमे सूक्ते विहरति ६ अर्धर्चशो द्वितीये ७ ऋक्छस्तृतीये ८ उत्तमे विपर्यस्येत् ९ आथा मोदैव मदे मोदा मोदैवो थो ३ इति विहृतासु प्रतिगृणाति १० अवसाने पूर्वं प्रणव उत्तरम् ११ तार्क्ष्यस्योत्तमां परिशिष्याहूय दूरोहणं यथा विषुवति १२ उत्तमामुपसंशस्यैकाहिकौ तृचौ १३ अस्माकमत्र पितरस्त आसन्निति तिस्रः १४ इन्द्रावरुणा युवमध्वरायेति षष्ठे १५ आ ते वत्सो मनो यमदाग्निरगामीति स्तोत्रियानुरूपौ प्रथमे छन्दोमे १६ पर्यासमन्तरेण त्रीणि च पूर्वाण्यैकाहिकानीमानि वां भागधेयानीति पञ्च युवां नरा पश्यमानास इति वा १७ प्रेष्ठं वः प्रियो नो अस्तु विश्पतिरिति मध्यमे १८ भद्रो नो यदी घृतेभिराहुत इत्युत्तमे प्रगाथौ १९ आ घा ये अग्निमिन्धत इमा अभि प्र णोनुम इति वा २० न हि ते क्षत्रमित्युभयोः सूक्तशेषः २१ इन्द्रा को वां वरुणेति मध्यमे २२ श्रुष्टी वां यज्ञ इत्युत्तमे २३ इमा उ वां भृमय इत्युभयोस्तिस्रः २४ ११

एवा ह्यसि वीरयुरेवा ह्यस्य सूनृतेति स्तोत्रियानुरूपौ १ यस्तस्तम्भेति षड् ब्राह्मणाच्छंसिनोऽहनि द्वितीये २ उत्तरयोश्छन्दोमयोर्मध्ये सूक्तानाम् ३ यो अद्रिभिदिति तृचं पूर्वं सर्वत्र पर्यासात् ४ अस्तेव सुप्रतरमिति पर्यासस्तृतीय-पञ्चमयोर्मध्यमे च च्छन्दोमे ५ अच्छा म इन्द्रमितीतरेषु ६ तं ते मदं तग्वभि प्र गायतेति स्तोत्रियानुरूपौ ७ अनर्वाणं वृषभमिति तृतीये ८ उदपुत इति चतुर्थे ९ प्रथमोत्तमयोश्च च्छन्दोमयोः १० षष्ठे चोर्ध्वं तृचेभ्यः ११ इन्द्राय साम गायत तग्वभि प्र गायतेति स्तोत्रियानुरूपौ १२ यज्ञे दिव इति पञ्चमे मध्यमे च च्छन्दोमे १३ इमा नु कमिति स्तोत्रियः । उत्तरे चाया वाजमिति

तृतीयानुरूपस्य १४ १२

अप प्राच इति सुकीर्तिं शस्त्वा पङ्क्तिशंसं वृषाकपिं मध्यमस्य पादस्य द्वितीयोत्तमयोरक्षरयोर्न्यूङ्खयति १ वैराजः पूर्वस्मिन्मदद्वृषाकपो३ श्रो३ अर्यः पुष्टेषु मत्सखेत्युत्तरस्मिन् २ उपरते प्रतिन्यूङ्खयति ३ वैराजन्यूङ्खमुक्त्वा मदथ मदैवो३ ओ३ ओथा मोदैवेति प्रतिगृणाति ४ तद्यत्रोपद्रुतमभिनिहितं प्रश्लिष्टं क्षिप्रसन्धिरिति न्यूङ्खनीयस्य पादस्यादौ स्यादुपातीत्य तद्द्वितीयेऽक्षरे न्यूङ्खयेच्छा न्वो३ इति यथा क्व स्यो३ इति च ५ अथ यत्र पञ्चालपदवृत्तिः स्याद्विवृत्तिप्रत्यये न्यूङ्खयेन्नो३ ओ३ इति ६ तं शस्त्वा कुन्तापम् ७ १३

इदं जना उप श्रुत नराशंस स्तविष्यते
षष्टिं सहस्रा नवतिं च कौरम आ रुशमेषु दद्महे १

उष्ट्रा यस्य प्रवाहिणो वधूमन्तो द्विर्दश
वर्ष्मा रथस्य नि जिहीलते दिव ईषमाणा उपस्पृशः २

एष इषाय मामहे शतं निष्कान्दश स्रजः
त्रीणि शतान्यर्वतां सहस्रा दश गोनाम् ३

प्र रेभासो मनीषा वृथा गाव इवेरते
अमोत पुत्रका एषाममोत गा उपासते ४

प्र रेभ धियं भरस्व गोविदं वसुविदम्
देवत्रेमां वाचं श्रीणीहीषुर्नावीरस्तारम् ५ १ १४

वच्यस्व रेभ वच्यस्व वृक्षे न पक्वे शकुनः
नष्टे जिह्वा चर्चरीति क्षुरो न भुरिजोरिव १

इन्द्रः कारुमबूबुधदुत्तिष्ठ वि चरा जरन्
ममेदुग्रस्य चर्कृधि सर्व इत्ते पृणादरिः २

इह गावः प्र जायध्वमिहाश्वा इह पूरुषाः
इहो सहस्रदक्षिणोऽपि पूषा नि षीदति ३

मेमा इन्द्र गावो रिषन्मो आसां गोपती रिषत्
मासाममित्रयुर्जन इन्द्र मा स्तेन ईशत ४

यदिन्द्रादो दाशराज्ञेऽमानुषं वि गाहथाः
विरूपः सर्वस्मा आसीत्सह यक्षमाय पत्यते ५ १ १५

त्वं वृषाक्षुं मघवन्नम्रं मर्याकरोरपि
त्वं रौहिणं व्यास्यो वि वृत्रस्याभिनच्छिरः १

प्रष्टिं धावन्तं हर्योरौच्चैःश्रवसमब्रुवन्
स्वस्त्यश्व जैत्रायेन्द्रमा वह सुस्रजम् २

अरंगरो वावदीति त्रेधा बद्धो वरत्रया
इरामु ह प्र शंसत्यनिरामप सेधति ३

त्वमिन्द्र शर्म रिणा हव्यं पारावतेभ्यः
विप्राय स्तुवते वसु नि दूरश्रवसे वहः ४

त्वमिन्द्र कपोताय च्छिन्नपक्षाय वञ्चते
श्यामाकं पक्वं पीलु च वारस्मा अकृणोर्बहु ५ १

चतस्रोऽतः पारिक्षित्यस्तासां तृतीये पादे प्रथमचतुर्थयोरक्षरयोर्वैस्वर्यम् २
१६

राज्ञो विश्वजनीनस्य यो देवो मर्त्यॉं अति
वैश्वानरस्य सुष्टुतिमा सुनोता परिक्षितः १

परिक्षिन्नः क्षेममकरुत्तम आसनमा चरन्

कुलायं कृरावन्कौरव्यः पतिर्वदति जायया २

कतरत्त श्रा हराणि दधि मन्थां परिस्रुतम्
जाया पतिं वि पृच्छति राष्ट्रे राज्ञः परिच्चितः ३

श्रभीव स्वः प्र जिहीते यवः पक्वः पथो बिलम्
जनः स भद्रमेधति राष्ट्रे राज्ञः परिच्चितः ४ १

श्रोथा मोदैवेति वैस्वर्ये प्रतिगृणाति २ एतशप्रलापोऽतो विंशतिपदस्तन्नि-
विच्छंसम् ३ १७

एता श्रश्वा श्रा प्लवन्ते १ प्रतीपं प्रातिसुत्वनम् २ तासामेका हरिक्लिका
३ हरिक्लिके किमिच्छसि ४ साधुं पुत्रं हिरगययम् ५ क्वाह तं परास्यः
६ यत्रामूस्तिस्त्रः शिंशपाः ७ परि त्रयः पृदाकवः ८ शृङ्गं धमन्त श्रासते
९ श्रलाबुकं निखातकम् १० कर्करिको निखातकः ११ कद्वात उन्मथायति
१२ कुलायं कृणवादिति १३ उग्रं वनिषदाततम् १४ न वनिषदनाततम्
१५ क एषां दुन्दुभिं हनत् १६ लेलिं हनत्कथं हनत् १७ पर्यागारं पुनः पुनः
१८ शफेन पीव श्रोहते १९ श्रायवनेन तेदनी २० १ १८

श्रादित्या ह जरितरङ्गिरोभ्योऽश्वं दच्चिणामनयन्
तां ह जरितर्न प्रत्यायंस्तामु ह जरितः प्रत्यायन्
तां ह जरितर्न प्रत्यगृभ्णांस्तामु ह जरितः प्रत्यगृभ्णान् १

श्रहादेत सन्नविचेतनानि यज्ञादेत सन्नपुरोगवासः
श्रादित्या रुद्रा वसवस्त्वेलत इदं राधः प्रति गृभ्णीह्यङ्गिरः २

इदं राधो बृहत्पृथु देवा ददतु यद्वरम्
तद्वो श्रस्तु सजोषणं युष्मे श्रस्तु दिवेदिवे । प्र त्वेव गृभायत ३

उत श्वेत श्राशुपत्वोत पद्याभिर्यविष्ठः
उतो श्राशु मानं बिभर्ति ४

इत्यादित्या अङ्गिरस्य ५ एवाह जरितरोथा मोदैव । तथाह जरितरोथा मोदैवेत्यासां प्रतिगृणाति ६ अवसाने पूर्वं प्रणव उत्तरम् ७ १९

पञ्चातो दिशां क्लृप्तयः १
यः सभेयो विदथ्यः सुत्वा यज्वाथ पूरुषः
सूर्यं चामू रिशादसस्तद्देवाः प्रागकल्पयन् १

यद्भद्रस्य पुरुषस्य पुत्रो भवति दाधृषिः
तद्विप्रो अब्रवीदु तद्गन्धर्वः काम्यं वचः २

यो जाम्या अप्रथयत्तद्यत्सखायं दुधूर्षति
ज्येष्ठो यदप्रचेतास्तदाहुरधरागिति ३

यश्च पणिरभुजिष्यो यश्च रेवाँ अदाशुरिः
धीराणां शश्वतामह तदपागिति शुश्रुम ४

ये च देवा अयजन्ताथो ये च परादुः
सूर्यो दिवमिव गत्वाय मघवानो वि रप्शते ५ २ २०

षलतो जनकल्पाः १
योऽनाक्ताक्षो अनभ्यक्तो अमणिवो अहिरण्यवः
अब्रह्माब्रह्मणः पुत्रस्तो ता कल्पेषु संमिता १

य आक्ताक्षः स्वभ्यक्तः सुमणिः सुहिरण्यवः
सुब्रह्मा ब्रह्मणः पुत्रस्तो ता कल्पेषु संमिता २

अप्रपाणा च वेशन्तारेवाँ अप्रददिश्च यः
अयभ्या कन्याकल्याणी तो ता कल्पेषु संमिता ३

सुप्रपाणा च वेशन्ता रेवान्सुप्रददिश्च यः

सुयभ्या कन्या कल्याणी तो ता कल्पेषु संमिता ४

परिवृक्ता च महिष्यनस्त्या चायुधिंगमः
अनाशुरश्चायामी तो ता कल्पेषु संमिता ५

वावाता च महिषी स्वस्त्या च युधिंगमः
स्वाशुरश्वा यामी तो ता कल्पेषु संमिता ६ २

चतस्त्रोऽतः प्रवल्हिकास्त्रयश्च प्रतीराधास्तन्निविच्छंसम् ३ २१

विततौ किरणौ द्वौ तावा पिनष्टि पूरुषः
न वै कुमारि तत्तथा यथा कुमारि मन्यसे १

मातुष्टे किरणौ द्वौ निवृत्तः पुरुषादृतिः
न वै कुमारि तत्तथा यथा कुमारि मन्यसे २

निगृह्य कर्णकौ द्वौ निरा यच्छसि मध्यमे
न वै कुमारि तत्तथा यथा कुमारि मन्यसे ३

उत्तानायै शयानायै तिष्ठन्नेवाव गूहसि
न वै कुमारि तत्तथा यथा कुमारि मन्यसे ४

श्लक्ष्णायां श्लक्ष्णिकायां श्लक्ष्णमेवाव गूहसि
न वै कुमारि तत्तथा यथा कुमारि मन्यसे ५

अव श्लक्ष्णमिव भ्रंशदन्तर्लोमवति ह्रदे
न वै कुमारि तत्तथा यथा कुमारि मन्यसे ६

यन्नयूनं यच्च अधिकं तत्सर्वमेवाव गूहसि
न वै कुमारि तत्तथा यथा कुमारि मन्यसे ७ १ १२

इहेत्थ प्रागपागुदगधरागरालागुदभर्त्सत
इहेत्थ प्रागपागुदगधराग्वत्साः प्रुपन्त आसते

इहेत्थ प्रागपागुदगधराक् स्थालीपाको वि लीषते
इहेत्थ प्रागपागुदगधराक् छिललीपु छिललीषते १

भुगित्यभिगतः । शलित्यपक्रान्तः । फलित्यभिष्ठितः २ अलाबूनि जरितः । पृषातकानि जरितः । पिपीलिकावटो जरितः । अश्वत्थपलाशं जरितः । श्वा जरितः । पर्णसदो जरितः । गोशफो जरितरित्येकैकमुक्त्वा नित्यं प्रतिगरम् ३

वीमे देवा अक्रंसताध्वर्यो क्षिप्रं प्र चर
सुसत्यमिट्गवामस्यसि प्र खुदसि ४

पत्नी यीयप्स्यमाना जरितरोथा मोदैव होता विष्टी मे जरितरोथा मोदैवेत्यस्यां प्रतिगृणाति ५ अवसाने पूर्वं प्रणव उत्तरम् ६ २३

अत ऊर्ध्वं दशाहनस्याः १
यद्देवासो ललामगुं प्र विष्टीमिनमाविषुः
सक्थ्ना देदिश्यते नारी सत्यस्याक्षिभुवो यथा १

यदस्या अंहुभेद्याः कृधु स्थूलमुपातसत्
मुष्काविदस्या एजतो गोशफे शकुलाविव २

यदा स्थूलेन पससाणौ मुष्का उपावधीत्
विष्वञ्चावस्या वर्धतः सिकतास्विव गर्दभौ ३

महानग्नी महानग्नं धावन्तमनु धावति
इमास्तु तस्य गा रक्ष यभ मामद्ध्योदनम् ४

महानग्नी कृकवाकुं शम्यया परि धावति

वयं न विद्म यो मृगः शीर्ष्णा हरति धाणिकाम् ५

महानग्न्युप ब्रूते स्वस्त्यावेशितं पसः
इत्थं फलस्य वृक्षस्य शूर्पं शूर्पं भजेमहि ६

महानग्न्युलूखलमतिक्रामन्त्यब्रवीत्
यथा तव वनस्पते नि घ्नन्ति तथा मम ७

महान्वै भद्रो बिल्वो महान्भद्र उदुम्बरः
महाँ अभिज्ञु बाधते महतः साधु खोदनम् ८

कपृन्नरो यद्ध प्राचीरिति द्वे २ तासां तृतीये पादे न्यूङ्खो यथा वृषाकपौ ३ कपृन्नर इति द्वितीयदशमयोरक्षरयोः ४ न्यूङ्खेनेतरासामवसाय संतानायोत्तमं पदम् ५ वि इ इ ई ३ किमयमिदमाहो ३ ओ३ ओथा मोदैवेति प्रतिगृणाति ६ २४

दधिक्राव्णो अकारिषमित्येका १ सुतासो मधुमत्तमाः प्र मंहिष्ठाय यो अद्रिभिदव द्रप्स इति तृचानि षष्ठे २ त्वं न इन्द्रा भर तदिन्द्राव आ भरेति स्तोत्रियानुरूपौ ३ सर्वं प्रमंहिष्ठीयं प्रथमे छन्दोमे ४ यो अद्रिभिदिति चैका ५ एन्द्र नो गध्येदु मध्वो मदिन्तरमिति मध्यमे ६ एतो न्विन्द्रं स्तवाम सखाय इत्युत्तमे ७ २५

इन्द्रं विश्वा इन्द्रमीशानमोजसेति स्तोत्रियानुरूपावनुरूपस्य ये पूर्वे ते उत्तरे १ नू मर्त इत्यच्छावाकस्यैन्द्रादनन्तरं द्वितीयचतुर्थयोः प्रथमोत्तमयोश्च च्छन्दो-मयोः २ विष्णोर्नु कमितीतरेषु ३ उरुं यज्ञायेति तृचं पूर्वं सर्वत्र पर्यासात् ४ सं वां कर्मणेति सदा पर्यासः ५ श्रुधी हवं तिरश्चया आश्रुत्कर्णेति स्तोत्रियानुरूपौ तृतीये ६ इममिन्द्र सुतं पिब पिबा सोमं मदाय कमिति चतुर्थे ७ असावि सोम इन्द्र त इममिन्द्र सुतं पिबेति पञ्चमे ८ प्र व इन्द्राय वृत्रहन्तमाय विश्वतो दावन्निति षष्ठे ९ एवयामरुतं शस्त्वा यथा वृषाकपिम् १० इह मदो३ इति वैराजन्यूङ्खमुक्त्वा मदे मधोर्मदस्य मदिरस्य मदैवो३ ओ३ ओथा

मोदैवेति प्रतिगृणाति ११ ऋतुर्जनित्री १२ तमस्य द्यावापृथिवी १३ विष्णोर्नु कम् १४ प्र वः पान्तमन्धसः १५ छन्दोमेषु च १६ तिस्रस्तु प्रथमे १७ भवा मित्र इति तृचाच्च पूर्वमुत्तरयोश्छन्दोमयोः १८ नू मर्तः परो मात्रयेत्युत्तमा-मुद्धृत्य षष्ठे १९ यदिन्द्र चित्र यदिन्द्र ते चतस्र इति स्तोत्रियानुरूपौ प्रथमे छन्दोमे २० पुरां भिन्दुरिति मध्यमे । पूर्वस्तृचोऽनुरूपस्तृतीया तु प्रथमा २१ गायन्ति त्वेत्युत्तमे २२ २६

चतुर्विंशे शस्त्रं प्रथमाच्छन्दोमात्सर्वेषाम् १ यच्चतुर्णां द्वितीयप्रभृतीनां तच्चतुर्णामाभिप्लविकानाम् २ तृतीयप्रभृतिभ्यः स्वरसामसु ३ अथ यद्यभिजितं विषुवन्तं बृहत्पृष्ठं विश्वजितं महाव्रतीयमहरित्युक्थ्यानि कुर्यश्चातुर्विंशिंकान्युक्थानि ४ अथ यदि पृष्ठ्याभिप्लवयोः प्रथमे अहनी दशममहरित्युक्थ्यानि कुर्युरैकाहिकान्युक्थानि ५ उत्तममाभिप्लविकमुक्थ्यं कुर्युर्यद्द्वितीयस्याह्नस्तृतीयसवनं तत्तृतीयसवनं तत्तृतीयसवनम् ६ २७

इति शाङ्खायनश्रौतसूत्रे द्वादशोऽध्यायः समाप्तः

पूर्वकारिणश्छन्दोगा अध्वर्यवः १ ते चेदनुपदिष्टं कुर्युः २ एतावत्त्व इष्टीनामानुपूर्व्ये हविषां दैवत उच्चैरुपांशुतायां चाध्वर्युमनुविदधीत ३ स्तोत्रिये छन्दोगमहर्योगे स्तोमविकारे पृष्ठे संस्थायां च ४ ते चेत्पादं वार्धर्चं वा विपर्यस्येयुरूनं वातिरिक्तं वा कुर्युर्न तदाद्रियेत ५ ऋचामेव विपर्यासमनुविदधीत ६ न्यूङ्खनीयश्चेत्पादो विकर्षेण पूर्येत तस्य संख्याय द्वितीयं न्यूङ्खनीयम् ७ ऊर्ध्वं तु स्वरात्समानच्छन्दोमानानि व्यञ्जनानि लुप्येरन् ८ १

आनीते पशौ मृतेऽनुपाकृतेऽन्यमालभेतर्त्विग्भ्यस्तं कारयेत् १ उपाकृते वेपमाने

यस्माद्भीषावेपिष्ठास्ततो नो अभयं कुरु
पशून्नः सर्वान्गोपाय नमो रुद्राय मील्हुषे

स्वाहेति जुहोति २ यस्माद्भीषावाशिष्ठा इति वाश्यमाने ३ यस्माद्भीषा-

पलायिष्ठा इति पलायमाने ४ यस्माद्भीषा न्यसद इत्युपविष्टे ५ यस्मा-द्भीषा संज्ञप्ता इति मृते ६ नष्टे मृते पलायिते वान्यं तद्रूपं तद्देवत्यं पशुमालभेत ७ मृतस्य वपां पुरोलाशमवदानानीतीतरस्य वषट्कारेषूपजुहुयात् ८ २ प्रवृत्तेषु सृते प्रयाजेषु तेनैव संस्थाप्यम् १ अवदाने नष्टे दुष्टे विमथिते वाज्यं प्रतिनिदध्यात् २ हृदयनाशेऽन्यमालभेत ३ यदि च कामयेतार्ति विमथितार ऋच्छेयुरिति कुविदङ्ग यवमन्त इत्याग्नीध्रीये जुहुयात् ४ अष्टापद्यां वशाया-मनूबन्ध्यायां गर्भस्य त्वचो वपारूपं फलीकरणानां फालीकरणान्गर्भमिति शामित्रे श्रपयित्वेतरस्य वषट्कारेषु शामित्र एव जुहुयात् ५ ३

यूपे विरूल्हेऽनपवृत्ते त्वाष्ट्रं बहुरूपमालभेत १ पिशङ्गरूपः सुभरो वयोधास्तन्नस्तुरीपमध पोषयित्नु देवस्त्वष्टा सविता विश्वरूप इति पुरोनुवाक्याः २ प्र सू महे सुशरणाय प्रथमभाजं देव त्वष्टर्यद्ध चारुत्वमानलिति याज्याः ३ ४

ज्ञानविषये विद्विषाणयोः सुत्ययोरह्नोः संनिपातनं संसव इत्याचक्षते १ पूर्वे प्रातरनुवाकमुपाकृत्य पूर्वे संस्थापयेयुः २ सुसमिद्धे जुहुयुः ३ संवेशायो-पवेशाय गायत्र्यै छन्दसेऽभिभृत्यै स्वाहेति प्रातःसवने ४ त्रिष्टुभे छन्दस इति माध्यन्दिने ५ जगत्यै छन्दस इति तृतीयसवने ६ अध्वर्युं मृतमिच्छन्प्रा-जापत्याभिस्तिसृभिरध्वर्युः प्रातःसवने जुहुयात् ७ होतारं होता माध्यन्दिने ८ उद्गातारमुद्गाता तृतीयसवने ९ ब्रह्माणं ब्रह्मानुसवनम् १० यजमानं यजमानोऽनुसवनम् ११ सर्वान्मृतानिच्छन्तः सर्वेऽनुसवनम् १२ बृहद्रथन्तरे कुर्युः १३ आभीकमाभीशवमभिनिधनमभीवर्तं च १४ कयाशुभीयं मरुत्व-तीयम् १५ सजनीयं निष्केवल्यम् १६ विहव्यो वैश्वदेवम् १७ पूर्वेषु संस्थापयत्सूत्तरां संस्थां कुर्वीत १८ अतिरात्रं कुर्वाणेषु द्विरात्रम् १९ द्विरात्रं कुर्वाणेषु त्रिरात्रम् २० तस्यां वा संस्थायां भूयसीर्दक्षिणा दद्यात् २१ स्रवन्त्यो वा विहरन्ति वायुराकाशश्च २२ ५

क्रीते सोमेऽपहृतेऽनतिनयन्कालमन्यमाहृत्याभिषुणुयात् १ सोमाहाराय सोमविक्रयिणे वा किंचिद्दद्यात् २ अनधिगम्यमाने पूतीकाञ्छ्वेतपुष्पा-ण्यर्जुनानि कुशान्वाभिषुत्य प्रतिदुहा प्रातःसवने श्रीणीयाच्छ्वतेन माध्यन्दिने

दध्ना तृतीयसवने ३ एकां गां दक्षिणाम् दत्त्वावभृथादुदेत्य पुनर्दीक्षेत ४ तत्र क्रतुदक्षिणा दद्यात् ५ एतदेव ६ अभिदग्धे पञ्च गा दक्षिणा दद्यात् ७ ६

प्रातःसवनात्सोमेऽतिरिक्ते १ अस्ति सोमो अयं सुत इति स्तोत्रियानुरूपौ होतुः २ ऐन्द्रावैष्णवीभिः स्तोममतिशंसेत् ३ ऐन्द्रावैष्णवी याज्या ४ इन्द्रमिद्गाथिनो बृहदतो देवा अवन्तु न इति षट् ५ उत्तमया परिधाय विष्णोः कर्माणि पश्यतेति यजति ६ ७

माध्यन्दिनादतिरिक्ते १ बण्महानुदु त्यद्दर्शतमिति स्तोत्रियानुरूपौ प्रगाथौ २ ऐन्द्रावैष्णवीभिः स्तोममतिशंसेत् ३ ऐन्द्रावैष्णवी याज्या ४ ८

तृतीयसवनादतिरिक्ते १ प्र तत्ते अद्य शिपिविष्ट प्र तद्विष्णुरिति स्तोत्रिया-नुरूपौ २ ऐन्द्रावैष्णवीभिः स्तोममतिशंसेत् ३ ऐन्द्रावैष्णवी याज्या ४ ९

आश्विनादतिरिक्ते १ आश्विनीभिः स्तोममतिशंसेत् २ आश्विनी याज्या ३ अस्तुतं चेत्पर्यायैरभिव्युच्छेत् पञ्चभिः स्तोमैर्हौत्रकेभ्यः स्तुवते ४ ते स्तोत्रियानुरूपाञ्छस्त्वोक्थमुखानां जगतीनां च द्वे द्वे शंसेयुः ५ नित्याः परिधानीयाः ६ कृत्स्नैर्वा प्रथमैः पर्यायैः ७ होत्रे वा प्रथमानां पर्यायाणाम् ८ मैत्रावरुणाय ब्राह्मणाच्छंसिने च मध्यमानाम् ९ अच्छावाकायोत्तमानाम् १० त्रीण्याश्विनं षष्टिशतानि ११ १०

यदि दीक्षितः प्रमीयेत दग्ध्वास्थीन्युपनह्य पुत्रं भ्रातरं वा दीक्षयित्वा सह यजेरन् १ अभिषुत्य वा राजानमगृहीत्वा ग्रहान्दक्षिणापरस्यां वेदिश्रोण्यामस्थिकुम्भं निधाय तस्मिन्देशे सार्पराज्ञीभिः पराचीभिः स्तुवते २ मार्जालीयदेशे वा ३ त्रिः प्रसव्यं मार्जालीयं परियन्ति सव्यानूरूनपाघ्नानाः ४ सार्पराज्ञीर्होता निगदेत् ५ असंमितं स्तोत्रम् ६ ऐन्द्रवायवाद्या ग्रहाः ७ संवत्सरेऽस्थीनि याजयेयुः ८ स्तोत्रेस्तोत्रेऽस्थिकुम्भमुपनिदधति ९ मार्जालीये भक्षान्निनयन्ति १० ११

कलशे दीर्णे विधुं दद्राणमिति वषट्कारनिधनेन ब्राह्मणाच्छंसिने स्तुवते १

पूर्वस्तृचोऽनुरूपः २ ग्राव्णि दीर्णे वृत्रस्य त्वा श्वसथादीषमाणा इति द्युतानेन मारुतेन ब्राह्मणाच्छंसिने स्तुवते ३ उत्तरोऽनुरूपः ४ ऐन्द्रावैष्णवीभिः स्तोममतिशंसेत् ५ ऐन्द्रावैष्णवी याज्या ६ अभ्युन्नीतं नाराशंसं हुताहुतस्य तृम्पतं हुतस्य चाहुतस्य च
अहुतस्य हुतस्य चेन्द्राग्नी अस्य सोमस्य

स्वाहेत्यन्तःपरिधि भस्मनि जुहोति ७ उपवाते नाराशंसे यं जघन्यं ग्रहं गृह्णीयात्तस्य हुतस्याल्पकमवनयेत्प्रजापतये स्वाहेति ८ दुष्टं सोमं प्राजापत्याभिश्वतसृभिरध्वर्युरुत्तरार्धपूर्वार्ध उपरवेऽवनयेत् ९ कृत्स्नं वेदममृतमन्नाद्यमागमिति ध्यायन्नववृष्टस्य भक्षयेदिन्दुरिन्द्रमवागात्तस्य त इन्दविन्द्रपीतस्योपहूतस्योपहूतो भक्षयामीति १० हिरण्यगर्भ इत्यभ्युपाकृते चमसे जुहुयात् ११ अवच्छाद्य च निर्हरेत् १२ य ऋते चिदिति तृचेन महावीरं भिन्नमनुमन्त्र्य

त्रयस्त्रिंशत्तन्तवो ये वितत्निरे य इमं यज्ञं स्वधया भजन्ते
तेषां छिन्नं समिमं दधामि स्वाहा घर्मो अप्येतु देवान्

यज्ञस्य दोहो विततः पुरुत्रा सो अष्टधा दिवमन्वाततान
स यज्ञ धुक्ष्व महि मे प्रजायै रायस्पोषं विश्वमायुरशीय

स्वाहेति चाहुती जुहोति १३ १२

यदि सत्राय दीक्षितोऽथ साम्युत्तिष्ठेत्सोममपभज्य राजानं विश्वजितातिरात्रेण यजेत सर्वस्तोमेन सर्वपृष्ठेन सर्ववेदसदक्षिणेन १ आगूर्य वा २ १३

आहिताग्नय इष्टप्रथमयज्ञा दीक्षिता गृहपतिसप्तदशाः सत्रमासीरन्होता मैत्रावरुणोऽच्छावाको ग्रावस्तुद्ब्रह्मा ब्राह्मणाच्छंसी पोताग्नीध्र उद्गाता प्रस्तोता प्रतिहर्ता सुब्रह्मण्योऽध्वर्युः प्रतिप्रस्थाता नेष्टोन्नेता १ आर्त्विज्यस्याविप्रतिषधेनाशक्ये यौगपद्ये २ दीक्षणानुपूर्व्येण सर्वेषां याजमानम् ३ मुख्यः कुर्यात्परार्थानि ४ कल्पविप्रतिषेधे भूयसां साधर्म्यम्

५ हुतेषु दाक्षिणेषु दक्षिणापथेन कृष्णाजिनानि धून्वन्तोऽहरहरित्या- व्रजेयुरिदमहं मां कल्याण्यै कीर्त्यै स्वर्गाय लोकायामृतत्वाय दक्षिणां नयानीति ६ उत्थाय चाग्निष्टोमः सहस्रदक्षिणः पृष्ठशमनीयः ७ साधारणं हैके पृष्ठशमनीयम् ८ द्वादशाहप्रभृतीन्या चत्वारिंशद्रात्रादेकोत्तराणि रात्रि- सत्राणि तेषु नित्यः ९ द्वादशाहो यैरहोभिर्विवर्धते तान्युदाहरिष्यामः १० १४

एकाहार्थे महाव्रतमाहरन्ति १ सरवस्तोमं वातिरात्रम् २ अन्तरेण पृष्ठ्यं छन्दोमांश्च ३ द्व्यहार्थे गोआयुषी ४ द्वितीयं तृतीयं चाभिप्लविके प्रतीयेतैतस्यां चोदनायाम् ५ त्र्यहार्थे त्रीणि पूर्वाण्याभिप्लविकानि ६ चतुरहार्थे महाव्रतचतुर्थानि ७ पञ्चाहार्थे पञ्च ८ षलहार्थे षट् ९ सप्ताहार्थे महाव्रतसप्तमानि १० एतेन न्यायेन तांतां सङ्ख्यां पूरयन्ति ११ अन्तरेण प्रायणीयं पृष्ठ्यं चैतेषां स्थानम् १२ ऊर्ध्वं तु दशमादह्नो महाव्रतस्य स्थानम् १३ १५

अथैतान्यपवदन्ति १ अभिप्लवोऽभिजिद्विश्वजितौ चागन्तूनि विंशतिरात्रे २ अभिप्लवोऽतिरात्रो द्वावभिप्लवावित्येकविंशतिरात्रः पूर्वः ३ पृष्ठ्यः स्वरसामानो विषुवानावृत्ताः स्वरसामानस्त्रयस्त्रिंशारम्भणः पृष्ठ्य इत्युत्तरः ४ पृष्ठ्यस्तोमः षलहः । त्रयस्त्रिंशमहरनिरुक्तम् । तस्य कण्वरथन्तरं माध्यन्दिने । त्रयस्त्रिंशं निरुक्तम् । त्रिणवम् । द्वे एकविंशे । त्रिणवम् । त्रयस्त्रिंशं निरुक्तम् । त्रयस्त्रिंशमहरनिरुक्तम् । त्रयस्त्रिंशारम्भणः पृष्ठ्यस्तोमः षलहः त्रिवृदहरनिरुक्तम् । ज्योतिष्टोमोऽग्निष्टोमः इति चतुर्विंशतिरात्रः संसदामयन- मित्याचक्षते ५ १६

पञ्चाभिप्लविकानि त्रिरुपेत्य विश्वजिदतिरात्र एष एव पञ्चाहो दशरात्र इति त्रयस्त्रिंशद्रात्रः १ चतुर्विंशमभिप्लवः पृष्ठ्यो नवाहो गोआयुषी दशरात्रो महाव्रतमिति सप्तत्रिंशद्रात्रः २ चतुर्विंशं त्रयोऽभिप्लवाः । अभिजित्स्वर- सामानो विषुवानावृत्ताः स्वरसामानो विश्वजिच्च । अभिजित्प्रभृति नवरात्र इत्याचक्षते । अभिप्लवो गोआयुषी दशरात्रो महाव्रतम् । इत्येकान्नपञ्चा- शद्रात्रः । संवत्सरसंमितः ३ १७ अथैकषष्टिरात्रे १ अभितो नवरात्रं पृष्ठ्यौ २ तयोरावृत्त उत्तरः ३ न्यायक्लृप्तः शतरात्रः ४ अर्धपञ्चदशाभिप्लवास्तेषां

प्रथमस्त्यहो दशरात्रो महाव्रतमिति ५ १८

सप्तदश गवामयनस्य दीक्षाः १ द्वादश वा २ तैषस्यामावास्याया एकाह उपरिष्टाद्दीक्षेरन्माघस्य वा ३ तेषां माघस्यामावास्यायामुपवसथः फाल्गुनस्य वा ४ द्वादश दीक्षाः कुर्वा णाश्चतुरहे पुरस्तात्पौर्णमास्या दीक्षेरन् ५ तेषां ज्यौत्स्नस्य पञ्चम्यां प्रसवः ६ प्रायणीयमतिरात्रमुपेत्य चतुर्विंशं च पृष्ठ्यपञ्च-मांश्चतुरोऽभिप्लवानुपयन्ति ७ स मासः ८ तथायुक्तान्पञ्च मासानुपेत्य पृष्ठ्यचतुर्थानभिप्लवानुपयन्ति ९ नवरात्रं च १० ऊर्ध्वं विश्वजितः पृष्ठ्यारम्भणान्मासानुपयन्ति ११ पृष्ठ्याभिप्लवौ चान्वहमावर्तेते १२ वैश्वदेवसूक्तानि चोत्तमानामाभिप्लविकानाम् १३ पृष्ठ्यमुपेत्य त्रीनभिप्लवान् १४ स मासः १५ पृष्ठ्यमुपेत्य चतुरोऽभिप्लवान् । तथायुक्तांश्चतुरो मासानुपेत्य त्रीनभिप्लवानुपयन्त्यायुर्गां दशरात्रं महाव्रतमतिरात्रं च १६ इति गवामयनस्याहर्योगः १७ तत्प्रकृतीनि संवत्सरमत्राणि १८ तेषु विकारो ऽन्यत्र दशरात्रात् १९ पृष्ठ्यस्याभिप्लवः स्थाने तदभिप्लवायनम् २० १९

उत्सर्गिणामयने १ यानि पौर्णमासीभिः सुत्यान्यहानि संनिपतेयुस्तान्युत्सृजेरन् २ उभाभ्यां वा दर्शपूर्णमासाभ्याम् ३ एकत्रिकं वा स्तोमं कुर्वीरन् ४ एकैकां वा स्तोत्रियाणामुत्सृजेरन् ५ शस्त्राणाम् ६ यजुषां च ७ अहरुत्सृजमानाः प्राजापत्येन तदहः पशुना यजेरन् ८ यद्देवतो वा सवनीयः स्यात् ९ तत्र पशुतन्त्रे हवींष्यन्वायातयन्ति १० तेषां स धर्मो यः पशुतन्त्रे चोद्यमानानाम ११ परस्याह्नः स्तोत्रियाननुरूपान्कुर्वीरन् १२ यथार्थमतिप्रैषः १३ उत्थाय च द्वादशाहमासीरन् १४ उभयोरुत्सृजमानाः संसदामयनम् १५ २०

आदित्यानामयने १ त्रिवृत्पञ्चदशावभिप्लवस्तोमौ पूर्वस्मिन्पटले २ पञ्चदश-त्रिवृता उत्तरस्मिन् ३ मध्येपृष्ठ्याश्च मासाः ४ षष्ठे मासि त्रीनभिप्लवानुपेत्य पृष्ठ्यमुपयन्ति नवरात्रं च ५ अभिजितः स्थाने बृहस्पतिसवम् ६ इन्द्रस्तोमं विश्वजितः ७ पृष्ठ्यमुपेत्याभिप्लवं च व्यूल्हच्छन्दसं दशरात्रं ८ त्रिवृत्स्तोम-मग्निष्टोमसंस्थम् ९ उद्भिद्बलभिदौ च १० मध्येपृष्ठ्यांश्चतुरो मासानुपेत्य मध्येपृष्ठ्यावभिप्लवा उपयन्ति ११ गोआयुषी १२ छन्दोमदशाहं च १३ २१

अङ्गिरसामयने १ त्रिवृदभिप्लवस्तोमः २ पृष्ठ्यारम्भणान्मासानुपयन्ति पूर्वस्मिन्पटले ३ पृष्ठ्योदयानुत्तरस्मिन् ४ आयुर्गाम् ५ समानमन्यदा-दित्यानामयनेन ६ २२

दृतिवातवतोरयने १ पृष्ठ्यस्तोमानामेकैकेन मासम् २ महाव्रतं विषुवान् ३ आवृत्तानां पृष्ठ्यस्तोमानामेकैकेन मासम् ४ अतिरात्रावभितः ५ अग्निष्टोमा मध्ये ६ दशदशी सवत्सरः ७ द्वादशी विषुवान्सर्पसत्त्रस्य ८ २३

मासं दीक्षाः कौण्डपायिनामयनस्य १ क्रीत्वा राजानमुपनह्योपसद उपेत्याग्निहोत्रेण मासम् २ दर्शपूर्णमासाभ्यां मासम् ३ चातुर्मास्यपर्वणा-मेकैकेन मासम् ४ त्रिवृत्प्रभृतीनां पञ्चानां पृष्ठ्यस्तोमानामेकैकेन मासम् ५ अष्टादशाहं त्रयस्त्रिंशेन दशरात्रं महाव्रतमतिरात्रं चेति ६ यो होता सोऽध्वर्युः स पोता ७ यो मैत्रावरुणः स ब्रह्मा स प्रतिहर्ता ८ य उद्गाता सोऽच्छावाकः स नेष्टा ९ यः प्रस्तोता स ब्राह्मणाच्छंसी स ग्रावस्तुत् १० यः प्रतिप्रस्थाता सोऽग्नीत्स उन्नेता ११ सुब्रह्मण्यः सुब्रह्मण्यः १२ गृहपतिर्गृहपतिः १३ देशकालसंनिकर्षेऽवैदेश्याप्रधानस्य वशं नयेत् १४ यथादेशमितराणि १५ एकाहः संघातमापद्यमानो लभेत तायमानरूपाणि १६ सांघातिकादेका-हीभवतो निवर्तेरन् १७ अयंयज्ञीयातिप्रैषः सपुरोनुवाक्यः श्वःस्तोत्रिया होत्र-काणां कद्वन्त उक्थमुखीयाश्चाभितष्टीयमिति तायमानरूपाणि १८ गवामेवायनस्याहर्योगः १९ २४

चतुरो मासान्दीक्षाः १ चतुर उपसदः २ चतुरः सुन्वन्तीति ३ गवामयनस्य प्रथमोत्तमौ मासौ ४ अष्टाविंशिनौ च विषुवांश्च ५ तत् क्षुल्लकतापश्चितमित्याचक्षते ६ २५

संवत्सरं दीक्षाः १ संवत्सरमुपसदः २ संवत्सरं सुन्वन्तीति ३ तत्तापश्चित-मित्याचक्षते ४ २६

त्रीन्संवत्सरान्दीक्षाः १ त्रीनुपसदः २ त्रीन्सुन्वन्ति ३ इति महातापश्चितम्

४ अभ्यासो बहुसंवत्सरे गवामयनस्य ५ संहार्यान्वा परिहाप्य ६ अतिरात्रः सहस्रमहान्यतिरात्रोऽग्नेः सहस्रसाव्यम् ७ २७

गवामयनं प्रथमः संवत्सरः १ अथादित्यानाम् २ अथाङ्गिरसाम् ३ त्रिसांवत्सरं प्रजातिकामानाम् ४ त्रिवृत्प्रभृतीनां चतुर्णां पृष्ठ्यस्तोमानामेकैकेन त्रींस्त्रीन्संवत्सरान्प्रजापतेर्द्वादशसंवत्सरम् ५ एतेषामेवैकैकेन नवनव शाक्त्यानां षट्त्रिंशत्संवत्सरम् ६ एतेषामेवैकैकेन पञ्चविंशतिःपञ्चविंशतिः साध्यानां शतसंवत्सरम् ७ एतेषामेवैकैकेन पञ्चपञ्च पञ्चाशतो विश्वसृजां सहस्रसंवत्सरम् ८ २८

सरस्वत्या विनशने दीक्षा सारस्वतानाम् १ क्रीत्वा राजानमुपनह्योपसद उपेत्य । प्रायणीयमतिरात्रमुपेत्य । इष्ट्वा सांनाय्येनाध्वर्युः शम्यां परास्य । तत्र गार्हपत्यं निधाय षट्त्रिंशत्प्रक्रमेष्वाहवनीयमभ्यादधाति २ चक्रीवत्सदः ३ तथाग्नीध्रम् ४ उलूखलबुध्नो यूपः ५ नोपरवान्खनन्ति ६ तमेतमापूर्यमाणपक्षमामावास्येन यन्ति ७ तेषां पौर्णमास्यां गौरुक्थ्यो बृहत्सामा ८ तमेतमपक्षीयमाणपक्षं पौर्णमास्येन यन्ति ९ तेषाममावास्याया-मायुरुक्थ्यो रथन्तरसामा १० प्रतीपं पूर्वेण पक्षसा यन्ति ११ अपोनप्त्रियं चरुं निरुप्य १२ तदस्यानीकमस्मिन्पद इत्यपोनप्त्रियस्य १३ अप्यये दृषद्वत्याः १४ सरस्वतीमपि यन्ति १५ शते गोष्वृषभमप्युत्सृजन्ति १६ यदा सहस्रं संपद्यतेऽथोत्थानम् १७ सर्वेषु वोपहतेषु १८ गृहपतौ वा मृते १९ प्लाक्षं वा प्रस्रवणं प्राप्याग्नये कामायेष्टिं निर्वपन्ति २० तस्यामश्वां च पौरुषीं च धेनुके दत्त्वा कारपचवं प्रति यमुनामवभृथमभ्यवयन्ति २१ इति मित्रा-वरुणयोरयनम् २२ अतिरात्रोऽभिजिद्विश्वजितौ गोआयुषी इन्द्रकुक्षी अतिरात्रः २३ इतीन्द्राग्न्योः २४ अतिरात्रो ज्योतिर्गौरायुर्विश्वजिदभिजिताविन्द्रकुक्षी अतिरात्रः २५ इत्यर्यम्णः २६ संवत्सरं ब्राह्मणस्य गा रक्षेत् १७ संवत्सरं व्यर्णे नैतंधवेऽग्निमिन्धीत २८ संवत्सरे परीणह्यग्नीनाधाय दृषद्वत्या दक्षिणेन तीरेणाग्नेयेनाष्टाकपालेन शम्यापरासेशम्यापरासे यजमान एति २९ त्रिःप्लक्षां प्रति यमुनामवभृथमभ्यवयन्ति ३० इति दार्षद्व्रतम् ३१ अतिरात्रः सहस्रं त्रिवृतः संवत्सरा अतिरात्रः प्रजापतेः सहस्रसंवत्सरं सहस्रसंवत्सरम् ३२ २९

इति शाङ्खायनश्रौतसूत्रे त्रयोदशोऽध्यायः समाप्तः

एकाहेष्वहीनेषु च प्रकृतेर्विकारः १ यस्मिन्नहनि यदहः प्रदिश्येत सवनं वा सहौत्रं तत् २ ऐकाहिकमनादेशे ३ १

अग्न्याधेयेन ब्रह्मवर्चसकामो यजेत १ तस्याष्टास्वष्टासु स्तोत्राणि २ अष्टाक्षरा गायत्री ३ तेजो ब्रह्मवर्चसं गायत्री ४ रथन्तरं पृष्ठम् ५ ब्रह्म रथन्तरम् ६ अग्निष्टोमो यज्ञः ७ ब्रह्म वा अग्निष्टोमः ८ एतेन त्रिःसमृद्धेन ब्रह्मणा तेजो ब्रह्मवर्चसमाप्नोति ९ तृचक्लृप्तं शस्त्रम् १० त्रिवृद्वा अन्नमन्नं पानं खादयन्ति तस्य सर्वस्याप्त्यै ११ चतुर्विंशतिर्दक्षिणा १२ चतुर्विंशतिर्वै संवत्सर-स्यार्धमासाः संवत्सरस्यैवाप्त्यै १३ तस्याग्नये पवमानाय पावकाय शुचय इति पशव उपालम्भ्याः सवनीयस्य १४ आदित्या वशानूबन्ध्याया उपालम्भ्यैवंविधा १५ तद्यदेवं पशवो नियुक्ता भवन्ति नेदग्न्याधेयादयानीति १६ तस्य प्रातः सवनीयाननु पुरोलाशानग्नये पवमानायाष्टाकपालं पुरोलाशं निर्वपति १७ माध्यन्दिनीयाननु पुरोलाशानग्नये पावकाय १८ तृतीय-सवनीयाननु पुरोलाशानग्नये शुचये १९ आवपनं वै सवनीयाः पुरोलाशाः आवपन एव तदावपति २० अथ यदादित्या वशानूबंध्याया उपालम्भ्या भवत्यदितिं वा अन्वग्न्याधेयं संतिष्ठते २१ या न्वग्न्याधेयस्य संस्था तामेव तद्यज्ञस्य संस्थां करोति २२ २

एवं पशवः पुरोलाशाश्चान्वायात्यन्ते हविर्यज्ञेषु सोमेषु १ तस्य शस्त्रम् २ यद्वाहिष्ठमिति तृचमाज्यम् ३ माधुच्छन्दसः प्रउगः ४ त्रयस्त्रयस्तृचा होत्रकाणां प्रातःसवने स्तोत्रियानुरूपौ पर्यासश्च ५ इन्द्र मरुत्व इह पाहि सोममिति तृचं मरुत्वतीयम् ६ नृणामु त्वा नृतमं गीर्भिरुक्थैरिति तृचं निष्केवल्यम् ७ अध्वर्यो वीर प्र महे सुतानामिति तृचं मैत्रावरुण-स्योक्थमुखीयम् ८ पूर्वं ब्राह्मणाच्छंसिनः ९ उत्तरमच्छावाकस्य १० पर्यासानामुत्तमान् ११ उदु ष्य देवः सविता हिरण्यया । घृतवती भुवनानाम् । इन्द्र ऋभुभिर्वाजवद्भिः । स्वस्ति नो मिमीताम् । वैश्वानरं मनसा । प्र यन्तु वाजाः । समिद्धमग्निं समिधा गिरा गृण इति तृचानि वैश्वदेवाग्निमारुतयोः सूक्तानां स्थाने १२ तृचक्लृप्तमित्येतस्यां चोदनाया-

मेतच्छस्त्रं प्रतीयेत १३ ऐकाहिकं वा तृचक्लृप्तम् १४ एतेनाग्निहोत्रौ व्याख्यातौ १५ आग्नेयं पयः पूर्वस्मिन् १६ सौर्यमुत्तरस्मिन् १७ पशू च १८ प्राजापत्या वशानूबन्ध्याया उपालम्भ्यैवंविधा १९ ३
पुनराधेयेन तेजस्कामो यजेत १ तस्य पञ्चसुपञ्चसु स्तोत्राणि २ पञ्चपदा पङ्क्तिः ३ पाङ्क्तो वै यज्ञः ४ यज्ञस्यैवाप्त्यै ५ सर्वाग्नेयादग्निष्टुतः शस्त्रम् ६ ४

दर्शपूर्णमासावन्नाद्यकामस्य १ इलादधावाग्रयणः सोमेष्टिश्चाप्रवर्ग्यः २ दाक्षायणयज्ञाश्चत्वारः सर्वकामस्य ३ महायज्ञश्च ४ तस्मिंश्चातुर्मास्यहवींष्यन्वायात्यन्ते ५ पशवश्च पर्वदेवताभ्यः ६ एककपालदेवताभ्यश्चानूबन्ध्याया उपालभ्या एवंविधाः ७ अतिरात्रो यज्ञः ८ ५

प्रजापतिर्ह प्रजातिकामस्तपस्तप्त्वैतं यज्ञक्रतुमपश्यद्वैश्वदेवम् । तमाहरत् । तेनायजत । तेनेष्ट्वा प्राजायत । तेन प्रजातिकामो यजेत १ वैश्वदेवः पशुरुपालम्भ्यः सवनीयस्य २ द्यावापृथिवीया वशानूबन्ध्याया उपालम्भ्यैवंविधा ३ त्रिवृतः शस्त्रम् ४ तृचक्लृप्तं वा ५ अवभृथादुदेत्योदवसानीययेष्ट्वा मुनिसत्त्रेष्ट्या यजमान आस्तेऽहरहश्चतुरो मासानाग्नेय्याग्नावैष्णव्या वान्तरालेषु ६ सैव तत्र दीक्षा ७ ६

वैश्वदेवेन वै प्रजापतिः प्रजा असृजत । ताः सृष्टा अप्रसूता वरुणस्य यवाञ्जक्षुः ताः वरुणो वरुणपाशैः प्रत्यमुञ्चत् । ताः प्रजाः प्रजापतिं पितरमेत्योपाधावन् उप तं यज्ञक्रतुं जानीहि येनेष्ट्वा वरुणपाशेभ्यः सर्वस्माच्च पाप्मनः संप्रमुच्येमहीति । तत एतं प्रजापतिश्चतुर्थे मासि द्विरात्रं यज्ञक्रतुमपश्यद्वरुणप्रघासम् तमाहरत् । तेनायजत । तेनेष्ट्वा वरुणमप्रीणात् । स प्रीतो वरुणो वरुणपाशेभ्यः सर्वस्माच्च पाप्मनः प्रजाः प्रामुञ्चत् । प्र ह वा अस्य प्रजा वरुणपाशेभ्यः सर्वस्माच्च पाप्मनः संप्रमुच्यते य एवंविद्वान्वरुणप्रघासैर्यजते १ उक्थ्यौ भवतः २ वारुणः पशुरुपालम्भ्यः सवनीयस्य पूर्वस्मिन् ३ मारुत उत्तरस्मिन् ४ कायी वशानूबन्ध्याया उपालम्भ्यैवंविधा ५ ७

ताः प्रजाः प्रजापतिमब्रुवन्कस्मै नु नोऽन्नाद्यायासृष्ठा इति । तत एतं प्रजापतिश्चतुर्थे मासि त्रिरात्रं यज्ञक्रतुमपश्यत्साकमेधम् । तमाहरत् ।

तेनायजत । तेनेष्ट्वान्नाद्यमाप्नोत् । तेनान्नाद्यकामो यजेत १ अग्निष्टोम उक्थ्यो ऽतिरात्रः २ अग्नयेऽनीकवते प्रथमे पशुरुपालम्भ्यः सवनीयस्य ३ मरुद्भ्यः सांतपनेभ्यो द्वितीये ४ माहेन्द्रस्तृतीये ५ वैश्वकर्मणी वशानूबन्ध्याया उपालम्भ्यैवंविधा ६ ऐकाहिकं यथा पृष्ठ्यं शस्त्रम् ७ पृष्ठ्यो वा विहृतः ८ विश्वजितो वा बृहत्पृष्ठात्तृतीयेऽहनि शस्त्रम् ९ सौत्रामणे च १० आयुष्कामयज्ञे महायज्ञे ११ विनुत्त्यभिभृत्योः १२ स्वर्जिति १३ इन्द्रवज्रे च १४ ८

ताः प्रजाः प्रजापतिमब्रुवन्कस्यै नु नः प्रतिष्ठाया असृष्टा इति । तत एतं प्रजापतिर्यज्ञक्रतुमपश्यच्छुनासीरीयम् । तमाहरत् । तनायजत । तेनेष्ट्वा प्रत्यतिष्ठत । तेन प्रतिष्ठाकामो यजेत १ शुनासीरीयः पशुरुपालम्भ्यः सवनीयस्य २ सौरी वशानूबन्ध्याया उपालम्भ्यैवंविधा ३ विंशतिं वैश्वदेवे ददाति ४ त्रिंशतं वरुणप्रघासेषु ५ पञ्चाशतं साकमेधेषु ६ विंशतिं शुनासीरीये ७ तद्विंशतिशतम् ८ विंशतिशतं वा ऋतोरहानि ९ तदृतुमाप्नोति १० ऋतुना संवत्सरम् ११ ये च संवत्सरे कामाः १२ ९

पशुमत्सु चातुर्मास्येषु १ पूर्वेद्युः पाशुकं कर्म २ अपरेद्युर्वैश्वदेवः पशुः ३ पशुपुरोलाशमनु चातुर्मास्यदेवता यथापर्व ४ पाशुकः स्विष्टकृत् ५ निगमस्यानवर्जम् ६ यथास्थानं वाजिनम् ७ हृदयशूलान्तं संतिष्ठते ८ वारुणमारुतौ वरुणप्रघासेषु ९ उत्तरे यूपमुच्छ्रयन्ति १० माहेन्द्रशुनासीरीया उत्तरयोः ११ यथास्थाना इष्टयः १२ पित्र्या च १३ यथादेवतं वा पशवः १४ तद्व्याख्यातमेकादशिन्या १५ आनीकवतः सांतपनो गृहमेधीयः क्रीलिनो मैत्रश्च महाहविषि १६ पर्वणिपर्वणि वा संस्थित ऐन्द्राग्नः १७ समानमनन्यत् १८ अथवाप्येकपर्वण्येकपशौ चैन्द्राग्ने पराञ्चि हवींषि १९ उपहूयेलां पित्र्या २० त्र्यम्बकादूर्ध्वमनुयाजप्रभृति । मनोतादिपशुना वा २१ सौमिकैः समानदक्षिणानि सर्वपशूनि २२ चातुर्मास्यपशुदक्षिणैः पाशुकानि २३ १०

प्रत्यवरोहणीयः प्रतिष्ठाकामस्य १ संकल्पविकृतो ज्योतिष्टोमः २ पशुबन्धः पशुकामस्य ३ एकादशस्तोमः ४ एकादशाक्षरा त्रिष्टुप् ४ त्रैष्टुभाः पशवः ६ पशूनामेवाप्त्यै ७ पिबा सोममभि यमुग्र तर्द एतायामोप गव्यन्त इन्द्रमिति

निविद्धाने ८ ऊर्वं गव्यं महि गृणान इन्द्रैतायामोप गव्यन्त इन्द्रमिति गोसस्तवे तदेतस्याह्नो रूपम् ९ उद्भिद्बलभिदोर्गोसवे च १० ११

अथातः सौत्रामणः १ इन्द्रो हायुष्कामस्तपस्तेपे । स तपस्तप्त्वैतं यज्ञक्रतुमयश्यत्सौत्रामणम् । तमाहरत् । तेनायजत । तेनेष्ट्वा दीर्घायुत्वमगच्छत् । तमु ह भरद्वाजाय जीर्णाय प्रोवाच । अनेन वा अहमिष्ट्वा दीर्घायुत्वमगच्छमनेनापि त्वं यजेति । तेन ह भरद्वाज इष्ट्वा सर्वायुत्वमगच्छत् । सर्वमायुरेति य एवं वेद य उ चैनेन यजते २ तस्य रथन्तरं पृष्ठम् ३ अग्निष्टोमो यज्ञः ४ यथाश्रद्धं दक्षिणा ५ तस्य त्रीणि त्रिवृन्ति स्तोत्राणि ६ त्रीणि पञ्चदशानि ७ त्रीणि सप्तदशानि ८ त्रीण्येकविंशानीति ९ उत्तरोत्तरितायै १० उत्तरोत्तरावद्दीर्घायुत्वमश्नवामहा इति ११ १२

तस्याश्विनो लोहोऽजः सारस्वती मेषीति पशू उपालम्भ्यौ सवनीयस्य १ इन्द्राय सुत्राम्णे वशानूबन्ध्याया उपालम्भ्यैवंविधा २ तद्यदेवं पशवो नियुक्ता भवन्ति नेत्सौत्रामण्या अयानीति ३ तस्य प्रातःसवनीयाननु पुरोलाशान्बाह्यतोऽग्निमुपसमाधाय सुरासोमेन चरन्ति ४ तृतीयसवनीयाननु पुरोलाशान्सवित्रं द्वादशकपालं पुरोलाशं निर्वपति ५ ऐन्द्रमेकादशकपालम् ६ वारुणं दशकपालम् ७ आवपनं वै सवनीयाः पुरोलाशा आवपन एव तदावपति ८ अथ यदिन्द्राय सुत्राम्णे वशानूबन्ध्याया उपालम्भ्या भवतीन्द्रं वा अनु सुत्रामाणं सौत्रामणी संतिष्ठते ९ यैव सौत्रामण्याः संस्था तामेव तद्यज्ञस्य संस्थां करोति १० तं हैकेऽतिरात्रं कुर्वन्ति ११ एकविंशस्तोमं बृहत्पृष्ठमुभयसामानम् १२ तस्य यद्विश्वजितो बृहत्पृष्ठस्य शस्त्रं तच्छस्त्रम् १३ अत्र हविर्यज्ञाः सोमाः संतिष्ठन्ते १४ १३

देवा ह पशुकामाश्चतुरो मासान्व्रतं चरित्वैतमुद्भिदं यज्ञक्रतुमपश्यन् । तेनेष्ट्वा पशूनापुः । तेन पशुकामो यजेत । उद्भिदेष्ट्वा यदि मन्येत चिरान्मा पशव आगुरिति चतुरो मासान्व्रतं चरित्वा बलभिदा यजेत । क्षिप्रं हैनं पशव आयन्ति १ १४

गोसवेन पशुकामो यजेत १ षट्त्रिंशत्स्तोमेन २ षट्त्रिंशदक्षरा बृहती ३

बार्हताः पशवः ४ पशूनामेवाप्त्यै ५ षट्त्रिंशत्सहस्रा दक्षिणा गोसवस्य ६ अयुतं वा ७ उक्थ्यो यज्ञः ८ १५

ऋतपेयेन तेजस्कामो यजेत १ द्वादश दीक्षा द्वादशोपसदः २ मध्यमेनाङ्गुष्ठपर्वणौदुम्बरं चमसं मितं घृतस्य व्रतयेत् ३ अयुजासु क्षीरौदनं दीक्षासु ४ सोमचमसो दक्षिणाभिषुतस्य ५ ऋतं सत्यं वदन्तो भक्षयेयुः ६ भूर्भुवः स्वरिति वा ७ सगोत्राय वा ब्रह्मणे दद्यात् ८ जनिष्ठा उग्रः सहसे तुराय कथा महामवृधत्कस्य होतुरिति निविद्धाने ९ मन्दमान ऋतादधि प्रजाया ऋतस्य हि शुरुधः सन्ति पूर्वीरित्यृतवती तदेतस्याह्नो रूपम् १० १६

प्रजापतिरिमं लोकमीप्संस्तपस्तप्त्वैतं यज्ञक्रतुमपश्यद्भूः । तेनेष्ट्वेमं लोकमाप्नोत् । तेनेमं लोकमीप्सन्यजेत १ १७

प्रजापतिरन्तरिक्षलोकमीप्सं स्तपस्तप्त्वैतं यज्ञक्रतुमपश्यद्भुवः । तेनेष्ट्वान्तरिक्षलोकमाप्नोत् । तेनान्तरिक्षलोकमीप्सन्यजेत १ १८

प्रजापतिरमुं लोकमीप्संस्तपस्तप्त्वैतं यज्ञक्रतुमपश्यत्स्वः । तेनेष्ट्वामुं लोकमाप्नोत् । तेनामुं लोकमीप्सन्यजेत १ स्वरसामभ्यः शस्त्राणि यथास्तोमम् २ आनुष्टुभानि च ३ १९

सूर्यो ह तेजस्कामस्तपस्तप्त्वैतं यज्ञक्रतुमपश्यच्छुक्रस्तोमम् । तेनेष्ट्वा तेज आप्नोत् । तेन तेजस्कामो यजेत १ एकविंशतिः श्वेताश्वा दक्षिणा २ वैषुवतमहः ३ २०

तीव्रसवः प्रजया पशुभिस्तीव्रस्य बुभूषतः १

अयं तीव्रस्तीव्रसुदिन्द्र सोमो वृत्रहत्याय हरिवो अस्य पाहि
वज्रं शिशानो जठरं पृणस्वानाधृष्यं वृषभं तुम्रमिन्द्रम्

इति पुरस्तान्मरुत्वतीयस्य निविद्धानस्य २ तीव्रस्याभिवयस इति निष्केवल्ये ३ २१

ज्योतिः सूतसवः १ गौः स्थपतिसवः २ आयुर्ग्रामणीसवः ३ संदंशानुस्तोमाविषुवज्रौ श्येनाजिरौ मृत्य्वन्तकौ क्षुरवपिशीर्षच्छिदौ महः श्येनश्चाभिचरणीयाः ४ मन्युसूक्ते निविद्धाने लिङ्गक्लृप्ते ५ यत्पृष्ठेनाभिचरेयुस्तत्पृष्ठः प्राकृतोऽभिचर्यमाणस्य ६ इषौ बृहद्ब्रह्मसाम ७ अभीवर्ते इतरेषु ८ शिखरैः सदश्छन्नं भवति ९ कार्मुकाण्युपशेरते १० बाणवद्भिराग्नीध्रम् ११ धान्वनान्युपशेरते १२ शरमयं बर्हिः १३ बाधक इध्मः परिधयश्च १४ वैभीदको यूपः १५ उपतापिनीनां गवामाज्यम् १६ अनुस्तरण्या गोश्चर्माधिषवणम् १७ शवनभ्ये अधिषवणफलके १८ शवचम्वामापः संस्रुतास्ताभिर्वसतीवरीः पृञ्चन्ति १९ उपोतपरुषा अधिज्यधन्वानो लोहितोष्णीषा असिबद्धाः प्रचरेयुः २० न हैतं कश्चनेशीतेयत्सोऽद्वादशाहं जीवेत् २१ न ह वै तं कश्चन स्तृणुते य एतैः प्रत्यभिचरति २२ सदः पाप्मानं द्विषतश्चापजिघांसमानस्य २३ उपोत्तमाश्च शस्त्राणामुत्सृज्यन्ते २४ उपसदः प्रजाकामस्य पशुकामस्य च २५ उपोत्तमाश्च शस्त्राणामुपजायन्ते २६ २२

देवासुराः समयतन्त । ते देवा बृहस्पतिं पुरोहितमुपाधावन्नुप तं यज्ञक्रतुं जानीहि येनेष्ट्वासुरानभिभवेमहीति । स एतमृषभं यज्ञक्रतुमपश्यत् । तेनेष्ट्वासुरानभ्यभवन् । तेन द्विषतो भ्रातृव्यानभिबुभूषन्यजेत १ पञ्चदशस्तोमस्य सप्तदशो माध्यन्दिनः पवमानस्तदस्य ऋषभरूपम् २ पिबा सोममभि यमुग्र तर्दस्तमु ष्टुहि यो अभिभूत्योजा इति निविद्धाने ३ यः शिप्रवान्वृषभो यो मतीनां गीर्भिर्वर्ध वृषभं चर्षणीनामित्यृषभवती तदेतस्याह्नो रूपम् ४ २३

सूर्यो ह तेजस्कामस्तपस्तप्त्वैतं यज्ञक्रतुमपश्यद्व्योमानम् । तेनेष्ट्वा तेज आप्नोत् तेन तेजस्कामो यजेत १ सप्तदशस्तोमस्यैकविंश आर्भवः पवमानः २ एकविंशो वा एष य एष तपति तदेनं स्वेन रूपेण समर्धयति ३ इमा उ त्वा पुरुतमस्येन्द्रं स्तवेति निविद्धाने ४ सूर्येण वयुनवच्चकार स सूर्यः पर्युरू वरांसीति सूर्याभिव्याहारे तदेतस्याह्नो रूपम् ५ २४

वसिष्ठो हान्नाद्यकामस्तपस्तप्त्वैतं यज्ञक्रतुमपश्यद्विराजम् । तेनेष्ट्वान्नाद्यमाप्नोत् तेनान्नाद्यकामो यजेत १ पञ्चदशौ पूर्वौ पवमानौ त्रिवृन्तीतराणि २ स विराजमभिसंपद्यते ३ श्रीर्विरालन्नाद्यं श्रियो विराजोऽन्नाद्यस्योपाप्त्यै ४ महश्चित्त्वमिन्द्र यत एताँस्त्वं राजेन्द्र ये च देवा इत्यक्षरवैराजे निविद्धाने तदेतस्याह्नो रूपम् ५ २५

इन्द्रो ह स्वाराज्यकामस्तपस्तप्त्वैतं यज्ञक्रतुमपश्यत्स्वराजम् । तेनेष्ट्वा स्वाराज्यमाप्नोत् । तेन स्वाराज्यकामो यजेत १ सप्तदशौ पूर्वौ पवमानौ त्रिवृन्तीतराणि २ ताश्चतस्त्रः स्तोत्रिया विराजमतियन्ति ३ ताभिः स्वाराज्यमाप्नोति ४ अक्षरवैराजे च ५ २६

उशना ह काव्योऽसुराणां पुरोहित आस । स ह देवानामन्नमशित्वा परिदद्रे स हैक्षत । कथं नु तेन यज्ञक्रतुना यजेयं येनेष्ट्वा पाप्मानमपहन्यामिति । स एतमुशनस्तोमं यज्ञक्रतुमपश्यत् । तेनेष्ट्वा पाप्मानमपाहत । तेन पाप्मानमपजिघांसमानो यजेत १ उदरव्याधितश्च २ त्रिवृत्प्रातःसवनम् ३ ब्रह्म वै त्रिवृत् ४ त्रिवृतैव तद्ब्रह्मणा पुरस्तात्पाप्मानमपाहत ५ सदशो माध्यन्दिनः ६ सा विराट् ७ विराजैव तन्मध्यतः पाप्मानमपाहत ८ त्रिवृत्तृतीयसवनम् ९ ब्रह्म वै त्रिवृत् १० त्रिवृतैव तद्ब्रह्मणोपरिष्टात्पाप्मानमपाहत ११ त्र्यर्यमा द्यौर्न य इन्द्रेति निविद्धाने १२ उशना यत्सहस्यैरयातं वरिवस्यन्नुशने काव्यायेत्युशनवती तदेतस्याह्नो रूपम् १३ २७

स हैक्षत । पाप्मानमपहत्य कथं नु तेन यज्ञक्रतुना यजेयं येनेष्ट्वान्नाद्यमाप्नुयामिति । स एतमुत्तरमुशनस्तोमं यज्ञक्रतुमपश्यत् । तेनेष्ट्वान्नाद्यमाप्नोत् तेनान्नाद्यकामो यजेत १ त्रिवृत्प्रातःसवनम् २ ब्रह्म वै त्रिवृत् ३ सदशो माध्यन्दिनः ४ सा विरालन्नाद्यम् ५ त्रिवृत्तृतीयसवनम् ६ ब्रह्म वै त्रिवृत् ७ त्रिवृतैव तद्ब्रह्मणोभयतोऽन्नाद्यं परिगृह्यात्मन्नदधत ८ तथो एवैतद्यजमानस्त्रिवृतैव तद्ब्रह्मणोभयतोऽन्नाद्यं परिगृह्यात्मन्धत्ते ९ उशनवती च १० विवधश्चैवंस्तोमोऽन्नाद्यकामस्य ११ अक्षरवैराजे च १२ सहस्रं शताश्वं दक्षिणा १३ २८

इन्द्राग्नी वै देवेष्वहंश्रेयसे विवदेयाताम् । ते देवा ऊचुः । यदि वा इमावेवं विवदिष्येते अभि नोऽसुरा भविष्यन्ति । उप तं यज्ञक्रतुं जानीम येनैनौ संशमयेमहीति । त एतं यज्ञक्रतुमपश्यन्निन्द्राग्न्योः कुलायम् । तेनैनौ समशमयन् १ तेन ब्राह्मणश्च क्षत्रियश्च संयजेयातां यं पुरोधास्यमानः स्यात् २ ब्रह्मक्षत्रे एव तत्तन्वौ संसृजेते ३ त्रिवृत्पञ्चदशौ स्तोमौ ४ अग्निर्वै त्रिवृदिन्द्रः पञ्चदशः ५ इन्द्राग्नी एव तत्तन्वौ समसृजताम् ६ तिष्ठा हरी तमु ष्टुहीति निविद्धाने ७ अग्नेः पिब जिह्वया सोममिन्द्राग्निर्न शुष्कं वनमिन्द्र हेतिरित्यैन्द्रे अग्निमती तदेतस्याह्नो रूपम् ८ २९

मित्रावरुणयोर्वै वैराज्यमन्यतर ऐच्छत्स्वाराज्यमन्यतरः । तावेतं यज्ञक्रतुमपश्यतां विराट्स्वराजम् । तेनेष्ट्वा वैराज्यमन्यतर आप्नोत्स्वाराज्यमन्यतरः १ अक्षरवैराजे च २ ३०

ज्येष्ठस्तोमः कनिष्ठकुलीनस्य ज्यैष्ठ्यं कामयमानस्य १ सप्तदशो बहिष्पवमानः २ एष वै स्तोमानां ज्येष्ठः ३ तमेव तद्यज्ञमुखे युनक्ति ४ जनिष्ठा उग्रः सहसे तुराय प्र वः सतां ज्येष्ठतमाय सुष्टुतिमिति ज्येष्ठाभिव्याहारे निविद्धाने तदेतस्याह्नो रूपम् ५ ३१

देवासुराः समयतन्त । ते देवा बृहस्पतिं पुरोहितमुपाधावन् । उप तं यज्ञक्रतुं जानीहि येनेष्ट्वासुरा नान्ववेयुरिति । स एतं दुराशं यज्ञक्रतुमपश्यत् । तेनेष्ट्वासुरा नान्ववायन् । ततो वै देवा अभवन्परासुराः । भवत्यात्मना परास्य द्वेष्यो य एवं वेद १ अपरपक्षे सौरीष्टिः पूर्वाह्णे २ चान्द्रमसी सायम् ३ विधुं दद्राणं नवोनवः ४ सौवर्णः शतवलो दक्षिणा पूर्वस्याम् ५ राजत उत्तरस्याम् ६ भारद्वाजं पृष्ठम् ७ तथा सूक्ते ८ स्तोत्रेस्तोत्रे स्तुते त्रिंशतंत्रिंशतं शतवलान्ददाति ९ यावद्वा यजमानो हिरण्यस्येच्छेत् १० ३२

इन्द्रो हापचितिकामस्वपस्तप्त्वैतं यज्ञक्रतुमपश्यदपचितिम् । तेनेष्ट्वापचितिमाप्नोत् । तेनापचितिकामो यजेत १ चतुर्विंशौ पूर्वौ पवमानौ २ त्रिवृत्पञ्चदशान्याज्यानि ३ सप्तदशैकविंशानि पृष्ठानि ४ त्रिणव आर्भवः पवमानः ५ एकविंशमग्निष्टोमसाम ६ तस्य गायत्रीमभि प्रातःसवनं संतिष्ठते

७ गायत्रच्छन्दसो वसवः । तेनेन्द्रो वसुष्वपचितिमाश्नुत ८ गायत्रच्छन्दसो ब्राह्मणाः । तेनायं ब्राह्मणेष्वपचितिमश्नुते ९ त्रिष्टुभं माध्यन्दिनं सवनम् १० त्रिष्टुप्छन्दसो रुद्राः । तेनेन्द्रो रुद्रेष्वपचितिमाश्नुत ११ त्रिष्टुप्छन्दसः क्षत्रियाः । तेनायं क्षत्रियेष्वपचितिमश्नुते १२ जगतीं तृतीयसवनम् १३ जगच्छन्दस आदित्याः । तेनेन्द्र आदित्येष्वपचितिमाश्नुत १४ जगच्छन्दसो विशः । तेनायं विक्ष्वपचितिमश्नुते १५ वाचान्वाह वाचा शंसति वाचा यजति १६ वागनुष्टुप् १७ अनुष्टुप्छन्दसो विश्वे देवाः । तेनेन्द्रो विश्वेषु देवेष्वपचितिमाश्नुत १८ अनुष्टुप्छन्दसः शूद्राः । तेनायं शूद्रेष्वपचितिमश्नुते १९ अश्वरथः खाड्गकवचो वैयाघ्रपरिच्छद आर्क्षोपासङ्गो द्वैपधन्वधिः श्यावाश्वो दक्षिणा २० अपचितिमता रूपेणापचितिमाप्नवानीति २१ इन्द्र सोमं सोमपत इन्द्रं स्तवेति निविद्धाने इन्द्राभिव्याहारे । तदेतस्याह्नो रूपम् २२ ३३

सूर्यो ह त्विषिकामस्तपस्तप्त्वैतं यज्ञक्रतुमपश्यत्त्विषिम् । तेनेष्ट्वा त्विषिमाप्नोत् । तेन त्विषिकामो यजेत १ अश्वरथः कांस्यकवचः श्वेताश्वो दक्षिणा २ त्विषिमता रूपेण त्विषिमाप्न्वानीति ३ सूर्याभिव्याहारे निविद्धाने । तदेतस्याह्नो रूपम् ४ ३४

वरुणो ह वृष्टिकामस्तपस्तप्त्वैतं यज्ञक्रतुमपश्यद्वृष्टिम् । तेनेष्ट्वा वृष्टिमाप्नोत् तेन वृष्टिकामो यजेत १ उद्वां चक्षुर्वरुण सुप्रतीकमिन्द्रावरुणा युवमध्वराय न इतीन्द्रावरुणाभिव्याहारे निविद्धाने । तदेतस्याह्नो रूपम् २ ३५

भानुमती ह तेजस्कामस्तपस्तप्त्वैतं यज्ञक्रतुमपश्यदादित्यम् । तेनेष्ट्वा तेज आप्नोत् । तेन तेजस्कामो यजेत १ यं वै सूर्यं स्वर्भानुः स्वर्भानोरध यदित्यादित्याभिव्याहारे निविद्धाने । तदेतस्याह्नो रूपम् २ ३६

इन्द्राविष्णुर्ह स्वर्गकामस्तपस्तप्त्वैतं यज्ञक्रतुमपश्यत्स्वर्गम् । तेनेष्ट्वा स्वर्गमाप्नोत् । तेन स्वर्गकामो यजेत १ इन्द्राभिव्याहारे निविद्धाने । तदेतस्याह्नो रूपम् २ ३७

देवासुराः समयतन्त । ते देवा बृहस्पतिं पुरोहितमुपाधावन् । उप तौ यज्ञक्रतू जानीहि याभ्यामिष्ट्वासुरान्विनुत्त्याभिभवेमहीति । स एतौ यज्ञक्रतू अपश्यद्विनुत्त्यभिभूती । तान्विनुत्तिना विनुत्त्याभिभूतिनाभ्यभवन् १ तस्य विनुत्तेः षलूर्ध्वाः पृष्ठ्यस्तोमाः षलावृत्ता विष्वञ्चः स्तोमाः २ विष्वञ्चो वै भूत्वा विनुदन्तीति ३ तद्विनुत्ते रूपम् ४ अथाभिभूतेः षलूर्ध्वाः पृष्ठ्यस्तोमाः षलावृत्ताः सम्यञ्चः स्तोमाः ५ सम्यञ्चो वै भूत्वाभिभवन्तीति ६ तदभिभूते रूपम् ७ यद्विश्वजितो बृहत्पृष्ठस्य तदेनयोः शस्त्रम् ८ ३८
राशिमरायावन्नाद्यकामस्य १ उत्तमौ छन्दोमौ समूल्ह्यात् २ स्त्रीणां गवां सहस्त्रं दक्षिणे ददाति ३ पुंसामुत्तरे ४ तन्त्रं दीक्षोपसदः ५ तथोदयनीया ६ यमावनूचीनगर्भौ वा संयजेयाताम् ७ विघनः पाप्मानं द्विषतश्चापजिघांसमानस्य ८ कयाशुभीयतदिदासीये वा निविद्धाने ९ भातृव्यं द्विषतश्चापजिघांसमानस्य १० ३९

आदित्याश्च ह वा अङ्गिरसश्चास्पर्धन्त । वयं पूर्वे स्वर्गं लोकमेष्याम इत्यादित्या वयमित्यङ्गिरसः । ते ङ्गिरस आदित्येभ्यः प्रोचुः । श्वःसुत्या नो याजयत न इति । तेषां हाग्निर्दूत आस । त आदित्या ऊचुः । यदि वा एते पूर्वे यक्ष्यन्त्येते पूर्वे स्वर्गं लोकं गमिष्यन्ति । अभि नोऽसुरा भविष्यन्ति । उप तं यज्ञक्रतुं जानीम येन वयं पूर्वे यजेमहीति । त एतं साद्यःक्रं यज्ञक्रतुमपश्यन् तेनेष्ट्वा पूर्वे स्वर्गं लोकमायन् । तेन स्वर्गकामो यजेत १ त्रिवृत्स्तोमः २ रथन्तरं पृष्ठम् ३ तृचक्लृप्तं शस्त्रम् ४ अग्निष्टोमो यज्ञः ५ यवोर्वरा वेदिः ६ यवखल उत्तरवेदिः ७ लाङ्गलेषा यूपः ८ यवकलापिश्चषालम् ९ ईजानस्य कुलाद्वसतीवर्यः १० दृतिषु दधि वनीवाह्यन्ते ११ ततो यत्सर्पिरुदैति तेन प्रचरन्ति १२ अश्वरथः सोमप्रवाकः १३ योजनेऽन्ततः १४ अश्वो दक्षिणा १५ पूर्वाह्णे दीक्षणीया १६ अभ्यग्रं कर्माणि वर्तन्ते १७ अर्थलुप्तः प्रवर्ग्यः १८ तिस्त्रः पराचीरुपसदः १९ पुरोलाशोऽग्नीषीमीयः २० सवनीयकाले समानतन्त्राः पशवः २१ आश्विनी वशानूबन्ध्यायाः स्थाने २२ मैत्रावरुण्या वा पयस्यया यजेत २३ अथो पूर्वप्रक्रान्तमन्वैच्छन् २४ ४०

एषैवोत्तरस्य विधा १ स्तोमा एवान्यथा २ अष्टादशाः पवमानास्त्रिवृन्तीतराणि ३ स एष उक्थ्यः प्रत्याहृतः ४ योऽग्निष्टोमे कामो य उक्थ्ये

तयोरुभयोराप्त्यै ५ गोधूमोर्वरा ६ गोधूमखलः ७ गोधूमकलापिञ्चषालम् ८ कुम्भ्या आपो वसतीवर्यः ९ अश्वः सोमप्रवाकः १० त्रैपदेऽन्ततः ११ वडवा दक्षिणा १२ ४१

एषैवोत्तरस्य विधा १ स्तोमा एवान्यथा २ चतुर्विंशाः पवमाना-स्त्रिवृन्तीतराणि ३ स एष वाजपेयः प्रत्याहृतः ४ यः षोलशिनि कामो यो वाजपेये तयोरुभयोराप्त्यै ५ यद्यस्य द्विषन्भ्रातृव्योऽनुक्रिया यजेत परिक्रिया यजेत । यदि परिक्रियोत्क्रिया ६ एकत्रिकत्रिकैकाभ्यां ब्रह्मवर्चसकामो यजेत ७ एकस्यां तिसृष्विति प्रथमस्य स्तोत्राणि भवन्ति ८ तिसृष्वेकस्यामित्युत्तरस्य ९ ताश्चतुर्विंशतिः स्तोत्रियाः १० चतुर्विंशत्यक्षरा गायत्री ११ तेजो ब्रह्मवर्चसं गायत्री १२ तदाभ्यां तेजो ब्रह्मवर्चसमाप्नोति १३ तृचक्लृप्तशस्त्रौ १४ अभिजिदभिजिगीषतः १५ विश्वजिद्विश्वं जिगीषतः १६ त्रिसंस्थौ च तौ १७ अग्निष्टोमौ भूत्वान्यो-न्यस्मिन्प्रत्यतिष्ठताम् १८ उक्थ्यौ भूत्वान्योन्यस्मिन् १९ अतिरात्रौ भूत्वान्योन्यस्मिन् २० ४२

इन्द्रो वै नृञ्जिगीषंस्तपस्तप्त्वैतं यज्ञक्रतुमपश्यन्नृजितम् । तेनेष्ट्वा नृनजयत् । तेन नृञ्जिगीषन्यजेत १ ४३

इन्द्रो वै पृतनाजं जिगीषंस्तपस्तप्त्वैतं यज्ञक्रतुमपश्यत्पृतनाजितम् । तेनेष्ट्वा पृतनाजमजयत् । तेन पृतनाजं जिगीषन्यजेत १ ४४

इन्द्रो वै सत्राजं जिगीषंस्तपस्तप्त्वैतं यज्ञक्रतुमपश्यत्सम्राजितम् । तेनेष्ट्वा सत्राजमजयत् । तेन सत्राजं जिगीषन्यजेत १ प्रथमात्त्यहान्मध्यन्दिनेषु निविद्धानानि २ ४५

इन्द्रो वै धनं जिगीषंस्तपस्तप्त्वैतं यज्ञक्रतुमपश्यद्धनजितम् । तेनेष्ट्वा धनम-जयत् । तेन धनं जिगीषन्यजेत १ चतुर्विंशमहः २ ४६

इन्द्रो वै स्वर्जिगीषंस्तपस्तप्त्वैतं यज्ञक्रतुमपश्यत्स्वर्जितम् । तेनेष्ट्वा स्वरजयत् तेन स्वर्जिगीषन्यजेत १ उत्सन्नयज्ञ इव वा एष यत्स्वर्जित् २ ४७

इन्द्रो वै सर्वं जिगीषंस्तपस्तप्त्वैतं यज्ञक्रतुमपश्यत्सर्वजितम् । तेनेष्ट्वा सर्वमजयत् । तेन सर्वं जिगीषन्यजेत १ महाव्रतीयमहः २ ४८

इन्द्रो वै सर्वमुज्जिगीषंस्तपस्तप्त्वैतं यज्ञक्रतुमपश्यदुज्जितम् । तेनेष्ट्वा सर्वमुदजयत् । तेन सर्वमुज्जिगीषन्यजेत १ जनिष्ठा उग्रः सहसे तुराय तमु ष्टुहि यो अभिभूत्योजा इति निविद्धाने २ ध्वान्तात्प्रपित्वादुदरन्त गर्भा उत्तूर्वयाणं धृषता निनेथेत्युद्वती तदेतस्याह्नो रूपम् ३ ४९

इन्द्रो वै त्रिशीर्षाणं त्वाष्ट्रमहनत् । अरून्मुखान्यतीन्सालावृकेभ्यः प्रायच्छत् तं सर्वाणि भूतान्यभ्याक्रोशन् । स देवेभ्यः पार्श्वत इव चचार । ते देवा ऊचुः । यदि वा अयमेवं चरिष्यत्यभि नोऽसुरा भविष्यन्ति । उप तं यज्ञक्रतुं जानीम येनैनमुपाह्वयेमहीति । त एतमुपहव्यं यज्ञक्रतुमपश्यन् । तेनैनमुपाह्वयन्त । तेनावरुद्धो राजा यजेत राष्ट्रमवजिगीषन् । अव हैव गच्छति १ इमा उ त्वा पुरुतमस्य कारोर्हव्यं वीर हव्या हवन्ते य एक इद्धव्यश्चर्षणीनामिति हूतवती निविद्धाने । तदेतस्याह्नो रूपम् २ ५०

तमभ्येवाक्रोशन्ननहर्जाततया वैतत्पाप्या वालक्ष्म्या । सोऽग्नये सर्वाणि सवनानि प्रायच्छत् । तस्याग्निः सर्वामनहर्जाततां सर्वां पापीमलक्ष्मीं निरदहत् । स योऽनहर्जातः स्याद्यं वा पापी वागभिवदेत्सोऽग्निष्टुता यजेत । तस्याग्निः सर्वामनहर्जाततां सर्वां पापीमलक्ष्मीं निर्दहति य एवं वेद य उ चैनेन यजते १ त्रिवृत्स्तोमेन त्रिष्टोमेन वा ब्रह्मवर्चसकामः २ चतुष्टोमेन प्रतिष्ठाकामः ३ प्रातरनुवाकक्प्रभृति हारियोजनान्तं सर्वमाग्नेयम् ४ यथार्थमूहः ५ वचनात्प्रत्याम्नायः ६ अग्निं मन्ये पितरमिति प्रतिपत्प्रातरनुवाकस्य ७ लिङ्गेप्सुरुत्तरयोः क्रत्वोरग्निशब्दं कुर्वीत ८ प्र देवत्रेत्युद्धृत्य सोमस्य मेति चतुर्दश ९ तमोषधीरित्यवनीयमानासु १० और्वभृगुवदिति तिस्रोऽम्बय इत्युद्धृत्य ११ उपप्रयन्तस्त्रीणि शतेति प्रथमे उत्तमा चाग्निमन्थनीयानाम् १२ अग्ने जुषस्व नो हविरिति प्रथमा चतुर्थी पञ्चमी च सवनीयानाम् १३ दूतं वो विश्ववेदसमिति द्विदेवत्यानाम् १४ ५१

अग्निमीले पुरोहितमित्युन्नीयमानेभ्यः १ अग्निं दूतमिति सप्त प्रस्थितानाम् २ उत्तराश्चतस्रोऽच्छावाकसूक्तस्य स्थाने ३ अग्ने दिव इति याज्याज्यस्य ४ उप त्वा जामथ ऐभिरग्ने कस्ते जामिर्न योरुपब्दिरग्निर्वृत्राणयग्ने सुतस्याग्ने धृतव्रतायेति प्रउगतृचानि ५ अग्ने विश्वेभिरग्निभिरिति यजति ६ कस्ते जामिः कया ते अग्ने अङ्गिर इति स्तोत्रियानुरूपौ मैत्रावरुणस्य ७ विपर्यस्तौ तु माध्यन्दिने ८ अग्निर्वृत्राणीति ब्राह्मणाच्छंसिनः ९ अग्निर्मूर्धेत्यच्छावाकस्य १० अर्चन्तस्त्वेति मैत्रावरुणस्य ११ उत्तरं ब्राह्मणाच्छंसिनः १२ अग्ने धृतव्रता-येति षलच्छावाकस्य १३ उत्तमाभिर्यजन्ति १४ ५२

अग्निं वो देवमित्युन्नीयमानेभ्यः १ प्र वः शुक्रायेति सप्त प्रस्थितानाम् २ उत्तरे मरुत्वतीयग्रहस्य ३ विशोविशो वस्त्वमग्ने यज्ञानामिति प्रतिपदनुचरौ मरुत्वतीयस्य ४ अग्न आ याह्यग्निभिः प्र वो यह्वमिति प्रगाथौ ५ अग्निं न मा मथितं त्वमग्ने प्रथमो अङ्गिरा ऋषिरित्येकपातिनीनाम् ६ अग्ने स क्षेषदिति निविद्धानम् ७ उत्तमा याज्या ८ ५३

पाहि नो अग्न एकया पाहि नो अग्ने रक्षस इति स्तोत्रियानुरूपौ प्रगाथौ निष्केवल्यस्य १ प्र ते अग्ने हविष्मतीमिति धाय्या २ एना वो अग्निमिति प्रगाथः ३ यथा होतरिति निविद्धानम् ४ अग्निं नर इति याज्या ५ ५४

अग्निमग्निं वो अध्रिगुमग्ने जरितरिति स्तोत्रियानुरूपौ प्रगाथौ ब्राह्मणाच्छंसिनः १ अच्छा नः शीरशोचिषमित्यच्छावाकस्य २ अग्ने विवस्वत्त्वमग्ने गृहपति-स्त्वमित्सप्रथा इत्यनुपूर्वं प्रगाथाः ३ यजस्व होतरिति च सूक्तानि ४ उत्तमाभिर्यजन्ति ५ ५५

अगन्म महेत्यादित्यग्रहस्य पुरोनुवाक्योत्तरा याज्या १ ऊर्ध्व ऊ षु णो अध्वरस्य होतरिति नवोन्नीयमानेभ्यः २ उत्तरे हारियोजनस्य ३ त्वामग्न ऋतायव इति सप्त प्रस्थितानाम् ४ एति प्र होतेति सावित्रग्रहस्य पुरोनुवाक्योत्तरा याज्या ५ इयं ते नव्यस्यश्वं न त्वेति प्रतिपदनुचरौ वैश्वदेवस्य ६ त्वमग्ने द्रविणोदा इति तिस्रः सावित्रस्य ७ आर्भवस्योत्तरास्तिस्रः ८ चतस्रो द्यावापृथिवीयस्य ९ षलादितो वैश्वदेवस्य १० अबोधि जार इति वायव्यायाः ११ जुषस्व

सप्रथस्तममिति सुरूपकृत्नोः १२ समिद्धो अग्निर्दिवीति तिस्र एकपातिनीनाम् १३ तदद्य वाच इति पञ्चजनीयायाः १४ यज्ञेन वर्धतेति याज्या १५ ५६

अभि प्रवन्तेति घृतस्य १ उत्तरा सौम्यस्य २ आ वो राजानमिति रौद्र्याः ३ वसुं न चित्रमहसमिति मारुतस्य ४ आ नो यज्ञं दिविस्पृशमा नो वायवित्यग्निष्टोमसाम्नः स्तोत्रियानुरूपौ प्रगाथौ ५ नित्यौ वा ६ अप्स्वग्न इत्यापोहिष्ठीयानाम् ७ तं देवा बुध्न इति वैश्वदेव्याः ८ इममू षु वो अतिथिमुषर्बुधमिति चतस्रो देवानांपत्नीनां राकायाश्च ९ हुवे वः सुद्योत्मानमिति तिस्रोऽक्षरपङ्क्तीनाम् १० त्रिमूर्धानमिति तिस्रः पैत्रीणाम् ११ कथा ते अग्ने शुचयन्त आयोरिति तिस्रो यामीनाम् १२ मथीद्यदीमिति तिस्रः स्वादुष्किलीयानाम् १३ उत्तरयोरुत्तरे १४ एवाग्निर्गोत्रमेभिरिति परिधानीया १५ ग्रहेष्वविकृतेषु तिष्ठा हरी तमु ष्टुहीति निविद्धाने १६ अनड्वान्हिरण्यं वा दक्षिणा १७ एतद्व्याग्नेयं रूपम् १८ उत्थाय चाग्निष्टोमः १९ आ ह वा एष सर्वाभ्यो देवताभ्यो वृश्चयते योऽग्निष्टुता यजते २० ५७

इन्द्रो ह बलकामस्तपस्तप्त्वैतं यज्ञक्रतुमपश्यदिन्द्रस्तुतम् । तेनेष्ट्वा बलमाप्नोत् तेन बलकामो यजेत १ इन्द्राभिव्याहारे निविद्धाने तदेतस्याह्नो रूपम् २ ५८

सूर्यो ह तेजस्कामस्तपस्तप्त्वैतं यज्ञक्रतुमपश्यत्सूर्यस्तुतम् । तेनेष्ट्वा तेज आप्नोत् तेन तेजस्कामो यजेत १ सूर्याभिव्याहारे निविद्धाने तदेतस्याह्नो रूपम् २ ५९

विश्वे ह देवाः प्रजातिकामास्तपस्तप्त्वैत यज्ञक्रतुमपश्यन्वैश्वदेवस्तुतम् । तेनेष्ट्वा प्राजायन्त । तेन प्रजातिकामो यजेत १ इमा उ त्वा पुरुतमस्य वृषा मद इन्द्र इति निविद्धाने २ प्रोतये वरुणं मित्रमिन्द्रं मित्रो नो अत्र वरुणश्च पूषेति वैश्वदेवाभिव्याहारे तदेतस्याह्नो रूपम् ३ ६०

गोगमो ह ब्रह्मवर्चसकामस्तपस्तप्त्वैतं यज्ञक्रतुमपश्यद्गोतमस्य चतुरुत्तर-स्तोमम् । तेनेष्ट्वा ब्रह्मवर्चसमाप्नोत् । तेन ब्रह्मवर्चसकामो यजेत १ चतसृषु बहिष्पवमानः २ अष्टास्वष्टास्वाज्यानि ३ द्वादशसु माध्यन्दिनः पवमानः

४ षोलशसुषोलशसु पृष्ठानि ५ विंशत्यामार्भवः पवमानः ६ चतुर्विंशमग्निष्टोमसाम ७ सामान्तरुक्थ्याः ८ ६१

पञ्चशारदीयः १ मरुतो हाग्रेऽनपिसोमपीथा आसुः । ते यत्रेन्द्रं मरुतः पुपुवुस्तदेनानिन्द्रः सोमपीथेऽन्वाभेजे । स योऽनपिसोमपीथः स्याद्यो वा मरुतां सलोकतां सायुज्यमीप्सेत सोऽनेन यजेत २ पञ्चोक्षाणः पञ्च शरदो मरुद्भ्यः प्रोक्षिताश्चरन्ति । ते सवनीयस्योपालम्भ्याः ३ ६२

ऋषिस्तोमाः १ गोतमो ह ब्रह्मवर्चसकामस्तपस्तप्त्वैतं यज्ञक्रतुमपश्यत् । तेनेष्ट्वा ब्रह्मवर्चसमाप्नोत् । तेन ब्रह्मवर्चसकामो यजेत २ ६३

भरद्वाजो ह बलकामस्तपस्तप्त्वैतं यज्ञक्रतुमपश्यत् । तेनेष्ट्वा बलमाप्नोत् । तेन बलकामो यजेत १ ६४

अत्रिर्ह प्रजातिकामस्तपस्तप्त्वैतं यज्ञक्रतुमपश्यत् । तेनेष्ट्वा प्राजायत । तेन प्रजातिकामो यजेत १ ६५

वसिष्ठो हान्नाद्यकामस्तपस्तप्त्वैतं यज्ञक्रतुमपश्यत् । तेनेष्ट्वान्नाद्यमाप्नोत् । तेनान्नाद्यकामो यजेत १ ६६

जमदग्निर्ह पशुकामस्तपस्तप्त्वैतं यज्ञक्रतुमपश्यत् । तेनेष्ट्वा पशूनाप्नोत् । तेन पशुकामो यजेत १ ६७

प्रजापतिर्ह प्रजातिकामस्तपस्तप्त्वैतं यज्ञक्रतुमपश्यत् । तेनेष्ट्वा प्राजायत । तेन प्रजातिकामो यजेत १ पृष्ठ्याहान्यनुपूर्वम् २ ६८

व्रात्यस्तोमाः १ वसवो ह स्वर्गकामास्तपस्तप्त्वैतान्यज्ञक्रतूनपश्यन्व्रात्यस्तोमान् । तैरिष्ट्वा स्वर्गमापुः । तैः स्वर्गकामो यजेत २ ६९

मित्रावरुणयोरश्विनोर्वसूनां मरुतां विश्वेषां देवानाम् १ समूल्हात्पृष्ठ्या-

च्छस्त्रम् २ ७०

उत्क्रान्तिरतिरात्रः १ इन्द्राविष्णू वै स्वर्गकामौ तपस्तप्त्वैतं यज्ञक्रतुमपश्यता-मुत्क्रान्तिम् । तेनेष्ट्वा स्वर्गं लोकमुदाक्रामताम् । तेन ॥ स्वर्गकामो यजेत २ इमा उ त्वा पुरुतमस्य द्यौर्न य इन्द्रेति निविद्धाने ३ प्र पूषणं विष्णुमग्निं पुरमधिं हन्नृजीषिन्विष्णुना सचान इति विष्णुन्यङ्गे तदेतस्याह्नो रूपम् ४ ७१
मित्रावरुणयोरश्विनोर्वसूनां मरुतां साध्यानामाप्यानां विश्वसृजां भूतकृतां ज्येष्ठानां मध्यमानां कनिष्ठानां च १ चतुर्दशः स्तोमः २ विपृथुः सप्रतोदः सेषुधन्वा दक्षिणा ३ एतेषां देवगणानां समूल्हाद्दशरात्राच्छस्त्रम् ४ ७२

व्रात्यस्तोमानाम् १ नवानां नाकमदां च २ चषालमुखतरसपुरोलाशोरनिष्टु सवब्रह्मसवक्षत्रसवभूमिसवौषधिसवौदनसववनस्पतिसवानां च ३ ७३

प्रजापतिर्ह परमेष्ठी प्रतिष्ठाकामस्तपस्तप्त्वैतं यज्ञक्रतुमपश्यद्दशममहः । तेनेष्ट्वा प्रत्यतिष्ठत । तेन प्रतिष्ठाकामो यजेत १ ७४

ऋतुस्तोमाः १ ऋतवो ह स्वर्गकामास्तपस्तप्त्वैतान्यज्ञक्रतूनपश्यन्षट् । तैरिष्ट्वा स्वर्गमापुः । तैः स्वर्गकामो यजेत २ ७५

मासस्तोमाः १ मासा हान्नाद्यकामास्तपस्तप्त्वैतान्यज्ञक्रतूनपश्यन्द्वादश । तैरिष्ट्वान्नाद्यमापुः । तैरन्नाद्यकामो यजेत २ ७६

अर्धमासस्तोमाः १ अर्धमासा हान्नाद्यकामास्तपस्तप्त्वैतान्यज्ञक्रतूनपश्यंश्चतुर्विंशतिम् । तैरिष्ट्वान्नाद्यमापुः । तैरन्नाद्यकामो यजेत २ ७७

नक्षत्रस्तोमाः १ नक्षत्राणि ह तेजस्कामानि तपस्तप्त्वैतान्यज्ञक्रतूनपश्यन्सप्तविंशतिम् । तैरिष्ट्वा तेज आपुः । तैस्तेजस्कामो यजेत २ ७८

अहोरात्रस्तोमाः १ अहोरात्रा हान्नाद्यकामास्तपस्तप्त्वैतान्यज्ञक्रतूनपश्यन्सप्तविंशतिशतानि । तैरिष्ट्वान्नाद्यमापुः । तैरन्नाद्यकामो यजेत २ ७९

मुहूर्तस्तोमाः १ मुहूर्ता हान्नाद्यकामास्तपस्तप्त्वैतान्यज्ञक्रतूनपश्यन्दश सहस्राण्यष्टौ च शतानि । तैरिष्ट्वान्नाद्यमापुः । तैरन्नाद्यकामो यजेत २ ८०

निमेषस्तोमाः १ निमेषा हाक्षितिकामास्तपस्तप्त्वैतान्यज्ञक्रतूनपश्यन्दशायुतान्यष्टौ च सहस्राणि । तैरिष्ट्वाक्षितिमापुः । तैरक्षितिकामो यजेत २ ८१
ध्वंसिस्तोमाः १ ध्वंसयो हानन्तकामास्तपस्तप्त्वैतान्यज्ञक्रतूनपश्यन्दश प्रयुतान्यष्टौ चायुतानि । तैरिष्ट्वानन्तमापुः । तैरनन्तकामो यजेत २ ८२

दिशां स्तोमाः १ दिशो हानन्तकामास्तपस्तप्त्वैतान्यज्ञक्रतूनपश्यंश्चतुरः । तैरिष्ट्वानन्तमापुः । तैरनन्तकामो यजेत २ ८३

स्वान्तरदिशां स्तोमाः १ अवान्तरदिशो हानन्तकामास्तपस्तप्त्वैतान्यज्ञक्रतूनपश्यंश्चतुरः । तैरिष्ट्वानन्तमापुः । तैरनन्तकामो यजेत २ त एते बृहद्रथन्तरपृष्ठाः स्युः ३ ऐकाहिकशस्त्राः ४ कयाशुभीयतदिदासीये वा निविद्धाने ५ दिक्षु दिशां स्तोमा अवान्तरदिक्ष्ववान्तरदिशामवान्तरदिशाम् ६ ८४

इति शाङ्खायनश्रौतसूत्रे चतुर्दशोऽध्यायः समाप्तः

शरदि वाजपेयः १ अन्नाद्यकामस्य २ वाजेन यक्ष्यमाणः पुरस्तात्संवत्सरं पेयैर्यज्ञक्रतुभिर्यजते ३ पानं वै पेयाः । अन्नं वाजः ४ पानं वै पूर्वमथान्नम् ५ तयोरुभयोराप्त्यै ६ द्वादशाग्निष्टोमाः ७ गोतमस्य वा चतुरुत्तरस्तोमो व्यत्यासं प्राकृतेन ८ अपरियज्ञमेके ९ इन्द्रो हैतेन यज्ञक्रतुनेष्ट्वा बृहस्पतिश्चान्नाद्यमापतुः १० तेनान्नाद्यकामो यजेत ११ अथो हैतेन वाजो लौक्य इष्ट्वा सर्वान्कामानाप । तस्माद्वाजपेयः १२ त्रयोदश दीक्षास्तिस्र उपसदः सुत्यं सप्तदशमहः १३ सप्तदशो वै प्रजापतिर्वाजपेयः १४ तदेनं स्वेन रूपेण समर्धयति १५ चतुरश्रो गोधूमचषालो बैल्वो यूपः सप्तदशारत्निः १६ सप्तदशो वै प्रजापतिर्वाजपेयः १७ तदेनं स्वेन रूपेण समर्धयति १८ सप्तदशाग्नीषोमीयाः १९ तेषां समानं चरणम् २० आ य ऐन्द्राग्न ऐन्द्रो वृष्णिः सारस्वती मेषी । मरुद्भ्य उक्षेभ्यो ऋशा पृश्निः पञ्चमो क्रतुपशूनाम् २१

सप्तदश प्राजापत्याः श्यामास्तूपरा लप्सुदिन उपालम्भ्याः २२ सवनीयानां तन्त्रं पर्यग्निकरणान्तम् २३ ब्रह्मसाम्नालभ्यन्ते २४ अधिगुरावर्तेत स्तोक्याश्च २५ प्रास्मा अग्निं भरतोवध्यगोहमिति तन्त्रमुत्तमः प्रयाजः परिवाप्यौ च २६ ऊर्ध्वं प्रदानं हारियोजनात् २७ वनस्पतिप्रभृतीन्यङ्गान्युत्कृष्येरन् २८ इष्टेषु वानुयाजेषु २९ स्वकाला वा ३० सप्तदशः स्तोमः ३१ वैराजमाज्यम् ३२ घृतस्तोमीयं वा ३३ माधुच्छन्दसः प्रउगः ३४ अन्नं वै विराट् । घृतमन्नम् ३५ रसो माधुच्छन्दसः प्रउगः ३६ अन्नेन तद्रसं दधाति ३७ ऐकाहिकं वा ३८ प्रतिष्ठा वा एकाहः ३९ प्रतिष्ठित्या एव ४० १

त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्म इत्यतिच्छन्दसा मरुत्वतीयं प्रतिपद्यते १ प्राजापत्यं वै छन्दोऽतिच्छन्दाः २ प्रजापतिर्वाजपेयः ३ तदेनं स्वेन रूपेण समर्धयति ४ आ त्वा रथं यथोतय इत्येव प्रतिपद्येत ५ प्राजापत्यं वै छन्दो ऽनुष्टुप् ६ प्रजापतिर्वाजपेयः ७ तदेनं स्वेन रूपेण समर्धयति ८ कया शुभा सवयसः सनीला इति मरुत्वतीयं कद्वत्कयाशुभीयम् ९ को वै प्रजापतिर्वाजपेयः १० तदेनं स्वेन रूपेण समर्धयति ११ बार्हस्पत्यो नैवारः सप्तदशशरावः १२ सप्तदशो वै प्रजापतिर्वाजपेयः १३ तदेनं स्वेन रूपेण समर्धयति १४ सोऽन्तरेण निष्केवल्यमरुत्वतीये । बृहस्पतिसवे च १५ तत्राभिषिच्यते प्राक् स्विष्टकृतः १६ तस्य प्रदानं स्विष्टकृदिलं च १७ तदिदास भुवनेषु ज्येष्ठामिति निष्केवल्यम् १८ यज्ञो वै भुवनेषु ज्येष्ठः १९ यज्ञ उ वै प्रजापतिर्वाजपेयः २० तदेनं स्वन रूपेण समर्धयति २१ अनु-चरप्रभृति षष्ठात्तृतीयसवनम् २२ प्राजापत्यं वै षष्ठमहः २३ प्रजपतिर्वाजपेयः २४ तदेनं स्वेन रूपेण समर्धयति २५ विषुवतो वा २६ रोहो वै विषुवान् २७ रोहो वाजपेयः । २८ तदेनं स्वेन रूपेण समर्धयति २९ ऐकाहिकं वा ३० प्रतिष्ठा वा एकाहः ३१ प्रतिष्ठित्या एव ३२ २

तत्र पुरस्तादानोभद्रीयस्य मधुनाड्यौ विहरेदिति पैङ्ग्यम् १ इमं महे विदथ्यायोषसः पूर्वा इत्यृक्छः २ ते यदि चित्रवतीष्वग्निष्टोमसाम कुर्युस्त्वं नश्चित्र ऊत्याग्ने विवस्वदिति स्तोत्रियानुरूपौ प्रगाथौ ३ ऊर्ध्वं षोलशिनो ऽतिरिक्तोक्थम् ४ प्र तत्ते अद्य शिपिविष्ट प्र तद्विष्णुरिति स्तोत्रियानुरूपौ ५ ब्रह्म जज्ञानं प्रथमं पुरस्तादिति द्वे ६ धीती वा ये अनयन्वाचो अग्रं मनसा

वा येऽवदन्नृतानि । तृतीयेन ब्रह्मणा संविदानास्तुरीयेण मन्वत नाम धेनोः ७ वेनस्तत्पश्यदिति पञ्च ८ अयं वेन इति वा ९ तं प्रत्नथेति त्रयोदशानामुत्तमां परिशिष्याहूय दूरोहणं यथा विषुवति १० उत्तमामुपसंशस्य यज्ञो बभूवेति परिधाय प्रजापत इति यजति ११ सप्तदश गवां शतानि ददाति १२ सप्तदश वाससाम् १३ सप्तदश यानानि युक्तानि रथान्हस्तिनो निष्कान्दुन्दुभीन् १४ तानि सप्त सप्तदशानि भवन्ति १५ स आप्तोवाजपेयः १६ वयसोवयसः सप्तदशसप्तदशेति कुरुवाजपेयः १७ ३

वाजपेयेनेष्ट्वा बृहस्पतिसवः १ तेजस्कामस्य ब्रह्मवर्चसकामस्य च २ रोहो वै वाजपेयस्तेजो ब्रह्मवर्चसं बृहस्पतिसवः ३ तत्तेजसि ब्रह्मवर्चसे प्रतितिष्ठति ४ त्रिवृत्स्तोमः ५ रथन्तरं पृष्ठम् ६ तृचक्लृप्तं शस्त्रम् ७ अग्निष्टोमो यज्ञः ८ यस्तस्तम्भेति चतस्रोऽनुपूर्वं पुरस्तात्सूक्तानामेकैकां निष्केवल्यप्रभृतिषु ९ त्रयस्त्रिंशद्दक्षिणा १० अनुसवनमेकादशैकादश ११ अनूबन्ध्यस्य वपायां संस्थितायां वडवां ब्रह्मणेऽनुशिशुम् १२ ४

प्रजापतिर्ह देवान्सृष्ट्वा तेभ्य एतदन्नपानं ससृज एतान्यज्ञान् । अग्निष्टोमं प्रथमम् स एनान्नान्वभवत् । अथात्यग्निष्टोमम् । स एनान्नान्वभवत् । अथोक्थ्यम् स एनान्नान्वभवत् । अथ षोलशिनम् । स एनान्नान्वभवत् । अथ वाजपेयम् स एनान्नान्वभवत् । अथातिरात्रम् । स एनान्नान्वभवत् । अथाप्तोर्यामाणम् स एनानन्वभवत् १ तस्य त्रयस्त्रिंशत्स्तोत्राणि २ त्रयस्त्रिंशच्छस्त्राणि ३ त्रयस्त्रिंशदुक्थ्याहुतयः ४ त्रयस्त्रिंशद्वै सर्वे देवाः ५ तदेनान्स्तोत्रैः शस्त्रैरुक्थ्याहुतिभिरिति प्रत्येकं सर्वान्प्रीणाति ६ तस्य नव स्तोमाः ७ नव पृष्ठानि ८ षट् संस्थाः ९ परिग्रहेण तानि चतुर्विंशतिः १० चतुर्विंशतिर्वै संवत्सरस्यार्धमासाः ११ संवत्सरस्यैवाप्त्यै १२ आप्तो वै बतायं यामो यो देवाँश्च संवत्सरं चानुभवतीति । तस्मादाप्तोर्यामः १३ ५

छान्दोमाः पवमानाः १ त्रिवृत्पञ्चदशे सप्तदशैकविंशे चाज्यानि २ त्रिणवानि पृष्ठानि ३ त्रयस्त्रिंशमग्निष्टोमसाम ४ य आज्यानां स्तोमास्तेऽतिरिक्तोक्थानाम् ५ एतैर्वै प्रजापतिरुभयतोऽग्निष्टोमस्तोमैः सर्वान्कामानुभयतः परिगृह्यात्म-न्नदधत ६ तथो एवैतद्यजमान एतैरेवोभयतोऽग्निष्टोमस्तोमैः सर्वान्कामा-

नुभयतः परिगृह्यात्मन्धत्ते ७ विश्वजितः सर्वपृष्ठात्सहौत्रं प्रातःसवनम् ८ ६

कयाशुभीयं चातुर्थाह्निके चैकाहिकात्पूर्वाणीति मरुत्वतीयम् १ बृहद्वैराजगर्भं होतुः पृष्ठं भवति रथन्तरं वा २ वामदेव्यं शाक्वरगर्भं मैत्रावरुणस्य ३ श्यैतं वैरूपगर्भं ब्राह्मणाच्छंसिनो नौधसं वा ४ तालेयं रैवतगर्भमच्छावाकस्य ५ गर्भं पूर्वं शंसेदिति हैक आहुरथात्मानमिति ६ आत्मानं त्वेव पूर्वं शंसेत् ७ आत्मानं वा अनूगर्भः ८ ऐकाहिकान्स्तोत्रियाञ्छस्त्वा विश्वजितः सर्वपृष्ठात्स्तोत्रियाञ्छंसन्ति ९ तथानुरूपान् १० सामप्रगाथांश्च ११ ७

तदिदासीयं चातुर्थाह्निके चैकाहिकात्पूर्वाणीति निष्केवल्यम् १ यानि पाञ्चमाह्निकानि मध्यतस्त्रीणि मैत्रावरुणस्यैकाहिकाभ्यां पूर्वाणि २ तार्तीयाह्निके ब्राह्मणाच्छंसिनः ३ अच्छावाकस्य षष्ठाह्निके ४ अनुचरप्रभृति षष्ठात्तृतीयसवनम् ५ आश्विनादूर्ध्वमतिरिक्तोक्थानि ६ जराबोध जरमाण इति स्तोत्रियानुरूपौ होतुः ७ त्यमु वः सत्रासाहमिति मैत्रावरुणस्य ८ कं ते दाना असचन्त यदद्य कच्च वृत्रहन्निति ब्राह्मणाच्छंसिनः ९ तद्वो गाय स्तोत्रमिन्द्राय गायतेति वा १० इदं विष्णुरित्यच्छावाकस्य ११ उत्तरे च पूर्वा चानुरूपः १२ एषो उषा दूरादिहेवो दीराथामा मे हवमित्यनुपूर्वं नवर्चानि १३ आ भातीति होतुः १४ उत्तरं मैत्रावरुणस्य १५ आ गोमतेति ब्राह्मणाच्छंसिनः १६ उत्तरमच्छावाकस्य १७ क्षेत्रस्य पतिनेति त्रयाणां तिस्रः परिधानीयाः १८ शं नो देवः सविता त्रायमाण इत्यच्छावाकस्य १९ इमे सोमास इमे मन्द्रासोऽत्या यातं निवत आ नो गच्छतं हवनेति याज्याः २० पुराणमोकः सख्यं शिवं वामिति वानुपूर्वं चतस्रः २१ ८

यमस्तोमः १ यमो ह स्वर्गकामस्तपस्तप्त्वैतं यज्ञक्रतुमपश्यद्यमस्तोमम् । तमाहरत् । तेनायजत । तेनेष्ट्वा स्वर्गमाप्नोत् । तेन स्वर्गकामो यजेत २ स्तोत्रियानुरूपाञ्छस्त्राणामुद्धृत्य सामातानांश्च ३ यावत्यस्ता भवन्ति तावत्यस्तद्देवतास्तच्छन्दस उपजायन्ते ४ परेयिवांसमिति पञ्चानां पुरस्तात्सूक्तानामेकैकां मध्यन्दिने ५ ९

गायत्रः सर्वस्वारो मरणकामस्य स्वर्गकामस्य च १ त्रैष्टुभः सर्वनिधनः

प्रतिष्ठाकामस्य २ जागतः सर्वेलः पशुकामस्य च ३ आनुष्टुभः सर्ववाङ्निधनः श्रुतकामस्य ४ प्रत्यक्षं संपदा वा ५ नृजित्प्रभृतिभ्यो निविद्धानानि ६ १०

वागकामयत । सर्वेषां भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं परीयामिति । सैतं यज्ञक्रतुमपश्यद्वाचःस्तोमम् । तमाहरत् । तेनायजत । तेनेष्ट्वा सर्वेषां भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्यैत् । तथो एवैतद्यजमानो यद्वाचःस्तोमेन यजते सर्वेषां भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति १ शते बहिष्पवमानः २ सहस्र आज्यम् ३ अयुते प्रयुते नियुतेऽर्बुदे न्यर्बुदे निखर्वादे समुद्रे सलिले ऽन्त्येऽनन्त्य इति स्तोत्राणि ४ सर्वा ऋचः प्रयुज्यन्तेऽभ्यावर्तं स्तोमातिशंसनाय ५ सामानि यजूंषि च ६ उत्थाय चाग्निष्टोमः ७ सहस्रं दक्षिणा वाचःस्तोमस्य ८ महायज्ञे ९ विनुत्त्यभिभूत्योः १० सर्वजिद्धनजितोः ११ विश्वजिदभिजितोः १२ स्वर्जिदिन्द्रवज्रयोः १३ आप्तोर्यामे च १४ अनादेशे प्रकृतिर्दक्षिणानाम् १५ ११

वरुणोऽकामयत । सर्वेषां राज्यानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं परीयामिति । स एतं यज्ञक्रतुमपश्यद्राजसूयम् । तमाहरत् । तेनायजत । तेनेष्ट्वा सर्वेषां राज्यानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्यैत् । तथो एवैतद्यजमानो यद्राजसूयेन यजते सर्वेषां राज्यानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति १ भार्गवो होता २ ऐन्द्रापौष्णेन बस्तेनेष्ट्वा माघ्या अमावास्याया एकाह उपरिष्टाद्दीक्षेत पवित्राय ३ म एवायं चतुष्टोमो रथन्तरपृष्ठोऽग्निष्टोमः ४ एष एव पवित्रः । एतेन ह पूतः सवमश्नुते ५ अष्टम्यां सुत्यमहः ६ इष्टिभिः पक्षशेषम् ७ फाल्गुन्यां प्रयुज्य चातुर्मास्यानि ८ षण्मास्यं च पशुम् ९ माध्यां शुनासीरीयम् १० उत्तरं मासमिष्टिभिः ११ फाल्गुन्यां दीक्षतेऽभिषेचनी-यदशपेयाभ्याम् १२ द्वादश दीक्षास्तिस्र उपसदः १३ सुत्यं षोलशमहः १४ षोलशकलं वा इदं सर्वम् १५ अस्यैव सर्वस्याप्त्यै १६ १२

सह सोमौ क्रीणन्ति १ दशपेयस्य च तन्त्रमातिथ्यापर्यन्तमूर्ध्वं चावभृथात् २ त्वमग्ने वरुण इत्याज्यं वरुणान्यङ्गम् ३ वरुणं ह्यभिषिञ्चन्ति ४ चतुर्विंशा-न्मध्यन्दिनः ५ मैत्रावरुणयन्तरेण निष्केवल्यमरुत्वतीये ६ तत्राभिषिच्यते

प्राक् स्विष्टकृतः ७ तस्याः प्रदानं स्विष्टकृदिलं च ८ द्वितीयादह्नस्तृतीयसवनम् ९ तदुक्थ्यं संतिष्ठते १० पशवो वा उक्थ्यानि ११ पशूनामेवाप्त्यै १२ यन्त्यवभृथम् १३१ क्रियतेऽवभृथकर्म । न स्नाति १४ कृष्णाजिनस्य दक्षिणं पूर्वपादमुदकेऽवधाय प्रत्याहरन्ति वसनस्य वा दशाम् १५ १३

अथोत्तरं देवयजनमध्यवस्यति १ तत्संसृपामिष्टिभिर्यजते २ दशभिर्दशरात्रम् ३ अथ सवित्रे प्रसवित्रे । सवित्र आसवित्रे । सवित्रे सत्यप्रसवायेति ॥ सरस्वत्यै वाचे । त्वष्ट्रे रूपेभ्यः । पूष्णे पथिभ्यः । इन्द्रायास्मै । बृहस्पतये तेजसे । सोमाय राज्ञे । विष्णवे शिपिविष्टायेति ४ दशम्यां दशपेयः ५ अपि वैताभिर्दशभिर्देवताभिः प्रसर्पेयुर्वा भक्षयेयुर्वा ६ सवित्रे प्रसवित्रे प्रसर्पाणीति वा सवित्र आसवित्रे भक्षयामीति वा ७ येषामुभयतः श्रोत्रिया दशपुरुषं ते याजयेयुः ८ शतं ब्राह्मणाः सोमं भक्षयन्ति ९ दशदशैकैकं चमसम् १० तस्माद्दशपेयः ११ उत्थाय पञ्चबिलश्चरुः १२ समाप्ते श्येनीपृषतीभ्यां पष्ठौहीभ्यां गर्भिणीभ्यामादित्या पूर्वा वैश्वदेवी वा मारुत्युत्तरा १३ १४

अथ सौत्रामणी १ आश्विनो लोहोऽजः २ सारस्वती मेषी ३ इन्द्राय सुत्राम्ण ऋषभः ४ पर्यग्निकृतेषु सुरासोमेन चरन्ति ५

पवित्रेण पुनीहि मा शुक्रेण देव दीद्यत्
अग्ने क्रत्वा क्रतूंरभि

इति सुरां स्रवन्तीमुपतिष्ठन्ते ६ पितृदेवत्याभिर्वा ७ युवं सुराममिति पुरोनुवाक्या ८ होता यक्षदश्विना सरस्वतीमिन्द्रं सुत्रामाणमिति प्रैषः ९ सर्वानेके विकृतानामनन्ति १० तदु तथा न कुर्यादासुरं तत् ११ पुत्रमिवेति याज्या १२

यमश्विना नमुचावासुरे दधि सरस्वत्यसुनोदिन्द्रियाय
इमं तं शुक्रं मधुमन्तमिन्दुं सोमं राजानमिह भक्षयामि

इति भन्नमन्त्रः सुरायाः १३ ब्राह्मणं सुरापं परिक्रीणीयादिति भन्न उपनीयते १४ १५

उत ऊर्ध्वं केशवपनीयः १ त्रैधातव्युदवसानीया २ आग्नावैष्णव ऐन्द्रावैष्णवो वा ३ व्युष्टिरतो द्विरात्रः ४ अग्निष्टोमोऽतिरात्रश्च ५ वि वा एतस्मै ब्राह्मणायोच्छति यो वेदमनुब्रूते ६ व्यु तस्मै न्नत्रियायोच्छति योऽभिषेकं प्राप्नोति ७ अथैतेन न्नत्रस्य धृतिना यजते ८ चतुष्टोमेन रथन्तरपृष्ठेनाग्निष्टोमेन ९ तेनो ह त्रिष्टोमेन वृद्धद्युमन् आभिप्रतारिण ईजे १० तमु ह ब्राह्मणो ऽनुव्याजहार । न न्नत्रस्य धृतिनायष्ट इममेव प्रति समरं कुरवः कुरुन्नेत्राच्चयोष्यन्त इति ११ तदु किल तथैवास यथैवैनं प्रोवाच १२ तस्मात्तु चतुष्टोमेनैव यजेत १३ प्रतिष्ठा वै यज्ञानां चतुष्टोमः १४ प्रतिष्ठित्या एव १५ अयुतं दन्निणा १६ न ह वा एतस्माद्राष्ट्रान्न तस्यै विशो युवते योऽयुतं ददाति १७ तदयुतस्यायुतत्वम् १८ शतं वा सहस्राणि १९ १६

हरिश्चन्द्रो ह वैधस ऐन्द्वाको राजापुत्र आस
तस्य ह शतं जाया बभूवुः
तासु ह पुत्रं न लोभे
तस्य ह पर्वतनारदौ गृह ऊषतुः
स ह नारदं पप्रच्छ
यन्न्विमं पुत्रमिच्छन्ति ये च जानन्ति ये च न
किं स्वित्पुत्रेण विन्दते तन्नः प्रब्रूहि नारद । इति

स एकया पृष्टो दशभिः प्रत्युवाच
ऋणमस्मिन्मंनयत्यमृतत्वं च विन्दते
पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखम्

यावन्तः पृथिव्यां भोगा यावन्तो जातवेदसि
यावन्तो अप्सु प्राणिनां भूयान्पुत्रे पितुस्ततः

शश्वत्पुत्रेण पितरो अत्यायन्बहुलं तमः

आत्मा हि जज्ञ आत्मनः म इरावत्यतितारिणी

किं नु मलं किमजिनं किमु श्मश्रूणि किं तपः
पुत्रं ब्रह्माण इच्छध्वं स वै लोकोऽवदावदः

अन्नं ह प्राणः शरणं ह वासो रूपं हिरण्यं पशवोऽविवाहाः
सखा ह जाया कृपणं ह दुहिता ज्योतिर्ह पुत्रः परमे व्योमन्

पतिर्जायां प्रविशति गर्भो भूत्वाथ मातरम्
तस्यां पुनर्नवो भूत्वा दशमे मासि जायते

तज्जाया जाया भवति यदस्यां जायते पुनः
आभूतिरेषाभूतिर्बीजमेतन्निधीयते

देवाश्चैतामृषयश्च तेजः समभरन्महत्
देवा मनुष्यानब्रुवन्नेषा वो जननी पुनः

एष पन्था विततो देवयानो येनाक्रमन्ते पुत्रिणो ये विशोकाः
तं पश्यन्ति पशवो वयांसि तस्मात्ते मात्रापि मिथुनं चरन्ति

नापुत्रस्य लोकोऽस्तीति तत्सर्वे पशवो विदुः
तस्मात्तु पुत्रो मातरं स्वसारं चाधिरोहति । इति १७

स होवाच । स वै मे ब्रूहि यथा मे पुत्रो जायेतेति । तं होवाच । वरुणं राजानमुपधाव पुत्रो मे जायतां तेन त्वा यजा इति । तथेति । स वरुणं राजानमुपससार । पुत्रो मे जायतां तेन त्वा यजा इति । तथेति । तस्य ह पुत्रो जज्ञे रोहितो नाम । तं वरुण उवाच । अजनि वै ते पुत्रो यजस्व मानेनेति । स होवाच । यदा वै पशुर्निर्दशो भवत्यथ स मेध्यो भवति निर्दशो न्वस्त्वथ त्वा यजा इति । तथेति । स ह निर्दश आस । तं होवाच । निर्दशो वा अभूद्यजस्व मानेनेति । स होवाच । यदा वै पशोर्दन्ता जायन्तेऽथ स मेध्यो भवति दन्ता न्वस्य जायन्तामथ त्वा यजा इति

तथेति । तस्य ह दन्ता जज्ञिरे । तं होवाच । अज्ञत वा अस्य दन्ता यजस्व मानेनेति । स होवाच । यदा वै पशोर्दन्ताः पद्यन्तेऽथ स मेध्यो भवति दन्ता न्वस्य पद्यन्तामथ त्वा यजा इति । तथेति । तस्य ह दन्ताः पेदिरे । तं होवाच । अपत्सत वा अस्य दन्ता यजस्व मानेनेति स होवाच । यदा वै पशोर्दन्ताः पुनर्जायन्तेऽथ स मेध्यो भवति दन्ता न्वस्य पुनर्जायन्तामथ त्वा यजा इति । तथेति । तस्य ह दन्ताः पुनर्जज्ञिरे । तं होवाच । अज्ञत वा अस्य पुनर्दन्ता यजस्व मानेनेति । स होवाच । यदा वै क्षत्रियः संनाहं प्राप्नोत्यथ स मेध्यो भवति संनाहं नु प्राप्नोत्वथ त्वा यजा इति । तथेति । स ह संनाहं प्राप । तं होवाच । प्रापद्वै संनाहं यजस्व मानेनेति । स तथेत्युक्त्वा पुत्रमामन्त्रयां चक्रे । ततायं वै मह्यं त्वामददाद्धन्त त्वयाहमिमं यजा इति । स नेत्युक्त्वा धनुरादायारण्यमुपातस्थौ । स संवत्सरमरण्ये चचार । अथ हैक्ष्वाकं राजानं वरुणो जग्राह । तस्य होदरं जज्ञे । तदु ह रोहितः शुश्राव । सोऽरण्याद्ग्राममेयाय । तमिन्द्रः पुरुषरूपेण पर्येत्योवाच १८

नाना श्रान्ताय श्रीरस्तीति रोहित शुश्रुम
पापो निषद्वरो जन इन्द्र इच्चरतः सखा

चरैव रोहितेति चरैवेति वै मा ब्राह्मणोऽवोचदिति । स द्वितीयं संवत्सर-मरण्ये चचार । सोऽरण्याद्ग्राममेयाय । तमिन्द्रः पुरुषरूपेणपर्येत्योवाच

आस्ते भग आसीनस्योर्ध्वस्तिष्ठति तिष्ठतः
शेते निपद्यमानस्य चराति चरतो भगः

चरैव रोहितेति चरैवेति वै मा ब्राह्मणोऽवोचदिति । स तृतीयं संवत्सर-मरण्ये चचार । सोऽरण्याद्ग्राममेयाय । तमिन्द्रः पुरुषरूपेण पर्येत्योवाच

कलिः शयानः पुरुषः संजिहानस्तु द्वापरः
उत्थितस्त्रेता भवति कृतं संपद्यते चरन्

चरैव रोहितेति चरैवेति वै मा ब्राह्मणोऽवोचदिति । स चतुर्थं संवत्सर-

मरगये चचार । सोऽरगयाद्ग्राममेयाय । तमिन्द्रः पुरुषरूपेगपर्येत्योवाच

पुष्पिगयौ चरतो जङ्घे भूष्णुरात्मा फलेग्रहिः
शेरतेऽस्य सर्वे पाप्मानः श्रमेग प्रपथे हताः

चरैव रोहितेति चरैवेति वै मा ब्राह्मणोऽवोचदिति । स पञ्चमं संवत्सर-
मरगये चचार । सोऽरगयाद्ग्राममेयाय । तमिन्द्रः पुरुषरूपेग पर्येत्योवाच

चरन्वै मधु विन्दति चरन्पक्वमुदुम्बरम्
सूर्यस्य पश्य श्रमणं यो न तन्द्रयते चरन्

चरैव रोहितेति चरैवेति वै मा ब्राह्मणोऽवोचदिति । स षष्ठं संवत्सरमरगये
चचार । सोऽरगयाद्ग्राममेयाय । तमिन्द्रः पुरुषरूपेग पर्येत्योवाच

चरन्वै मधु विन्दत्यपचिन्वन्परूषकम्
उत्तिष्ठन्विन्दते श्रियं न निषत्किंचनावति

चरैव रोहितेति चरैवेति वै मा ब्राह्मणोऽवोचदिति । स सप्तमंसंवत्सरम-
रगये चचार । सोऽजीगर्तं सौयवसिमृषिमशनायापरीतं पुत्रं भक्षमाणम-
रगयमुपेयाय १९

तस्य ह त्रयः पुत्रा ग्रासुः शुनःपुच्छः शुनःशेपः शुनोलाङ्गूल इति । तं होवाच ऋषे हन्ताहमेषामेकेनात्मानं निष्क्रीणा ग्रहं ते गवां शतं ददानीति । स ज्येष्ठं निगृह्णान उवाच । न न्विममिति । नो एवेममिति कनिष्ठं माता । तौ मध्यमे संपादयां चक्रतुः शुनःशेपे । तस्य ह शतं दत्त्वा तमादाय सो ऽरगयाद्ग्राममेयाय । पितरमेत्योवाच । तत हन्ताहमनेनात्मानं निष्क्रीणा इति । स तथेत्युक्त्वा वरुणं राजानमामन्त्रयां चक्रे । ग्रनेन त्वा यजा इति तथेति । श्रेयान्वै ब्राह्मणः क्षत्रियादिति । तस्मा एतं राजसूयं यज्ञक्रतुं प्रोवाच । स एतं राजसूये पुरुषं पशुमालेभे २०

तस्य ह विश्वामित्रो होतामायास्य उद्गाता जमदग्निरध्वर्युर्वसिष्ठो ब्रह्मा । तस्मा

उपाकृताय नियोक्तारं न विविदुः । स होवाचाजीगर्तः सौयवसिः । मह्यमपरं शतं दत्ताहमेनं नियोक्ष्यामीति । तस्मा अपरं शतं ददुः । तं स नियुयोज तस्मा उपाकृताय नियुक्ताय पर्यग्निकृताय विशास्तारं न विविदुः । स होवाचाजीगर्तः सौयवसिः । मह्यमपरं शतं दत्ताहमेनं विशसिष्यामीति । तस्मा अपरं शतं ददुः । सोऽसिं निश्यान एयाय । अथ ह शुनःशेप ईक्षामास अमानुषमिव वै मा विशसिष्यन्ति हन्त देवता उपधावानीति २१

स प्रजापतिमेव प्रथमं देवतानामुपससार कस्य नूनं कतमस्यामृताना-मित्येतयर्चा । तं प्रजापतिरुवाच । अग्नेर्वै नेदिष्ठोऽसि तमेवोपधावेति । सोऽग्निमुपससाराग्नेर्वयं प्रथमस्यामृतानामित्येतयर्चा । तमग्निरुवाच । सविता वै प्रसवानामीशे तमेवोपधावेति । स सवितारमुपससाराभि त्वा देव सवितरित्येतेन तृचेन । तं सवितोवाच । वरुणाय वै राज्ञे नियुक्तोऽसि तमेवोपधावेति । स वरुणं राजानमुपससारात उत्तराभिरेकत्रिंशता । तं वरुण उवाच । अग्निर्वै देवानां मुखं सुहृदयं तं नु स्तुह्यथ त्वोत्स्रक्ष्यामीति सोऽग्निं तुष्टावात उत्तराभिरेव द्वाविंशत्या । तमग्निरुवाच । विश्वान्नु देवान्स्तुह्यथ त्वोत्स्रक्ष्यामीति । स विश्वान्देवांस्तुष्टाव नमो महद्भ्यो नमो अर्भकेभ्य इत्येतयर्चा । तं विश्वे देवा ऊचुः । इन्द्रं नु स्तुह्यथ त्वोत्स्रक्ष्याम इति । स इन्द्रं तुष्टाव यच्चिद्धि सत्य सोमपा इत्वेतेव सूक्तेनोत्तरस्य च पञ्चदशभिः । तस्मा इन्द्रः स्तूयमानो मनसा हिरण्यरथं ददौ । तमेतयर्चा प्रतीयाय शश्वदिन्द्र इति । तमिन्द्र उवाच । अश्विनौ नु स्तुह्यथ त्वोत्स्रक्ष्यामीति । सोऽश्विनौ तुष्टावात उत्तरेण तृचेन । तमश्विना ऊचतुः उषमं नु स्तुह्यथ त्वोत्स्रक्ष्याव इति । स उषसं तुष्टावात उत्तरेणैव तृचेन । तस्य ह स्मर्च्यृच्युक्तायां नितरां पाशो मुमुचे कनीय ऐक्ष्वाकस्योदरं बभूव । उत्तमायां ह स्मर्च्युक्तायां वि पाशो मुमुचेऽगद ऐक्ष्वाको बभूव । अथ हैममृत्विज ऊचुः । त्वमेवैतस्याह्नः संस्थामधिगच्छेः २२

अथ हैनमञ्जःसवं शुनःशेपो ददर्श । यच्चिद्धि त्वं गृहेगृह इति तमेताभिश्चतसृभिरभिषुत्योच्छिष्टं चम्वोर्भरेति द्रोणकलशे समवनिनाय । अथास्मिन्नन्वारब्ध एतस्यैव सूक्तस्य पूर्वाभिश्चतसृभिर्जुहवां चकार । अथ हैनमवभृयमभ्यवनिनाय स त्वं नो अग्नेऽवमस्त्वं नो अग्ने वरुणस्य

विद्वानित्येताभ्यामृग्भ्याम् । अथ हैनमग्निमुपस्थापयामास शुनश्चिच्छेपं निदितं सहस्रादित्येतयर्चा २३

अथ ह शुनःशेपो विश्वामित्रस्योपस्थमाससार । तं होवाचाजीगर्तः सौयवसिः पुनर्मे पुत्रं देहीति । नेति होवाच विश्वामित्रः । देवा वा इमं मह्यमरासतेति स ह देवरातो नाम वैश्वामित्र आस । तं होवाचाजीगर्तः सौयवसिः । तं वै
विह्वयावहा इति तथेति

आङ्गिरसो जन्मनाम्याजीगर्तः श्रुतः कविः
ऋषे पैतामहात्तन्तोर्मापगाः पुनरेहि माम् । इति

स होवाच शुनःशेपः
अद्राक्षुस्त्वा शासहस्तं न यच्छूद्रेष्वलिप्सत
गवां त्रीणि शतानि त्वमवृणीथा मदङ्गिरः । इति

तं होवाचाजीगर्तः सौयवसिः
तद्वै मा तात तपति पापं कर्म मया कृतम्
तदहं निह्नवे तुभ्यं प्रतियन्तु शता गवाम् । इति

स होवाच शुनःशेपः
यः सकृत्पापकं कुर्यात्कुर्यादेनस्ततोऽपरम्
मापगाः शौद्रान्न्यायादसंधेयं त्वया कृतम् । इति

असंधेयमिति वा अवोचदिति ह विश्वामित्र उपपपाद २४
भीम एव सौयवसिः शासेन विशिशासिषत्
अस्थान्मैतस्य पुत्रो भूर्ममैवोपेहि पुत्रताम् । इति

स होवाच शुनःशेपः
स वै यथा नो ज्ञपया राजपुत्र तथा वद
यथैवाङ्गिरसः सन्नुपेयां तव पुत्रताम् । इति

तं होवाच विश्वामित्रः
ज्येष्ठो मे त्वं पुत्राणां स्यास्तव श्रेष्ठा प्रजा स्यात्
उपेया दैवं मे दायं तेन वै त्वोपमन्त्रये । इति

स होवाच शुनःशेपः
संजानानेषु वै ब्रूयाः मे सौहार्दाय मे श्रियै
यथाहं भरतर्षभोपेयां तव पुत्रताम् । इति

अथ ह विश्वामित्रः पुत्रानामन्त्रयां चक्रे २५
मधुच्छन्दाः शृणोतन ऋषभो रेणुरष्टकः
ये के च भ्रातरः स्था अस्मै ज्यैष्ठ्याय तिष्ठध्वम् । इति

तस्य हैकशतं पुत्रा आसुः । पञ्चाशदेव ज्यायांसो मधुच्छन्दसः पञ्चाशत्कनीयांसः । तद्ये ज्यायांसो न ते कुशलं मेनिरे । ताननुव्याजहार । अन्तं वः प्रजा भक्षीष्टेति । त एते । अन्ध्राः पुण्ड्राः शबरा मूचीपा इति । उदञ्चो बहुदस्यवो वैश्वामित्रा दस्यूनां भूयिष्ठा इत्युदाहरन्ति । अथ ये मधुच्छन्दःप्रभृतयः कनीयांसस्ते कुशलं मेनिरे । स ह जगौ मधुच्छन्दाः

यं नःपिता संजानीते तस्मिंस्तिष्ठामहे वयम्
पुरस्तात्सर्वे कुर्महे त्वामन्वञ्चो वयं स्मसि । इति

अथ ह विश्वामित्रः प्रतीतः पुत्रांस्तुष्टाव २६

ते वै पुत्राः पशुमन्तः प्रजावन्तो भविष्यथ
ये मानं मेऽनुगृह्णन्तो वीरवन्तमकर्त मा

पुरएत्रा वीरवन्तो देवरातेन गाथिनाः
सर्वे राध्यास्तु पुत्रा एष वस्तद्विवाचनः

एष वः कुशिका वीरो देवरातस्तमन्वित

युष्मांश्च दायं चोपेतां विद्यां यामुत विद्मसि

ते सम्यञ्चो वैश्वामित्राः सर्वे साकं सरातयः
देवराताय तस्थिरे ज्यैष्ठ्ये श्रैष्ठ्ये च गाथिनाः

अधीयते देवरातो रिक्थयोरुभयोर्ऋषिः
जह्नूनां चाधितस्थिरे दैवे वेदे च गाथिनाः

तदेतच्छौनःशेपमाख्यानं परःशतग्गाथमपरिमितम् । तद्धोताभिषिक्तायाचष्टे हिरण्यकशिपावासीन आचष्टे । हिरण्यकशि-पावासीनः प्रतिगृणाति । ओमित्यृचः प्रतिगरः । एवं तथेति गाथायाः । ओमिति वै दैवं तथेति मानुषम् । दैवेन चैवैनं तन्मानुषेण च सर्वस्मादेनसः संप्रमुञ्चति । तस्माद्यो राजाविजिती स्यादप्ययजमान आख्यापयेतैवैतच्छौनःशेपमाख्यानम् । न ह्यस्मिन्नल्पं चनैनः परिशिष्यते । सहस्रमाख्यात्र शतं प्रतिगरित्र एते चैवासने पुत्रकामा हाप्याख्यापयन्ते । लभन्ते ह पुत्रानृभन्ते ह पुत्रान् २७

इति शाङ्खायनश्रौतसूत्रे पञ्चदशोऽध्यायः समाप्तः

प्रजापतिरकामयत । सर्वान्कामानाप्नुयां सर्वा व्यष्टीर्व्यश्नुवीयेति । स एतं त्रिरात्रं यज्ञक्रतुमपश्यदश्वमेधम् । तमाहरत् । तेनायजत तेनेष्ट्वा सर्वान्कामा-नाप्नोत्सर्वा व्यष्टीर्व्याश्नुत । तथो एवैतद्यजमानो यदश्वमेधेन यजते सर्वान्कामानाप्नोति सर्वा व्यष्टीर्व्यश्नुते १ महर्त्विग्भ्यो निर्वपति चतुरः पात्रानञ्जलीन्प्रसृतांश्च २ द्वादशविधम् ३ द्वादश वै मासाः संवत्सरः ४ संवत्सरस्यैवाप्त्यै ५ अथास्मा अध्वर्युर्निष्कं प्रतिमुञ्चति ६ सायमाहुतौ हुतायां जघनेन गार्हपत्यमुदङ्वावातया सह संविशति ७ अन्तरोरू असंवर्तमानः शयीत ८ अनेन तपसेमं खस्तिसंवत्सरं समश्नवामहा इति ९ तं प्रातराहुतौ हुतायां ददाति १० अथाग्नेयमष्टाकपालं पुरोलाशं निर्वपति ११ अग्निर्वै देवानां मुखं मुखत एव तद्देवान्प्रीणाति १२ अथ पूष्णे पथिकृते चरुं निर्वपति १३ पूषा वै पथोनामधिपः । स्वस्त्ययनमेव तदश्वाय करोति १४ सर्वरूसूमश्वं जवेन संपन्नं संवत्सरायोत्सृजन्ति सर्वकामिनमन्यत्राब्रह्मचर्यात् १५ शतं राजपुत्राः कवचिनो राजन्या निषङ्गिणः सूतग्रामणीनां पुत्रा उपवीतिनः

क्षत्रसंग्रहीतॄणां पुत्रा दण्डिनोऽनावर्तयन्तोऽश्वं रक्षन्ति १६ अथ सवित्रे प्रसवित्रे सवित्र आसवित्रे सवित्रे सत्यप्रसवायेति संवत्सरं हवींषि १७ सविता वै प्रसविता स म इमं यज्ञं प्रसुवा इति १८ सविता वा आसविता स म इमं यज्ञमासुवा इति १९ सविता वै सत्यप्रसवः स म इमं यज्ञं सत्येन प्रसवेन प्रसुवा इति २० य इमा विश्वा जातान्या देवो यातु सविता सुरत्नो विश्वानि देव सवितः स घा नो देवः सविता विश्वदेवं न प्रमिये २१ होता च पारिप्लवमाचष्टे २२ अध्वर्यो इत्यामन्त्रितो होयि होतरिति सर्वत्र प्रतिशृणोति २३ ओं होतस्तथा होतरित्याचक्षाणेऽनुगृणाति २४ अथाध्व-र्युर्वीणागणगिनः संप्रेष्यति पुराणैरेनं पुण्यकृद्भी राजभिः संगायतेति २५ १

मनुर्वैवस्वत इति प्रथमे १ तस्य मनुष्या विशस्त इम आसत इति गृहमेधिन उपदिशति २ ऋचोवेदो वेदः सोऽयमिति सूक्तं निगदेत् ३ यमो वैवस्वत इति द्वितीये ४ तस्य पितरो विशस्त इम आसत इति स्थविरानुपदिशति ५ यजुर्वेदो वेदः सोऽयमिति याजुषमनुवाकं निगदेत् ६ वरुण आदित्य इति तृतीये ७ तस्य गन्धर्वा विशस्त इम आसत इति यूनः शोभनानुपदिशति ८ अथर्ववेदो वेदः सोऽयमिति भेषजं निगदेत् ९ सोमो वैष्णव इति चतुर्थे १० तस्याप्सरसो विशस्ता इमा आसत इति युवतीः शोभना उपदिशति ११ आङ्गिरसो वेदो वेदः सोऽयमिति घोरं निगदेत् १२ अर्बुदः काद्रवेय इति पञ्चमे १३ तस्य सर्पा विशस्त इम आसत इति सर्पान्सर्पविदो वोपदिशति १४ सर्पविद्या वेदः सोऽयमिति सर्पविद्यां निगदेत् १५ कुबेरो वैश्रवण इति षष्ठे १६ तस्य रक्षांसि विशस्तानीमान्यासत इति सेलगान्पापकृतो वोपदिशति १७ रक्षोविद्या वेदः सोऽयमिति रक्षोविद्यां निगदेत् १८ असितो धान्वन इति सप्तमे १९ तस्यासुरा विशस्त इम आसत इति कुसीदिन उपदिशति २० असुरविद्या वेदः सोऽयमिति मायां कांचित्कुर्यात् २१ मत्स्यः सांमद इत्यष्टमे २२ तस्योदकचरा विशस्त इम आसत इति मत्स्यान्मत्स्यविदो वोपदिशति २३ इतिहासवेदो बेदः सोऽयमितीतिहासमाचक्षीत २४ तार्क्ष्यो वैपश्यत इति नवमे २५ तस्य वयांसि विशस्तानीमान्यासत इति वयांसि ब्रह्मचारिणो वोपदिशति २६ पुराणवेदो वेदः सोऽयमिति पुराणमाचक्षीत २७ धर्म इन्द्र इति दशमे २८ तस्य देवा विशस्त इम आसत इति यूनोऽप्रतिग्राहका-ञ्छ्रोत्रियानुपदिशति २९ सामवेदो वेदः सोऽयमिति साम गायात् ३०

सर्वान्वेदानाचष्टे ३१ सर्वाणि राज्यानि ३२ सर्वा विशः ३३ सर्वं वा अश्वमेधः ३४ सर्वेण सर्वमाप्नवानीति ३५ तद्यत्पुनःपुनः परिप्लवते तस्मात्पारिप्लवम् ३६ २

एकविंशतिर्यूपा एकविंशत्यरत्नयः १ अष्टौ बैल्वा दश खादिराः २ पैतुद्रवा उपस्थावानौ ३ राज्जुदालोऽग्निष्ठः ४ एकविंशतिरग्नीषोमीयाः ५ तेषां समानं चरणम् ६ गोतमस्य चतुरुत्तरस्तोमः सुत्यानां प्रथममहः ७ तेनेमं लोकमाप्नोति ८ एकविंशस्तोमं द्वितीयम् ९ एकविंशो वा एष य एष तपति तदेनं स्वेन रूपेण समर्धयति १० एतस्मादश्वो निस्तष्टः ११ तदेतदृचाभ्युदितम् सूरादश्वं वसवो निरतष्टेति १२ अश्वो गोमृगोऽजस्तूपरस्ते प्राजापत्याः १३ गौरो गवयः शरभ उष्ट्रो मायुः किंपुरुष इत्यनुस्तरणाः १४ पशवश्चैकविंशतिरेकविंशतिरेकविंशतये चातुर्मास्यदेवताभ्यः १५ एता वै सर्वा देवता यच्चातुर्मास्यदेवताः १६ सर्वासामेव देवतानां प्रीत्यै १७ अलंकृतमश्वमास्तवमवघ्रापयन्ति १८ सुगव्यं न इत्यनवजिघ्रति यजमानं वाचयेत् १९ अग्रेण यूपं तिष्ठन्तं यदक्रन्द इत्येकादशभिरप्रणवाभिः २० समिद्धो अञ्जन्नित्याप्रियः २१ अध्रिगो ३ इति परिशिष्य मा नो मित्र इति सूक्तम् २२ उत्तमे चोत्तरस्याप्रणुवन् २३ चतुस्त्रिंशदिति पुरस्ताद्वङ्क्रीणाम् २४ अथाश्वायोपस्तृणन्ति वासोऽधीवासं हिरण्यमिति २५ तदेतदृचाभ्युदितम् । यदश्वाय वास उपस्तृणन्त्यधीवासं या हिरण्यान्यस्मा इति २६ अथाश्वं मेध्यमालभन्ते २७ पर्यङ्ग्यान्बहूनारण्यान् २८ पूष्णो ललाटे २९ तदेतदृचाभ्युदितम् । अत्रा पूष्णः प्रथमो भाग एतीति ३० ऐन्द्रापौष्णः श्यामो नाभ्याम् ३१ तदेतदृचाभ्युदितम् । इन्द्रापूष्णोः प्रियमप्येति पाथ इति ३२ संज्ञप्राय महिषीमुपनिपातयन्ति ३३ तावधीवासेन संप्रोर्णुवते ३४ तौ यजमानोऽभिमेथति ३५ उत्सक्थ्योरव गुदं धेह्यर्वाञ्चमञ्जिमा भर । यः स्त्रीणां जीवभोजनः ॥ इति ३६ तं न कश्चन प्रत्यभिमेथति ३७ ३

माता च ते पिता च तेऽग्रे वृक्षस्य क्रीलतः
प्र तिलामीति ते पिता गर्भे मुष्टिमतंमयत
इत्येनां होताभिमेयति १

ऊर्ध्वासेनामुच्छ्रयताद्गिरौ भारं हरन्निव
अथास्यै मध्यमेजति शीते वाते पुनन्निव
इति ब्रह्मा वावाताम् २ यदस्या अंहुभेद्या इत्युद्गाता परिवृक्ताम् ३

यद्धरिणो यवमत्ति न पुष्टं बह मन्यते
शूद्रा यदर्यजारा न पोषाय धनायति

इत्यध्वर्युः पालागलीम् ४ अश्वपालानां समाजजातीयाः शतंशतमनुच-र्यस्ताः प्रत्यभिमेथन्ति ५ यियश्यत इव ते मनो होतर्मा त्वं वदो बहु । ऊर्ध्वमेनं । यद्देवासो ललामगुं । शूद्रो यदर्यजायाः पतिरिति प्रत्यभिमेथने विकारः ६ मदसि ब्रह्मवद्यम् ७ होताध्वर्युं पृच्छति । द्वितीयया प्रत्याह तृतीयया पृच्छति । चतुर्थ्या प्रत्याह ८ ४

किं स्वित्सूर्यसमं ज्योतिः किं समुद्रसमं सरः
कः स्वित्पृथिव्यै वर्षीयान्कस्य मात्रा न विद्यते १

ब्रह्म सूर्यसमं ज्योतिर्द्यौः समुद्रसमं सरः
इन्द्रः पृथिव्यै वर्षीयान्गोस्तु मात्रा न विद्यते २

कः स्विदेकाकी चरति क उ स्विज्जायते पुनः
किं स्विद्धिमस्य भवजं किं स्विदाबपनं महत् ३

सूर्य एकाकी चरति चन्द्रमा जायते पुनः
अग्निर्हिमस्य भेषजं भूमिरावपनं महत् ४ इति १

ब्रह्मोद्गातारं पृच्छति । द्वितीयया प्रत्याह । तृतीयया पृच्छति । चतुर्थ्या प्रत्याह २ ५

पृच्छामि त्वा चितये देवसख यदि त्वमत्र मनसा जगन्थ
केषु विष्णुस्त्रिषु पदेष्विष्टः केषु विश्वं भुवनमा विवेश १

अपि तेषु त्रिषु पदेष्वस्मि येषु विश्वं भुवनमा विवेश
सद्यः पर्येमि पृथिवीमुत द्यामेकेनाङ्गेन दिवो अस्य पृष्ठम् २

केष्वन्तः पुरुष आ विवेश कान्यन्तः पुरुषे अर्पितानि
एतद्ब्रह्मन्नुप वल्हामसि त्वा किं स्विन्नः प्रतिवोचास्यत्र ३

पञ्चस्वन्तः पुरुष आ विवेश तान्यन्तः पुरुषे अर्पितानि
एतत्त्वात्र प्रति मन्वानो अस्मि न मायया भवस्युत्तरो मत् ४ इति १

पृच्छामि त्वा परमन्तं पृथिव्या इति यजमानं पृच्छति २ उत्तरया प्रत्याह ३ ६

सुभूः स्वयंभूः प्रथममन्तर्महत्यर्णवे
दधे ह गर्भमृत्वियं यतो जातः प्रजापतिः

इति महिम्नः पुरोनुवाक्या १ होता यक्षत्प्रजापतिमिति प्रैषः २ प्रजापते न त्वदिति याज्या ३ प्राजापत्यस्य वपया चरित्वा तदन्वन्या वपा जुहुयुरिति हैक आहुः । प्रजापतिं वा अन्वन्या देवतास्तदेना यथायथं प्रीणातीति ४ ऐन्द्राग्नस्य वा ५ वैश्वदेवस्य वा ६ किमुत त्वरेरन्निति ह स्माहेन्द्रोतः शौनकः ७ नाना नानादेवताभिः प्रचरेयुः ८ सहसह समानदेवताभिरव्यवस्थाभिः ९ नाना व्यवस्थाभिः १० तदेना यथायथं प्रीणातीति ११ उत्तरस्य महिम्नो याज्यापुरोनुवाक्ये विपर्यस्येत् १२ उभे ऐकाहिकं च पाङ्क्तं चाज्ये संशंसेत् १३ य ऐकाहिके च पाङ्क्ते चाज्ये कामस्तयोरुभयोराप्त्यै १४ उभावैकाहिकं च बार्हतं च प्रउगौ सम्प्रवयेत् १५ य ऐकाहिके च बार्हते च प्रउगे कामस्तयोरुभयोराप्त्यै १६ ७

महानाम्न्यः पृष्ठं भवन्ति १ सर्वं वै तद्यन्महानाम्न्यः २ सर्वमश्वमेधः ३ सर्वेण सर्वमाप्नवानीति ४ यानि पाञ्चमाह्निकानि निष्केवल्यमरुत्वतीययोः सूक्तानि तानि पूर्वाणि शस्त्वैकाहिकयोर्निविदौ दधाति ५ प्रतिष्ठा वा एकाहः ६ प्रतिष्ठित्या एव ७ सहस्रं वा मध्यन्दिने ८ छन्दसश्छन्दसश्चत्वारिंशतं

चत्वारिंशतं मरुत्वतीये ९ ते द्वे अशीतिशते १० सप्तविंशतिशतानि निष्केवल्ये ११ तत्सहस्रम् १२ सर्वं वै तद्यत्सहस्रम् १३ सर्वमश्वमेधः १४ सर्वेण सर्वमाप्नवानीति १५ यानि पाञ्चमाह्निकानि वैश्वदेवाग्निमारुतयोः सूक्तानि तानि पूर्वाणि शस्त्वैकाहिकेषु निविदो दधाति १६ प्रतिष्ठा वा एकाहः १७ प्रतिष्ठित्या एव १८ उक्थ्यं संतिष्ठते १९ तेनान्तरिक्षलोकमाप्नोति २० सर्वस्तोमोऽतिरात्र उत्तममहः २१ सर्वं वै सर्वस्तोमोऽतिरात्रः २२ सर्वमश्वमेधः २३ सर्वेण सर्वमाप्नवानीति २४ तेनामुं लोकमाप्नोति २५ द्वितीयादाभिप्लविकाच्छस्त्रम् २६ एतेन हेन्द्रोतः शौनको जनमेजयं पारिक्षितं याजयां चकार २७ तदुतैषापि यज्ञगाथा गीयते २८ ८

आमन्दीवति धान्यादं रुक्मिणं हरितस्रजम्
अबध्नादश्वं सारङ्गं देवेभ्यो जनमेजयः इति १

एते एव पूर्वे अहनी । ज्योतिरतिरात्रस्तेनोग्रसेनम् २ गौस्तेन भीमसेनम् ३

आयुस्तेन श्रुतमेनम् ४ सर्वे पारिक्षितीयाः ५ तदुतैषापि यज्ञगाथा गीयते ६

पारिक्षिता यजमाना अश्वमेधैः परोवरम्
अजहुः पापकं कर्म पुण्याः पुण्येन कर्मणा । इति ७

अभिजित्तेन ह ऋषभो याज्ञतुर ईजे ८ तदुतैषापि यज्ञगाथा गीयते ९

ऋषभेऽश्वेन यजति पुरा याज्ञतुरे जृपे
अमाद्यदिन्द्रः सोमेन ब्राह्मणाश्चेप्सितैर्धनैः । इति १०

विश्वजित्तेन ह पर आह्णार ईजे वैदेहः ११ तदुतैषापि यज्ञगाथा गीयते १२

आह्णारस्य परस्यादोऽश्वं मेध्यमबध्नत
हिरण्यनाभः कौसल्यो दिशः पूर्णा अमंहत । इति १३

महाव्रतमतिरात्रस्तेन ह मरुत्त आविक्षित ईजे १४ तदुतैषापि यज्ञगाथा गीयते १५

मरुतः परिवेष्टारो मरुत्तस्यावसन्गृहे
आविक्षितस्याग्निः क्षत्ता विश्वेदेवाः सभासदः । इति १६

ततो हास्य तद्देवताः सभासदो बभूवुः १७ प्राची दिग्घोतुः १८ दक्षिणा ब्रह्मणः १९ प्रतीच्यध्वर्योः २० उदीच्युद्गातुः २१ यदन्यद्भूमेः पुरुषेभ्यश्चा-ब्राह्मणानां स्वम् २२ अत्रैव होत्रकाणाम् २३ मध्ये तु यजेत २४ पञ्चशशुर्विशाखयूपः २५ संवत्सरमृतुपशवः २६ षलाग्नेया वसन्ते २७ ऐन्द्रा ग्रीष्मे २८ मारुताः पार्जन्या वा वर्षासु २९ मैत्रावरुणाः शरदि ३० बार्हस्पत्या हेमन्ते ३१ ऐन्द्रावैष्णवाः शिशिरे ३२ ९

प्रजापतिरश्वमेधेनेष्ट्वा पुरुषमेधमपश्यत् । तस्य यदनाप्तमश्वमेधेनासीत्तत्सर्वं पुरुषमेधेनाप्नोत् । तथो एवैतद्यजमानो यत्पुरुषमेधेन यजते यदस्यानाप्तम-श्वमेधेन भवति तत्सर्वं पुरुषमेधेनाप्नोति १ सर्वमाश्वमेधिकम् २ उपजनश्च ३ अथाग्नये कामाय दात्रे पथिकृत इति हवींषि ४ अग्निर्वै कामो देवानामीश्वरः ५ सर्वेषामेव देवानां प्रीत्यै ६ अग्निर्वै दाता स एवास्मै यज्ञं ददाति ७ अग्निर्वै पथिकृत्स एवैनं पुनर्यज्ञपथमपिपाथयति ८ ब्राह्मणं क्षत्रियं वा सहस्रेण शताश्वेनावक्रीय संवत्सरायोत्सृजन्ति सर्वकामिनमन्यत्राब्रह्मचर्यात् ९ तथा चैवानुरक्षन्ति १० अथानुमतये पथ्यायै स्वस्तयेऽदितय इति संवत्सरं हवींषि ११ सावित्रैर्विपर्यासम् १२ पारिप्लवीयैर्नाराशंसानि १३ अनुमत्यानुमतो ऽनेन यज्ञेन यजा इति १४ गाग्वै पथ्या स्वस्तिः स्वस्त्ययनमेव तद्यज्ञे यजमानाय करोति १५ इयं वा अदितिः प्रतिष्ठा वा अदितिरस्यामेवैनं तददीनायामन्ततः प्रतिष्ठापयन्ति १६ १०

शौनःशेपं प्रथमम् १ यया शुनःशेप आजीगर्तिर्यूपे नियुक्तो मुमुचे २ प्रथमे च सूक्ते निगदेत् ३ काक्षीवतं द्वितीयम् ४ यथा कक्षीवानौशिजः स्वनये भावयव्ये सनिं ससान ५ उत्तमे च सूक्ते निगदेत् ६ श्यावाश्वं तृतीयम् ७ यथा श्यावाश्व आर्चनानसो वैददश्वौ सनिं ससान ८ के ष्ठा नर इति च सूक्तम्

९ भारद्वाजं चतुर्थम् १० यथा भरद्वाजो बृबौ तद्दिण प्रस्तोके च साञ्जये सनिं ससान ११ अधि बृबुः प्रस्तोक इति चतस्रः १२ वासिष्ठं पञ्चमम् १३ यथा वसिष्ठः सुदासः पैजवनस्य पुरोहितो बभूव १४ द्वे नप्तुरिति च सूक्तम् १५ मैधातिथं षष्ठम् १६ यथासङ्गः प्लायोगिः स्त्री सती पुमान्बभूव १७ स्तुहिस्तुहीति च सूक्तम् १८ वात्स्यं सप्तमम् १९ यथा वत्सः कारावस्तिरिन्दिरे पारशव्यये सनिं ससान २० शतमहं तिरिन्दिर इति च सूक्तम् २१ वाशमष्टमम् २२ यथा वशोऽश्व्यः पृथुश्रवसि कानीते सनिं ससान २३ आ स एतु य ईवदेति च सूक्तम् २४ प्रास्करावं नवमम् २५ यथा प्रस्करावः पृषध्रे मेध्ये मातरिश्वनि सनिं ससान २६ भूरीदिन्द्रस्येति च सूक्ते २७ नाभानेदिष्ठं दशमम् २८ यथा नाभानेदिष्ठो मानवोऽङ्गिरःसु सनिं ससान २९ ये यज्ञेनेति च सूक्तम् ३० नाराशंसानि भवन्ति ३१ पुरुषो वै नाराशंसः ३२ तदेनं स्वेन रूपेण समर्धयति ३३ ११

पञ्चविंशतिर्यूपाः १ पञ्चविंशत्यरत्नयः २ दश बैल्वा द्वादश खादिराः ३ ऐतुद्रवा उपस्थावानौ ४ राज्जुदालो वा सारलोऽग्निष्ठः ५ पञ्चविंशति-रग्नीषोमीयाः ६ तेषां समानं चरणम् ७ आश्वमेधिकानां सुत्यानां प्रथमे चोत्तमं च ८ पञ्चविंशस्तोमं द्वितीयम् ९ पञ्चविंशो वै पुरुषः १० तदेनं स्वेन रूपेण समर्धयति ११ पुरुषो गोमृगोऽजस्तूपरस्ते प्राजापत्याः १२ गौरो गवयः शरभ उष्ट्रो मायुः किंपुरुष इत्यनुस्तरणाः १३ पशवश्च पञ्चविंशतिः पञ्चविंशतिः पञ्चविंशतये चातुर्मास्यदेवताभ्यः १४ एता वै सर्वा देवता यच्चातुर्मास्यदेवताः १५ सर्वासामेव देवतानां प्रीत्यै १६ अलंकृतं पुरुषमा-स्तवमवघ्राप्योदीरतामवर इत्येकादशभिरप्रणवाभिः १७ अग्निर्मृत्युरित्याप्रियः १८ मैनमग्न इत्यध्रिगौ तथैव १९ अथ पुरुषायोपस्तृणन्ति कौशं तार्प्यमा-रुणमांशवमिति २० संज्ञप्तं यामेन साम्नोद्गातोपतिष्ठते २१ १२

पुरुषेण नारायणेन होता १ अथ हैनमृत्विज उपतिष्ठन्ते परेयिवांसमिति द्वाभ्यांद्वाभ्यां होता ब्रह्मोद्गाताध्वर्युः २ अथ यजमानं भिषज्यन्ति ३ उत देवा अवहितं मुञ्चामि त्वा हविषाजीवनाय कमत्तीभ्यां ते नासिकाभ्यां वात आ वातु भेषजमित्यनुपूर्वं सूक्तैः ४ प्र तार्यायुरिति नैर्ऋतीनामेकैकया ५ तिसृभिस्तिसृभिः शंतातीयानाम् ६ संज्ञप्ताय महिषीमुपनिपातयन्ति ७

तावधीवासेन संप्रोर्णुवते ८ तौ तथैव यजमानोऽभिमेथति ९ परिवृक्ता अप्रपाणा योऽनाक्ताक्षो न सेशे यस्य रोमशमित्यभिमेथिन्यः १० उत्तराभिरुत्तराभिः प्रत्यभिमेथन्ति ११ पूर्वयाध्वर्युः १२ उदीर्ष्व नार्युदीर्ष्वातः पतिवत्युदीर्ष्वातो विश्वावसोऽश्मन्वतीत्युत्थापिन्यः १३ मनो न्वसुनीते यत्ते यमं यथा युगमिति तृचैरनुमन्त्रयते १४ ब्रह्मानुवाचयति १५ सदसि ब्रह्मवद्यम् १६ गावो यवमिति होताध्वर्युं पृच्छति । द्वितीयया प्रत्याह । तृतीयया पृच्छति । चतुर्थ्या प्रत्याह १७ द्वे स्रुती अशृणवं पितॄणामिति ब्रह्मोद्गातारं पृच्छति । द्वितीयया प्रत्याह । एकान्तरया पृच्छति । उत्तरया प्रत्याह १८ १३

आश्वमेधिकमाज्यात् १ उभे ऐकाहिकं च माहाव्रतिकं चाज्ये संशंसेत् २ य ऐकाहिके च माहाव्रतिके चाज्ये कामस्तयोरुभयोराप्त्यै ३ उभावैकाहिकं च माहाव्रतिकं च प्रउगौ संप्रवयेत् ४ य ऐकाहिके च माहाव्रतिके च प्रउगे कामस्तयोरुभयोराप्त्यै ५ महाव्रतान्मध्यन्दिनः ६ राजनं पृष्ठं भवति ७ एतद्वै पुरुषविधं साम यद्राजनम् । तदेनं स्वेन साम्ना समर्धयति ८ अनुचरप्रभृति षष्ठात्तृतीयसवनम् ९ नाराशंसं वै षष्ठमहः १० पुरुषो वै नाराशंसः ११ तदेनं स्वेन रूपेण समर्धयति १२ महादिवाकीर्त्यमग्निष्टोमसाम भवति १३ एतद्वौ पुरुषविधं साम यन्महादिवाकीर्त्यम् । तदेनं स्वेन साम्ना समर्धयति १४ षोलश्यन्तं संतिष्ठते १५ षोलशकलो वै पुरुषः । तदेनं स्वेन रूपेण समर्धयति १६ पृष्ठ्यस्य पञ्चमं चतुर्थमहः १७ सहपुरुषं च दीयते १८ दशपशुर्विंशाखयूपः १९ द्वादशद्वादशर्तुपशवः २० १४

ब्रह्म स्वयंभु तपोऽतप्यत । तत्तपस्तप्त्वेक्षत । न वै तपस्यानन्त्यमस्ति हन्त सर्वेषु भूतेष्वात्मानं जुहवानीति । तत्सर्वेषु भूतेष्वात्मानं हुत्वा सर्वाणि भूतानि सर्वेमेधे जुहवां चकार । ततो वै तत्सर्वेषां भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येत् । तथो एवैतद्यजमानो यत्सर्वमेधेन यजते सर्वेषु भूतेष्वात्मानं हुत्वा सर्वाणि भूतानि सर्वमेधे जुहवां करोति । ततो वै स सर्वेषां भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति १ पौरुषमेधिकं पुरस्तात्कर्म २ अग्निष्टुदिन्द्रस्तुद्वैश्वदेवस्तुत्सूर्यस्तुत्यश्वमालभन्ते ३ पौरुषमेधिकं पञ्चममहः ४ तत्र पुरुषमालभन्ते ५ वाजपेयः षष्ठम् ६ आप्तोर्यामः सप्तमम् ७ तत्र

सर्वान्मेधानालभन्ते ये के च प्राणिनः ८ वपा वपावतां जुह्वति ९ त्वचो ऽवपाकानाम् १० संव्रश्चमोषधिवनस्पतीनां प्रकिरन्ति ११ त्रिणवत्रयस्त्रिंशे अष्टमनवमे अहनी १२ विश्वजित्सर्वस्तोमः सर्वपृष्ठोऽतिरात्र उत्तममहः १३ सर्वं वै शिश्वजित्सर्वस्तोमः सर्वपृष्ठोऽतिरात्रः १४ सर्वं सर्वमेधः १५ सर्वेण सर्वमाप्नवानीति १६ विंशतिपशुर्विंशाखयूपः १७ चतुर्विंशतिश्चतु-र्विंशतिर्ऋृतुपशवः १८ अत्र सर्वमेधः संतिष्ठते १९ सहभूमि च दीयते २० १५

गार्हपत्येऽधरारणिमनुप्रहृत्य । आहवनीय उत्तरारणिम् । आत्मन्यग्नी समारोप्य । अरण्यं प्रव्रजेत् १ विश्वकर्मा ह भौवनोऽन्तत ईजे २ तं ह भूमिरुवाच न मा मर्त्यः कश्चन दातुमर्हति विश्वकर्मन्भौवन मां दिदासिथ । उप मङ्क्ष्येऽहं सलिलस्य मध्ये मृषैव ते संगरः कश्यपाय ॥ इति ३ तां कश्यप उज्जहार ४ १६

वाजपेये ब्रह्मौदुम्बरं रथचक्रमारोहति वाजस्याहं सवितुः सवे सत्यसवस्य बृहस्पतेरुत्तमं नाकं रोहेयमिति १ इन्द्रस्येति क्षत्रिये यजमाने २ मरुतामिति वैश्ये ३ तस्मिन्नुपविश्याविद्धे रथचक्रेऽसंप्रेषितस्त्रिः साम गायति ४ अपि वा जपेत्त्रिः ५

आविर्मर्या आ वाजं वाजिनो अग्मन्
देवस्य् सवितुः सवे स्वर्गाँ अर्वन्तो जयत । इति च ६

तेनैव मन्त्रेण प्रत्यवरोहति ७ अरुहमिति प्रत्यवरोहणे विकारः ८ हिर-ण्मयेन पात्रेण मधुग्रहस्य प्राणभक्षं भक्षयित्वोपयच्छते पात्रम् ९ दिवमयं यजमानो रोहति स्वर्गमयं यजमानो रोहतीति वा १० यूपं रोहन्तमूषपुटैरर्पयन्ति ११ १७

राजसूयेऽभिषिक्तो यजमानो ब्रह्मन्निति पञ्चकृत्वो ब्रह्माणमामन्त्रयते १ त्वं ब्रह्मासीत्येवं सर्वत्र प्रतिशृणोति २ सवितासि सत्यप्रसव इति प्रथमे ३ इन्द्रो ऽसि विश्वौजा इति द्वितीये ४ वरुणोऽसि धर्मपतिरिति तृतीये ५ रुद्रोऽसि

सुशेव इति चतुर्थे ६ त्वं ब्रह्मासीत्येव पञ्चमे ७ मनसास्मै हिरण्मयौ प्रवृत्तौ ददाति ८ तौ मनसा प्रतिगृह्णाति ९ अश्वमेध ऋत्विजो रशना धारयन्तोऽश्वं ह्रदयोः संस्यन्दिनोः स्नापयन्ति १० अनेनायमश्वेन मेध्येन राजेष्ट्वा विजयतामब्रह्मण्युब्जिताया इति ११ यदि चैनं यजमानेन पृष्ठेऽभिमर्शयेयुरहं च त्वं चेति जपेत् १२ संस्थिते मध्यमेऽहन्याहवनीयमभितो दिक्षु प्रासादान्विमिन्वन्ति १३ तानुपरिष्टात्सनिव्याधैः प्राकारैः परिघ्नन्ति १४ सर्वौषधिमृत्विजो रात्रीं जुह्वति १५ प्रातरनुवाकवेलायां प्रत्यवरोहन्ति १६ परिकर्मिण आरोहन्ति । ते जुह्वत्योदयात् १७ अथात्रेयं सहस्रेणावक्रीय यः शुक्लः पिङ्गाक्षो वलिनस्तिलकावलो विक्लिधः खण्डो बण्डः खलतिस्तमादाय नदीं यन्ति १८ अथैनमुदकेऽभिप्रगाह्य यदास्योदकं मुखमास्यन्देताथास्मा अध्वर्युर्मूर्धन्यश्वतेदनिं जुहोति भ्रूणहत्यायै स्वाहेति १९ अथ तं निःषेधन्ति २० निःषिद्धपाप्मानोऽपग्रामा भवन्तीति २१ १८

अथात एकोत्तरा अहीनाः १ यदेकविधं तदेकरात्रेणाप्नोति २ १९

अथ यद्द्विविधं तद्द्विरात्रेण १ द्वे वा अहोरात्रे द्वे द्यावापृथिवी द्वे इमे प्रतिष्ठे तद्यत्किं च द्विविधमधिदैवतमध्यात्मं तत्सर्वमेनेनाप्नोति २ अव्यक्तोऽहः संघातो दशरात्रमधिकुर्वीत ३ आदितोऽवच्छेदः ४ अन्त्यस्यातिरात्रभावः ५ अन्वहं दक्षिणा ६ अदीक्षिता दीक्षितं याजयन्ति ७ मासापवर्गा अहीनाः ८ सुत्यप्रतिह्रासे दीक्षा विवर्धयेयुः ९ नासंवत्सरदीक्षिताय महाव्रतं शंसेत् १० नासंवत्सरभृतोखाय ११ नित्यमाग्निष्टोमिकं प्रथममहः स्यादिति हैक आहुः १२ मुख्यो वा एष यज्ञक्रतुर्यदग्निष्टोमः १३ यज्ञमुखस्यानवराध्यै १४ संपातौ तु निविद्धाने १५ ततं मे यज्ञेन वर्धतेत्यार्भवजातवेदसीये द्वितीयस्य १६ त्रिरात्रे च १७ अभिजिद्विश्वजितौ चतुर्विंशमहाव्रते गोआयुषी वा १८ यद्द्विविधं तद्द्विरात्रेणाप्नोति १९ २०

अथ यत्त्रिविधं तत्त्रिरात्रेण १ त्रयो वा इमे लोकास्त्रीणि ज्योतींषि त्रिषवणो यज्ञः । तद्यत्किं च त्रिविधमधिदैवतमध्यात्मं तत्सर्वमेनेनाप्नोति २ त्रिवृत्प्रभृतयस्त्रयः स्तोमाः प्रथमस्याह्नः ३ पञ्चदशप्रभृतयो द्वितीयस्य ४ षोलशं ब्रह्मण आज्यम् ५ एकविंशप्रभृतयस्तृतीयस्य ६ अग्निष्टोमः प्रथममहः

७ उक्थ्यं द्वितीयम् ८ अतिरात्रस्तृतीयम् ९ रथन्तरं पृष्ठं प्रथमस्य १० वामदेव्यं द्वितीयस्य ११ बृहत्तृतीयस्य १२ अयं वै लोको रथन्तरम् १३ अन्तरिक्षलोको वामदेव्यम् १४ असौ लोको बृहत् १५ एतेषामेव लोकानामाप्त्यै १६ समूल्हादाज्यानि १७ मध्यमाच्छन्दोमात्त्रैष्टुभः प्रउगो द्वितीयस्याह्नः १८ त्र्यर्यमेति मरुत्वतीयम् १९ यद्द्वितीयस्याह्नो मरुत्वतीयं तत्तृतीयेऽहनि करोति २० तदिमाँल्लोकान्संभोगिनः करोति तस्माद्धीमे लोका अन्योऽन्यमभिभुञ्जन्तीति २१ अहनी वा विपर्यस्येत् २२ कस्तमिन्द्रेति सामप्रगाथो निष्केवल्यस्य २३ मो षु त्वा वाघतश्चनेति स्तोत्रियानुरूपौ प्रगाथौ मैत्रावरुणस्योद्धृत्य द्विपदाम् २४ कं नव्य इति कद्वान् २५ द्वितीयादह्नः सूक्ते २६ अस्तावि मन्मोभयं शृणवदिति ब्राह्मणाच्छंसिनः २७ कदू न्वस्येति कद्वान् २८ आयन्त इव सूर्यं शग्ध्यू षु शचीपत इत्यच्छावाकस्य २९ यदिन्द्र प्रागपागुदगिति कद्वान् ३० कयाशुभीयतदिदासीये वा निविद्धाने द्वितीयस्य ३१ अनुचरप्रभृति षष्ठात्तृतीयसवनम् ३२ २१

एषो न्वै सहस्रस्तोत्रियो येन प्रजापतिरयजत १ एतमेव गर्गत्रिरात्र इत्याचक्षते २ द्वितीयोऽश्वत्रिरात्रः ३ मध्यमेऽहन्यश्वमालभन्ते ४ अधिगावश्वस्तोमीयम् ५ तृतीयश्छान्दोमः पवमानः ६ पराकश्चतुर्थः ७ पृष्ठ्यस्तोमैस्त्रिष्टोमानि त्रीणि ८ एष उ पराकः ९ एतेनास्माल्लोकात्प्रजिगांसन्यजेत १० प्रतिष्ठाकामस्य द्वैपराक इत्याहुः ११ या ह्येका जगती ते द्वे गायत्र्यौ १२ अयं लोको गायत्रस्तदस्मिंल्लोके प्रतितिष्ठति प्रतिष्ठायामप्रच्युत्याम् १३ ज्योतिर्गौरायुरिति कुसुरुबिन्दुत्रिरात्रः १४ त्रीणि शतानि प्रथमेऽहन्ददाति १५ त्रयस्त्रिंशतं पञ्च कलाः १६ एवं द्वितीय एवं तृतीये १७ तत्कला सहस्रतम्या गोः परिशिष्यते १८ तामन्यया गवा निष्क्रीयामाकुर्वीत १९ अमाकार्येत्या-हुर्यजमानस्यैव संभृत्या इति २० यायन्तीनां प्रथमोपरमेत्सा स्यादित्याहुः २१ तदप्रच्युत्यै रूपम् २२ या संतिष्ठन्तीनां प्रथमोपविशेत्सा स्यादित्याहुः २३ तत्प्रतिष्ठायै रूपम् २४ याद्यश्वीना सा स्यादित्याहुः २५ तत्प्रजात्यै रूपम् २६ या सत्तमा सा स्यादित्याहुः २७ सत्तमाममाकरवा इति २८ सर्ववेदत्रिरात्रे त्रिशुक्रियो ब्रह्मा यस्योभयतःश्रोत्रियास्त्रिपुरुषम् २९ यस्त्रिविधं तत्त्रिरात्रेणाप्नोति ३० २२

अथ यच्चतुर्विधं तच्चतूरात्रेण १ चतुष्टया वै पशवः २ अथो चतुष्पादाः ३ तद्यत्किं च चतुर्विधमधिदैवतमध्यात्मं तत्सर्वमेनेनाप्नोति ४ त्रिवृत्प्रथममहः पञ्चदशं द्वितीयं सप्तदशं तृतीयमेकविंशं चतुर्थम् ५ ते वा एते चत्वारः स्तोमा नानावीर्या यज्ञक्रतवस्तेन हास्य चत्वारो वीरा नानावीर्याः प्रजायामाजायन्ते य एवं वेद ६ एषो न्वै जमदग्नेश्चतूरात्रः ७ अथैवात्रेश्चतुर्वीरः ८ त्रिवृत्प्रथमस्याह्नः प्रातःसवनं पञ्चदशो माध्यन्दिनः सप्तदशं तृतीयसवनम् ९ पञ्चदशं द्वितीयस्याह्नः प्रातःसवनं सप्तदशो माध्यन्दिन एकविंशं तृतीयसवनम् १० सप्तदशं तृतीयस्याह्नः प्रातःसवनमेकविंशो माध्यन्दिनस्त्रिणवं तृतीयसवनम् ११ एकविंशं चतुर्थस्याह्नः प्रातःसवनं त्रिणवो माध्यन्दिनस्त्रयस्त्रिंशं तृतीयसवनम् १२ ते वा एकैकं स्तोममुत्सृजन्तो यन्त्येकैकं प्रजनयन्तः १३ तेन हास्य चत्वारो वीरा नानावीर्याः प्रजायामाजायन्ते । वीरो हि स्तोमः १४ तस्य शस्त्रम् १५ रथन्तरं पृष्ठं प्रथमस्य १६ सजनीयं निष्केवल्यम् १७ कयाशुभीयतदिदासीये वा निविद्धाने द्वितीयस्य १८ तृतीये वैरूपपृष्ठे वैराजात्तृतीयसवनम् १९ चतुर्थे वैराजपृष्ठे वैरूपात्तृतीयसवनम् २० प्राकृतो वातिरात्रः २१ तं वैश्वानर इत्याचक्षते २२ अभिजिदाभिप्लविकानां चतुर्थः २३ विश्वजिदितरेषाम् २४ वैश्वानरो महाव्रतं वा २५ यच्चतुर्विधं तच्चतूरात्रेणाप्नोति २६ २३

अथ यत्पञ्चविधं तत्पञ्चरात्रेण १ पञ्चपदा पङ्क्तिः पाङ्क्तो वै यज्ञस्तद्यत्किं च पञ्चविधमधिदैवतमध्यात्मं तत्सर्वमनेनाप्नोति २ त्रिवृत्प्रथममहः पञ्चदशं द्वितीयमेकविंशं तृतीयं सप्तदशं चतुर्थं चतुष्टोमोऽतिरात्र उत्तममहः ३ तद्वा इदमासामेव रूपेण ४ इयमेव त्रिवृतो रूपेण ५ इयं पञ्चदशस्य ६ इयमेकविंशस्य ७ इयं सप्तदशस्य ८ अयं चतुष्टोमस्यातिरात्रस्य ९ तद्यदेकविंशस्तोमानां वर्षिष्ठस्तस्मादियमासां वर्षिष्ठा १० अथ यच्चतुष्टोमोऽतिरात्र उत्तममहस्तस्मादयमङ्गुष्ठः सर्वा अङ्गुलीः प्रत्येति ११ तस्य शस्त्रम् १२ त्र्यहश्चतुर्थमाभिप्लविकम् १३ पञ्चमस्य च द्वे सवने षष्ठात्पृष्ठ्यस्य पञ्चमे तृतीयसवनम् १४ पञ्च वाभिप्लविकानि १५ उत्तमात्पञ्चमे तृतीयसवनम् १६ अभिजिदाभिप्लविकानां चतुर्थः १७ विश्वजिदितरेषाम् १८ वैश्वानरश्च महाव्रतं वा १९ उभयोर्वाभिजिच्चतुर्थो विश्वजित्पञ्चमः २० यत्पञ्चविधं तत्पञ्चरात्रेणाप्नोति २१ २४

अथ यत्षड्विधं तत्षल्रात्रेण १ षड्वा ऋतवः षट् स्तोमास्तद्यत्किं च षड्विधमधिदैवतमध्यात्मं तत्सर्वमेनेनाप्नोति २ त्र्यहोऽभिजिद्विश्वजितौ वैश्वानरश्च महाव्रतं वा ३ अनन्तरं वाभिजितो महाव्रतम् ४ विश्वजित्षष्ठः ५ पृष्ठ्योऽभिप्लवो वा ६ यत्षड्विधं तत्षल्रात्रेणाप्नोति ७ २५

अथ यत्सप्तविधं तत्सप्तरात्रेण १ सप्त प्राणाः सप्त च्छन्दांसि तद्यत्किं च सप्ततविधमधिदैवतमध्यात्मं तत्सर्वमेनेनाप्नोति २ त्र्यहोऽभिजिद्विश्वजितौ महाव्रतं वैश्वानरश्च ३ अथ संवत्सरस्य प्रवल्हः ४ प्राकृतोऽग्निष्टोमश्चतुर्विंशमभिजिद्विषुवान्विश्वजिन्महाव्रतं वैश्वानरश्च ५ एषो न्वै सप्तऋषीणां सप्तरात्रः ६ एतमेव जनकसप्तरात्र इत्याचक्षते ७ अभिजिदाभिप्लविकानां सप्तमः ८ विश्वजिदितरेषाम् ९ वैश्वानरो महाव्रतं वा १० यत्सप्तविधं तत्सप्तरात्रेणाप्नोति ११ २६

अथ यदष्टविधं तदष्टरात्रेण १ अष्टौ वसवोऽष्टाक्षरा गायत्री तद्यत्किं चाष्टविधमधिदैवतमध्यात्मं तत्सर्वमेनेनाप्नोति २ अभिजिदाभिप्लविकानां सप्तमः ३ विश्वजिदितरेषाम् ४ वैश्वानरश्च महाव्रतं वा ५ उभ्योर्वाभिजित्सप्तमो विश्वजिदष्टमः ६ यदष्टविधं तदष्टरात्रेणाप्नोति ७ २७

अथ यन्नवविधं तन्नवरात्रेण १ चतस्रो दिशश्चतस्रोऽवान्तरदिश ऊर्ध्वेयं नवमी दिङ नवाक्षरा बृहती तद्यत्किं च नवविधमधिदैवतमध्यात्मं तत्सर्वमेनेनाप्नोति २ षलहोऽभिजिद्विश्वजितौ वैश्वानरश्च महाव्रतं वानन्तरं वाभिजितो महाव्रतं विश्वजिन्नवमः ३ ज्योतिरग्निष्टोमो गौरुक्थ्य आयुरतिरात्रस्त्रिरेतमुपयन्ति शललीपिशङ्ग इत्याचक्षते ४ यन्नवविधं तन्नवरात्रेणाप्नोति ५ २८

अथ यद्दशविधं तद्दशरात्रेण १ दशाक्षरा विरालन्नं विराट् तद्यत्किं च दशविधमधिदैवतमध्यात्मं तत्सर्वमेनेनाप्नोति २ अध्यर्धोऽभिप्लवो नव वाग्निष्टोमाः ३ दशरात्रः संस्थाविकृतः ४ वैश्वानरश्च ५ एतेन ह जलो जातूकर्ण्य इष्ट्वा त्रयाणां निगुस्थानां पुरोधां प्राप काश्यवैदेहयोः कौसल्यस्य च ६ तस्य ह तच्छ्वेतकेतुः श्रियमभिध्याय पितरमध्यूहे पलित

यज्ञकामान्यान्वा उ श्रिया यशसा समर्धयितुं वेत्थ नो आत्मानमिति ७ तं होवाच । मा मैवं पुत्र वोचो यज्ञक्रतुरेव मे विज्ञातोऽभूत्तमेवैतत्कृत्स्नके ब्रह्मबन्धौ व्यजिज्ञासिषि ८ तदु किल तथैवास यथैवैनं प्रोवाच ९ स एष पुरोधाकामस्य यज्ञः १० प्र पुरोधामाप्नोति य एवं वेद ११ चतुष्टोमात्समूल्हात्त्रिककुदः शस्त्रम् १२ अथ महात्रिककुदश्च १३ छन्दोनत्रिककुदश्च १४ अग्निष्टुदिन्द्रस्तुद्वैश्वदेव-स्तुत्पृष्ठ्यो वैश्वानरश्च १५ षलहोऽभिजिद्विश्वजितौ महाव्रतं वैश्वानरश्च १६ प्राकृतोऽग्निष्टोमो नवमोऽष्टमो वा विश्वजिद्दशमः १७ यद्दशविधं तदशरात्रेणाप्नोति १८ २९

अथ यदेकादशविधं तदेकादशरात्रेण १ एकादशाक्षरा त्रिष्टुप् त्रैष्टुभाः पशवस्तद्यत्किं चैकादशविधमधिदैवतमध्यात्मं तत्सर्वमेनेनाप्नोति २ व्यूल्ह-च्छन्दा दशरात्रः ३ सामूल्हिको वा ४ वैश्वानरश्च ५ बृहद्रथन्तरपृष्ठो वा ६ विश्वजिदेकादशः ७ तं पौण्डरीक इत्याचक्षते ८ अयुतं दक्षिणा ९ अश्वसहस्रमेकादशमित्येके १० उक्तो द्वादशाहः ११ त एते पुरस्तादग्निष्टोमा उपरिष्टादतिरात्रा उत्तरोत्तरिण एकोत्तरा अहीनाः १२ उत्तरोत्तरिणीमेव तच्छ्रियं विराजमन्नाद्यमाप्नोति य एवं वेद य एवं वेद १३ ३०

इति शाङ्खायनश्रौतसूत्रे षोडशोऽध्यायः समाप्तः

अथातो महाव्रतस्य १ पुरस्तादेव कतिपयाहेन होता प्रेङ्खफलकमुत्पाटयति २ तिष्ठत एवोदुम्बरस्य ३ पुरस्तादादित्यस्योदयनतः ४ यदि पुरस्तान्न विद्येताथाप्युत्तरतः ५ यदि दक्षिणतः ६ पश्चाद्वा स्यात् ७ मूले छेदयित्वा प्राङ्वोदङ्वा तिष्ठन्नुत्पाट्य यद्यणुरुदुम्बरः स्यात् ८ अपि द्वे वा त्रीणि वा फलकानि संतृड्युः ९ तद्बाहुमात्रं प्राग्भवति १० अरत्निमात्रं तिर्यक् ११ संतष्टम् १२ प्रज्ञाताग्रम् १३ तच्चतुर्धान्तेषु वितर्दयति १४ अथैतस्य वैवोदुम्बरस्यान्यस्य वा विशाख्यौ छेदयन्ति १५ परःपुरुषे १६ वंशं च १७ यद्युदुम्बरो न विद्येत योऽन्यो वृक्षः फलग्रहिष्णुः कल्याणाभिव्याहारो वा स्यात्तस्यैतदुपकल्पयेत् १८ १

अथ मौञ्ज्यौ रज्जू कारयन्ति १ दृढे २ त्रिगुणे ३ परोद्विव्यायामे ४

एतावद्धोतारमभितः ५ औदुम्बरीमासन्दीमुद्गात्रे संघ्नन्ति ६ तस्यै प्रादेशमात्राः पादा भवन्ति ७ अरत्निमात्राणि शीर्षण्यान्यनूच्यानि ८ तां संहत्य मौञ्जीभिः स्यान्द्याभिर्विवयन्ति द्विगुणाभिः प्रसलविसृष्टाभिः ९ २

अथैतां वीणां शततन्त्रीमुपकल्पयन्ति १ तस्याः पालाशी सूना भवति २ औदुम्बरो दण्डः ३ अपि वौदुम्बरी सूना पालाशो दण्डः ४ तामानडुहेन सर्वरोहितेन चर्मणा बाह्यतोलोम्नाभिषीव्यन्ति ५ तस्यै मूले दण्डं दशधातिविध्यन्ति ६ तद्दशदश रज्जूः प्रवयन्ति ७ ता अग्रे नाना बध्नन्ति ८ दण्डसमासा वीणा शततन्त्री भवति ९ वेतसशाखा सपलाशा वादि-न्युपक्लृप्ता भवति १० स्वयंनता वा शरेषीका ११ घाटकर्करीरवघटरिकाः काण्डवीणाः पिच्छोरा इति पत्नय उपकल्पयन्ति १२ उपमुखेन पिच्छोरां वादयेत् १३ वादनेन काण्डवीणाम् १४ तां घाटरीरित्याचक्षते १५ या घाटरी मृदुं वादयेत्साराातिः स्यात् १६ द्विषन्तं जनयेत् १७ ३

चतुरो दुन्दुभीनध्वर्युः सहननानुपकल्पयति १ पूर्वस्यै द्वार्या अभितो द्वारबाहू बहिःसदः सन्धौ सहननावासञ्जयति २ अपरस्यै द्वार्या अभितो द्वारबाहू अन्तःसदः सन्धौ सहननावासञ्जयति ३ यदि षट् स्युर्दक्षिणार्धे सदस एकमुत्तरार्ध एकम् ४ मुञ्जानां च कुशानां च कूर्चमध्वर्यवे संस्कुर्वन्ति ५ तस्मिंस्तिष्ठन्प्रत्यागृणाति ६ अथेतरे दीक्षिताः प्रतिपुरुषं बृसीः कुर्वते यथा प्रादेशमात्रेणोपरि भूमेः स्युः ७ अथ या मार्जालीयं पर्येष्यन्त्यो भवन्ति ताभ्यः प्रत्येकं नवान्कलशानुपकल्पयन्ति ८ ४

अथैतमश्वरथमुपकल्पयन्ति विततवरूथम् १ धनुश्च त्रींश्चेषून् २ राजानं वा राजमात्रं वाजेरस्तारम् ३ यदि राजा वा राजमात्रो वा न विद्येत य एतां धियं विद्यात्स एतत्कुर्यात् ४ उत्तरेणाग्नीध्रं प्राञ्चौ प्रह्वे स्थूणे विमिन्वन्त्याखणाय ५ तदिलमंवर्तं वोत्करं वा चर्मणाभिवितन्वन्ति ६ तन्न सपत्रेणातिविध्येत् ७ जघनेनाग्नीध्रं बहिर्वेद्यवटं खनन्ति ८ तमेतस्योपालम्भ्यस्य ऋषभस्य चर्मणा प्राचीनग्रीवेणोदीचीनग्रीवेण वोत्तरतोलोम्नाभिषीव्यन्ति ९ तं तस्यैव लाङ्गूलेन काले भूमिदुन्दुभिमाघ्नन्ति १० ५

अथ शूद्रार्यौ स्त्रीपुमांसौ बराडखलती इत्युपकल्पयन्ति १ तदेतत्पुराणमुत्सन्नं न कार्यमेतस्मिन्समुपक्लृप्ते २ संस्थिते दशमेऽहनि सदोहविर्धानानि समूहन्ति ३ आग्नीध्रं पत्नीशालं च ४ अथ नवैः कुशैर्बहुलमुपस्तृणन्ति ५ कतिप-यान्कुशभारान्निदधति प्रातर्बृसीभ्यः ६ ६

अथ महारात्रे महाव्रताय प्रातरनुवाकमुपाकुर्वन्ति १ यथा परिसहस्रमनुब्रूयात् २ तस्य पञ्चविंशः स्तोमः ३ राजनं पृष्ठम् ४ अग्निष्टोमो यज्ञः ५ अथैते परिष्टवणीया भवन्ति त्रिवृत्पञ्चदशः सप्तदश एकविंश इति ६ ऐन्द्राग्नो वैकादशिनानां वैकः सवनीयः ७ ऐन्द्रश्च ऋषभः प्राजापत्यश्चाज उपालम्भ्यौ ८ निरुक्त ऐन्द्रः ९ उपांशु प्राजापत्यः १० ते यत्र वपासु हुतासु संप्रसर्पन्ति तदेतत्प्रेङ्खमिश्रं बहिर्वेदि प्रच्चाल्यान्तरेण चात्वालोत्करौ तीर्थं तेन प्रपद्योत्तरेणाग्नीध्रीयं धिष्ण्यं पर्याहृत्य पूर्वया द्वारा सदः प्रहृत्याग्रेणोत्तरेण होतुर्धिष्ण्यं प्राङुपनिदधति ११ एवमेव यस्ययस्य बहिर्वेदि भवति यथा संचरः संप्रसर्पणे भवति तथाहृत्योत्तरत उपनिदधति १२ तस्य त्रैष्टुभं प्रातःसवनं स्यादिति पैङ्ग्यं शुष्कभृङ्गारीयम् १३ ७

विशोविशो वो अतिथिमित्याज्यम् १ तस्य द्वादशार्धर्चशः शस्त्वाग्निं नरो दीधितिभिररण्योरित्येतत्पञ्चविंशत्यृचमुपसंशंसति २ तद्विष्टशस्त्रम् ३ त्रैष्टुभः प्रउगः ४ कुविदङ्ग नमसा ये वृधास इति वायव्यं चैन्द्रवायवं च ५ मैत्रावरुणं च यथा विषुवति ६ क उ श्रवत्कतमो यज्ञियानामित्याश्विनम् ७ कथा महामवृधत्कस्य होतुरित्यैन्द्रम् ८ को वस्त्राता वसवः को वरूतेति वैश्वदेवम् ९ उत स्या नः सरस्वती जुषाणेति सारस्वतम् १० स तृचक्लृप्तः ११ तस्य पच्छः शस्त्रम् १२ ऐकाहिकं वा प्रातःसवनम् १३ क्लृप्तं प्रातःसवनम् १४ ८

अथातो माध्यन्दिनं सवनम् १ आ त्वा रथं यथोतय इति मरुत्वतीयस्य प्रतिपत् २ इदं वसो सुतमन्ध इत्यनुचरः ३ एष एव नित्य एकाहातानः ४ असत्सु मे जरितः साभिवेग इति वासुक्रं पूर्वं शस्त्वा महाँ इन्द्रो नृवदा चर्षणिप्रा इत्येतस्मिंस्त्रैष्टुभे निविदं दधाति ५ उभे सूक्ते पच्छः संशस्येत् ६ इति न्वा उ मरुत्वतीयम् ७ ९

अथातो निष्केवल्यम् १ संस्थिते प्रातःसवने प्रेङ्खावटौ खानयेदिति सा स्थितिः २ शस्ते मरुत्वतीय इति पैङ्ग्यम् ३ जघनेन स्वं धिष्ण्यं पदं च चतुरङ्गुलं च प्रमाय तत्पश्चादुदीचीनाग्रं फलकं निधायोभयतश्चतुरङ्गुले उपधाय बहिश्चतुरङ्गुलाभ्यां लेखे लेखयित्वा प्रेङ्खावटौ खानयेद्दक्षिणं पूर्वमथोत्तरम् ४ प्राञ्चौ वोदञ्चौ वोत्किरा उत्किरन्ति ५ तद्विशाख्यावववधायोदीचीनाग्रं वंशमभ्यादधाति ६ शीर्ष्णा होता मिमीते ७ यदि ह्रस्वः स्यादूर्ध्वबाहुर्मिमीते ८ दृढपर्यृष्टे पर्यृषति यथा न व्यथेयाताम् ९ अथैतत्प्रेङ्खफलकं रज्जुभिश्चतुर्धान्तेषु परिव्ययति यथा न संभ्रश्येत १० उत्तरेण दक्षिणां प्रेङ्खस्थूणां दक्षिणां रज्जुं बध्नन्ति ११ दक्षिणेनोत्तरां प्रेङ्खस्थूणामुत्तरां रज्जुं बध्नन्ति १२ तत्संबाध्य प्रास्यति यथा प्रादेशमात्रेणोपरि भूमेः स्यात् १३ तदधस्तात्कुशैः प्राचीणाग्रैश्चोदीचीनाग्रैश्चाभ्युपोहति १४ तदभिनिवील्हं पर्यृषति यथा न व्यथेत १५ तत्संबाध्योत्तरस्यां प्रेङ्खस्थूणायामपाश्रयति १६ तच्छस्ते मरुत्वतीये यथास्थानं स्थापयेत् १७ १०

अथाध्वर्युर्माहेन्द्रं ग्रहं गृहीत्वैति १ अग्रेण होतुर्धिष्ण्यं प्राङुपविशति २ तं होताहाध्वर्य उप नु रमेति ३ स उत्तरेणोत्तरां प्रेङ्खस्थूणामुत्तरेणाध्वर्यं प्राङुपनिष्क्रम्य पूरया द्वाराग्नीध्रं प्रपद्योत्तरेणाग्नीध्रीयं धिष्ण्यं पर्येत्य पश्चात्प्राङुपविश्य दक्षिणं जान्वाच्य स्रुवेणाज्यस्थाल्या उपहत्य जुहोति ४ ११ आयुष्मद्गायत्रं विश्वायू रथन्तरं सर्वायुर्बृहत्सामायुर्वामदेव्यमत्यायुर्यज्ञायज्ञीयं तेषामहमायुषायुष्मान्भूयासमस्यै प्राणः संचरति प्रजायै हृदयाय कं सर्वा विनुड्य संतृड्यो मय्यस्तु शरदः शतं स्वाहेति प्रथमाम् १ दिवे स्वाहान्तरिक्षाय स्वाहा पृथिव्यै स्वाहेति तिस्रः २ गवे स्वाहा वाचे स्वाहा वाचस्पतये स्वाहेत्यपरास्तिस्रः ३

यदिदमिति हैतिहं दैव्यं सह उच्चरत्
तद्वयं यजामहे यदस्मभ्यमिति द्रवत्

वाचो राजन्यजामहे वाचस्पते सहस्व मे
यो अस्माँ अभिदासति

स्वाहेत्यष्टमीं हुत्वा यथायतनं स्रुवं निधाय यथाप्रपन्नमुपनिष्क्रम्याग्रेण सद उत्तरेण स्रुतिं प्राङ् तिष्ठन्परिमादाञ्जपाञ्जपति ४ वागायुर्विश्वायुर्विश्वमायुरेह्येवा हीन्द्रोपेहि विश्वथ विदा मघवन्विदा इति ५ अथात्रैव तिष्ठन्नग्निं यथा- ङ्गमुपतिष्ठते ६ १२

नमस्ते गायत्राय यत्ते शिरो यत्ते पुर इति पूर्वार्धम् १ नमस्ते रथन्तराय यस्ते दक्षिणो बाहुर्यस्ते दक्षिणः पक्ष इति दक्षिणं पक्षम् २ नमस्ते बृहते यस्त उत्तरो बाहुर्यस्त उत्तरः पक्ष इत्युत्तरं पक्षम् ३ नमस्ते वामदेव्याय यत्ते मध्यं यस्त आत्मेति मध्यम् ४ नमस्ते यज्ञायज्ञीयाय यत्ते पुच्छं या प्रतिष्ठेति पुच्छम् ५ समिद्धस्यैवैतान्भागानुपतिष्ठेत यद्युत्तरवेदौ भवति ६ अथात्रैव तिष्ठन्नादि- त्यमुपतिष्ठते ७ आकाशं शालायै कुर्युरिति हैक आहुः ८ देशेन त्वेवोपतिष्ठते ९ सुभूर्नामासि श्रेष्ठो राश्मिर्देवानां संसद्यया तन्वा ब्रह्म जिन्वसि तया मा जिन्व तया मा जनय तया मा पाहि ब्रह्मवर्चसमन्नाद्यं मयि त्विषिं धा नमस्ते अस्तु मा मा हिंसीरिति १० अथ दक्षिणावृत्प्रविशति ११ पश्चात्प्रेङ्खं प्राङुपविश्य तदन्वारभ्याननुत्सृजन्वाग्यत आस्त आधिसर्पणात् १२ १३

स पुरस्तादेव च्छन्दोगेभ्यः शीर्षण्यांस्तृचान्निगादयेत १ स पुरस्तादेवाध्वर्युणा संवादयेत २ द्वादशकृत्वस्तूष्णींशंसे प्रत्यागृणीताद्विहृतमात्मानं च पदा- नुषङ्गांश्च संशिष्याम्यविहृतं त्वं प्रत्यागृणीतादिति ३ अथ प्रस्तोतारमाह सप्तसु स्तोत्रियासु परिशिष्टासु नः प्रब्रूतात्तावद्धीदं जप्यमिति ४ अथाध्वर्युः स्तोत्रमुपाकरोति ५ यत्रैवोद्गातामन्दीमधिरोहत्यथ प्रस्तोताप्रतिहर्तारौ बृस्या- वधिसर्पतः ६ उपगातारश्च ७ उद्गातैव प्रथमो वीणां प्रवादयति ८ तं पत्न्यो ऽनु प्रवादयन्ति ९ आघ्नन्ति दुन्दुभीन् १० आहन्ति भूमिदुन्दुभिम् ११ कुर्वन्ति घोषं धोषकृतः १२ अथ पूर्णकुम्भा अपो बिभ्रत्यो मार्जालीयं परियन्ति १३ है महा३ इदं मध्विदं मध्वित्येतां वाचं वदन्ति १४ अप्रदक्षिणं त्रिः १५ प्रसलवि तूष्णीं तत ऊर्ध्वम् १६ १४

अथैतमश्वरथं युञ्जन्ति १ अग्रेण दक्षिणं वेद्यंसम् २ तं संनद्ध आतिष्ठति राजा वा राजमात्रो वा धनुश्च त्रींश्चेषूनादाय ३ सोऽभितो वेदिं त्रिः प्रसलवि परिवर्तमान एतमाखणं विध्यति ४ तं न सपत्रेणातिविध्येत् ५ एवं द्वितीयमेवं

तृतीयम् ६ तं प्राञ्चमुदञ्चं श्रथ्नन्ति ७ तं तत्रैव विमुञ्चन्ति ८ अथ प्रस्तोता सप्तसु स्तोत्रियासु परिशिष्टास्वाहा वेलेति ९ अथ होता दक्षिणेन प्रादेशेन प्रेङ्खफलकं च भूमिं च संमृशञ्जपति सं महान्महत्या दधादिति १० अथोपरि प्रेङ्खफलके प्रादेशं निधाय जपति सं देवो दैव्या दधादिति ११ अथोपरि प्रेङ्खफलकात्प्रादेशमात्रे प्रादेशं धारयञ्जपति सं ब्रह्म ब्राह्मण्या दधादिति १२ अथोपनिधाय प्रेङ्खफलकं त्रिरभ्यन्य त्रिरभ्यवानिति १३ १५

अथैनदुरसा संस्पृश्य दक्षिणं भागमात्मनोऽतिहरञ्जपत्यर्कोऽसि वसवस्त्वा गायत्रेण च्छन्दसारोहन्तु तानहमन्वारोहामि राज्यायेति १ अथोत्तरं भागमात्मनोऽतिहरञ्जपति रुद्रास्त्वा त्रैष्टुभेन च्छन्दसारोहन्तु तानहमन्वारोहामि स्वाराज्यायेति २ अथ दक्षिणं भागमात्मनोऽतिहरञ्जपत्यादित्यास्त्वा जागतेन च्छन्दसारोहन्तु तानहमन्वारोहामि साम्राज्यायेति ३ अथोत्तरं भागमात्मनोऽतिहरञ्जपति विश्वे त्वा देवा आनुष्टुभेन च्छन्दसारोहन्तु तानहमन्वारोहामि कामप्रायेति ४ अथ समधिसृप्य प्राञ्चौ पादा उपावहृत्य भूमौ प्रतिष्ठापयति ५ अथ त्रिरभ्यन्य त्रिरभ्यवानिति ६ अथोपरि प्रेङ्खफलके दक्षिणोत्तरिणमुपस्थं कृत्वा दक्षिणेन प्रादेशेन पश्चात्प्रेङ्खफलकमुपस्पृशति प्रजापतिष्ट्वारोहतु वायुः प्रेङ्खयत्विति ७ अथ त्रिरभ्यन्य त्रिरम्यवानिति ८ अथ प्राञ्चौ पाणी परिगृह्य जपति ९ १६

सं वाक् प्राणेन समहं प्राणेन सं चक्षुर्मनसा समहं मनसा सं प्रजापतिः पशुभिः समहं पशुभिः सुपर्णोऽसि गरुत्मान्प्रेमां वाचं वदिष्यामि बहु करिष्यन्तीं बहु करिष्यन्बहोर्भूयः स्वर्गमिष्यन्तीं स्वर्गमिष्यन्निति १ अथ त्रिरभ्यन्य त्रिरभ्यवानिति २ स विसृष्टवाङ मत्सरं विनिनीषमाण आस्त आ स्तोत्रस्य प्रवदनात् ३ यत्रैव होता प्रेङ्खमधिरोहति तत्सर्वे सगृहपतिका बृसीरधिसर्पन्ति ४ उत्तमायां स्तोत्रियायां परिशिष्टायामवतृणत्ति दुन्दुभीन् ५ अवतृणत्ति भूमिदुन्दुभिम् ६ उपरमन्ति घोषं घोषकृतः ७ अथ पूर्णकुम्भा अपो बिभ्रत्यो मार्जालीयं परियन्ति ८ मार्जालीये ताः कलशानवनिनीयोपनिधाय यथैतमुत्सृज्यन्ते ९ एषेति प्राह १० प्रोक्ते होता वाचं यच्छत्यानुवषट्कारात् ११ उप प्रतिहारमाहावेऽनुरमति १२ प्रतिहृत आह्वयते १३ अध्वर्यो शोंसावो ३ इत्युच्चैराहूय यथास्य वाक् सर्वा अन्या वाचोऽतिवदेत् १४ उच्चैराहूय

त्रिरुपांशु हिंकृत्योपांशु तूष्णींशंसं । तस्यातस्तस्यातः १५ १७
इति शाङ्खायनश्रौतसूत्रे सप्तदशोऽध्यायः समाप्तः

उच्चैराहूय त्रिरुपांशु हिंकृत्य १ ब्रह्म जज्ञानं प्रथमं पुर स्तादियं पित्रे राष्ट्र्येत्यग्रे विश्वे देवा मम शृगवन्तु यज्ञिया इत्येतास्तिस्र ऋचस्तूष्णीशंसस्ता उपांश्वप्रणुवन्पच्छः २ अथात्मने वाचमुत्सृजति ३ तदिदास भुवनेषु ज्येष्ठमिति स्तोत्रियस्तृचः ४ तदेतन्नवर्चम् ५ वने न वा यो न्यधायि चाकन्नित्यष्टौ ६ शाक्मना शाको अरुणः सुपर्ण इति तृचम् ७ यो अदधाज्ज्योतिषि ज्योतिरन्तर्महत्तन्नाम गुह्यं पुरुस्पृगिदं त एकं पर ऊ त एकमिति तिस्र एकपातिन्यः ८ तास्त्रयोविंशतिः ९ त्रिःशस्तया प्रथमया सह पञ्चविंश- तिः १० स एष आत्मा पञ्चविंशः ११ तं नदेनोपसृष्टं शंसति १२ नदं व ओदतीनामिति १३ त्रैष्टुभानि पूर्वाणि पदानि नदस्योत्तराणि १४ प्रथमेन त्रैष्टुभेन पदेन प्रथमं नदस्य पदमुपसंधायावस्यति १५ द्वितीयेन त्रैष्टुभेन द्वितीयं संधाय प्रणौति १६ तृतीयेन त्रैष्टुभेन तृतीयं संधायावस्यति १७ चतुर्थेन त्रैष्टुभेन चतुर्थं संधाय प्रणौति १८ एवं विहृतां प्रथमां त्रिः शंसति १९ पराचीरुत्तराः २० एवं विहृता एव या तृतीया सूक्तस्य तस्या उत्तरम- र्धर्चमुत्सृजति नदस्य चोत्तरम् २१ तौ पुरस्ताद्द्विपदानां शंसति २२ आत्मानं शस्त्वाथ सूददोहसं शंसति । ता अस्य सूददोहस इति तामर्धर्चशः २३ १
अथैतानि शीर्षण्यानि तृचानि शंसति १ इन्द्रमिद्गाथिन इन्द्रेण सं हीन्द्रो दधीच उत्तिष्ठन्नोजसा सहोद्द्वेदभि श्रुतामघमुदु त्यं जातवेदसमित्येतेषां तृचानां येषु सामगाः स्तुवीरंस्तानि शंसेत् २ उदु त्यं जातवेदसमित्येतस्मिन्नु हैके नवर्चे स्तुवते ३ ते यदि तथा कुर्युरेतदेव शंसेत् ४ उदु त्यं जातवेदसमित्येतस्यो हैके प्रथमे तृचे स्तुवते ५ ते यदि तथा कुर्युरितरेषां ये कामयेत ते उपाहरेत् ६ तान्यर्धर्चशः शस्त्वाथ सूददोहसम् ७ २

अथैतं ग्रैवं तृचं शंसति १
यस्येदमोज आरुजस्तुजो युजो बलं सहः
इन्द्रस्य रन्त्यं बृहत्

अनाधृष्टं विपन्यया नाधृष आदधर्षया

धृषाणं धृषितं शवः

स नो ददातु तं रयिं पुरु पिशङ्गसंदृशम्
इन्द्रस्पतिस्तवस्तमो जनेषु
इति २ तमर्धर्चशः शस्त्वाथ सूददोहसम् ३ ३
उरुं नो लोकमनु नेषि विद्वानित्यृचा १ तां पच्छः शस्त्वाथ सूददोहसम् २ अथ रथन्तरस्य स्तोत्रियं पुनरादायं ककुप्कारमथ सूददोहसम् ३ अथ रथन्तरस्यानुरूपं पुनरादायं ककुप्कारमथ सूददोहसम् ४ अथ धाय्यां पच्छः शस्त्वाथ सूददोहसम् ५ अथ राथन्तरं प्रगाथमर्धर्चशः शस्त्वाथ सूददोहसम् ६ य एक इद्धव्यश्चर्षणीनामिति सूक्तं तत्पच्छस्तस्य द्वितीयामुद्धृत्य विश्वो ह्यन्यो अरिरा जगामेति यैतस्य द्वितीया तामिह द्वितीयां करोति सूक्तं शस्त्वाथ सूददोहसम् ७ तमिन्द्रं जोहवीमि मघवानमुग्रमिति प्रहस्तकस्तृचः ८ तं पच्छः शस्त्वाथ सूददोहसम् ९ ४

स सूर्ये जनयञ्ज्योतिरिन्द्रोऽया धिया तरणिरङ्गिरस्वान्
ऋतेन शुष्मी हवमानो अर्कैरभि स्पृध उस्रो वेदिं ततर्द

इत्यृचा १ तां पच्छः शस्त्वाथ सूददोहसम् २ अथ बृहतः स्तोत्रियं पुनरादायं ककुप्कारमथ सूददोहसम् ३ अथ बृहतोऽनुरूपं पुनरादायं ककुप्कारमथ सूददोहसम् ४ नात्र धाय्या भवति ५ अथ बार्हतं प्रगाथमर्धर्चशः शस्त्वाथ सूददोहसम् ६ विश्वो ह्यन्यो अरिरा जगामेति सूक्तं तत्पच्छस्तस्य द्वितीयामुद्धृत्य य एक इद्धव्यश्चर्षणीनामिति यैतस्य द्वितीया तामिह द्वितीयां करोति ७ सूक्तं शस्त्वाथ सूददोहसम् ८ विश्वाः पृतना अभिभूतरं नरमिति प्रहस्तकस्तृचः ९ तस्य पच्छः प्रथमां शंसत्यर्धर्चश उत्तरे १० प्रहस्तकं शस्त्वाथ सूददोहसम् ११ ५

अथैतानि चतुरुत्तराणि तृचानि शंसति १ इन्द्राय मद्वने सुतमिन्द्रं वृत्राय हन्तवे गायन्ति त्वा गायत्रिणो न त्वा बृहन्तो अद्रय इति चत्वारि तृचानि २ तान्यर्धर्चशः ३ इत्था हि सोम इन्मद इति पाङ्क्तं तृचं तत्पङ्क्तिशंसम् ४ सं च त्वे जग्मुर्गिर इन्द्र पूर्वीरादङ्गिराः प्रथमं दधिरे वय इति त्रैष्टुभजागते

तृचे ५ ते पच्छः शस्त्वाथ सूददोहसम् ६ ६

अथैता अशीतीः शंसति १ महाँ इन्द्रो य ओजसेत्येतया गायत्रीमशीतिं प्रतिपद्यते २ तानि पञ्चदश तृचानि ३ इन्द्र इत्सोमपा एक इत्यष्टौ ४ एवेदेष तुविकूर्मिरिति त्रीणि ५ आ घा ये अग्निमिन्धत इति चतुर्दश ६ तानि चत्वारिंशत्तृचानि ७ तत्पूर्वं कपलम् ८ अथोत्तरम् ९ प्र कृतान्यृजीषिण इति दश तृचानि १० अपादु शिप्रयन्धस इति पञ्च ११ आ त्वा विशन्त्विन्दव इति चत्वारि १२ यदद्य कच्च वृत्रहन्निति पञ्च १३ पत्नीवन्तः सुता इम इति चत्वारि १४ इदं ह्यन्वोजसोत्तिष्ठन्नोजमा सहाभि प्र गोपतिमिति त्रीणि तृचानि १५ तेषां यत्पुरस्तात्कृतं स्यात्तदुद्धरेत् १६ यद्यु वै न कुर्युरुदेव हरेत् १७ य आनयत्परावत इति दश तृचानि १८ तानि चत्वारिंशत्तृचानि १९ तदुत्तरं कपलम् २० अथ सूददोहाः २१ ७

या इन्द्र भुज आभर इत्येतया बार्हतीमशीतिं प्रतिपद्यते १ ता नव प्रत्यक्षबृहत्यः २ विश्वे त इन्द्र वीर्यमिति तिस्रः ३ तं घेमित्था नमस्विन इति द्वे ४ न सीमदेव आपदिति षट् ५ ता विंशतिः प्रत्यक्षबृहत्यः ६ अथ प्रगाथाः ७ यः सत्राहा विचर्षणिरिति चत्वारः ८ सो षु त्वा वाघतश्चनेति चत्वार उद्धृत्य द्विपदाम् ९ उदिन्वस्य रिच्यत इति पञ्च १० अभी षतस्तदा भर मा चिदन्यद्वि शंसते मा उ त्वा पुरूवसो तत्त्वा यामि सुवीर्यं युद्वा हि वृत्रहन्तमेति द्वौ द्वौ ११ यदिन्द्र प्रागपागुदगिति सप्त १२ आ वृषस्व पुरूवसो इति द्वौ १३ अविप्रो वा यदविधदिति पञ्च १४ यः शक्रो मृक्षो अश्व्य इति षट् १५ तेषां त्रीनादत्ते १६ ते चत्वारिंशत्प्रगाथाः १७ ८

अथ प्रत्यक्षबृहतीः शंसति १ महे चन त्वामद्रिव इति पञ्चविंशतिः २ तासां विंशतिं शस्त्वाथ सूददोहसम् ३ नि गव्यतेति निविद्धानीया ४ तां पच्छः शस्त्वाहूय निविदं दधाति ५ तां पच्छो व्यवग्राहं शस्त्वा समसूक्ताम् ६ उत्तमेन पदेन प्रणुत्य स जातेभिरिति निविदा शंसति ७ तां पच्छः शस्त्वाथ सूददोहसम् ८ ९

अथ प्रत्यक्षबृहतीः शंसति १ याः पञ्चविंशतेः परिशिष्टास्ताभिः प्रतिपद्यते २

वयं घ त्वा सुतावन्त इति पञ्चदश ३ ता विंशतिः प्रत्यक्षबृहत्यः ४ अथ प्रगाथाः ५ ये षण्णां त्रयः परिशिष्टास्तैः प्रतिपद्यते ६ यो राजा चर्षणीनामिति त्रयः ७ तं वो दस्ममृतीषहमित्येकः ८ आ नो विश्वासु हव्य इति त्रयः ९ त्वामिदा ह्यो नर इति चत्वारः १० अथ वालखिल्यानां सूक्तानि षट् ११ तेषां द्वौ प्रगाथा उत्सृजतीन्द्रनिहवं च वैश्वदेवं चा नो विश्वे सजोषस इति १२ ते चत्वारिंशत्प्रगाथाः १३ १०

अथ प्रत्यक्षबृहतीः शंसति १ मत्स्यपायि ते महोऽस्माअस्मा इदन्धसो बलं धेहि तनूषु नो युजानो हरिता रथे तवेदिन्द्राहमाशसामासु पक्वमैरय इयं या नीच्यर्किणी प्र ते रथं मिथूकृतमन्तर्यच्छ जिघांसतस्त्वं विश्वस्य जगत इति दशैकपातिन्यः २ अयं ते अस्तु हर्यत आ मन्द्रैरिन्द्र हरिभिरिति सूक्ते ३ ते अर्धर्चशः शस्त्वाथ सूददोहसम् ४ ११

इन्द्रः सुतेषु सोमेष्वित्येतयौष्णिहीमशीतिं प्रतिपद्यते १ तान्येकादश तृचानि २ य इन्द्र सोमपातम इत्येकादश तेषामेकमुत्सृजतीन्द्रं वृत्राय हन्तव इति ३ तम्वभि प्र गायतेति चत्वारि ४ सखाय आ शिषामहीति नव ५ य एक इद्विदयत आ याह्यद्रिभिः सुतमिति द्वे तृचे ६ तानि षट्त्रिंशत्तृचानि ७ १२

अथ चतुःशतं गायत्रीः शंसति १ नकिरिन्द्र त्वदुत्तर इति षट् २ दिवश्चिद्द्वा दुहितरमिति चतुर्दश ३ आ तू न इन्द्र वृत्रहन्नित्येकविंशतिः ४ आ व इन्द्रं क्रिविं यथा यदिन्द्राहं यथा त्वमिति पञ्चदशर्चे ५ प्र सम्राजं चर्षणीनामुत्त्वा मन्दन्तु स्तोमा इति द्वादशर्चे ६ आ प्र द्रव परावत इति नव ७ इति चतुःशतं गायत्रीः ८ वयमु त्वामपूर्व्येत्यष्टौ काकुभाः प्रगाथाः ९ इन्द्राय साम गायतेति सर्वम् १० तदर्धर्चशः शस्त्वाथ सूददोहसम् ११ १३

अथैतं वशमर्धर्चशः शंसति १ त्वावतः पुरूवसो इति २ तस्य सप्तदशी जगती तां पच्छः ३ अथैकविंशी द्वाविंशी चतुर्विंशी च पङ्क्तयस्ताः पङ्क्तिशंसम् ४ शतं दासे बल्बूथ इति पञ्चपदा तस्यै त्रीणि पदानि समस्यावस्येद्द्वाभ्यां प्रणुयात् ५ त्रयोदशी च त्रिंशत्तमी च द्विपदे ते पच्छः शस्त्वाथ सूददोहसम् ६ अथैतौ विहृतावर्धर्चावथ सूददोहसम् ७ सा तत एवोत्सृज्यते ८ अत्र

चतुर्विंशतिकृत्वः शस्ता भवति ९ १४

अथैता द्विपदाः शंसति १ इमा नु कं भुवना मीषधामेति पञ्च २ आ याहि वनसा सहेति चतस्रः ३ एष ब्रह्मा य ऋत्विय इति तिस्रः ४

प्र व इन्द्राय वृत्रहन्तमाय विप्रा गाथं गायत यञ्जुजोषति
अर्चन्त्यर्कं मरुतः स्वर्का आ स्तोभति श्रुतो युवा स इन्द्रः
उप प्रक्षे मधुमति क्षियन्तः युष्येम रयिं धीमहे त इन्द्र
विश्वतोदावन्विश्वतो न आ भर यं त्वा शविष्ठमीमहे
स सुप्रणीती नृतमः स्वरालसि मंहिष्ठो वाजसातये
त्वं हि राधस्यत एक ईशिषे सनादमृक्त ओजसा

इति षट् ५ आ धूर्ष्वस्मै वज्रमेकोऽया वाजं देवहितं सनेमेति ६ ता एकविंशतिर्द्विपदास्ताः पच्छः ७ १५

अथैतदैन्द्राग्नं सूक्तं गायत्रीशंसं शंसतीन्द्राग्नी युवं सु न इति १ तस्य द्वितीया सप्तपदा तस्या अनुष्टुभं पूर्वां करोति शंसं गायत्रीमुत्तराम् २ त्रिष्टुबुत्तमा तां पच्छः ३ १६

अथैतदावपनं शंसति १ तुभ्येदमिन्द्र परि षिच्यते मध्वित्येका २ विश्वजिते धनजिते स्वर्जित इति षट् ३ ताः पच्छः ४ स्वादोरित्था विषूवत इति पाङ्क्तः तृचं तत्पङ्क्तिशंसम् ५ प्र वो महे महिवृधे भरध्वमिति वैराजं तृचं तदर्धर्चशः ६ प्रत्यस्मै पिपीषत इत्यानुष्टुभं तृचं तदर्धर्चशः ७ १७

अथैतमानुष्टुभं समाम्नायं शंसति १ एहि स्तोमाँ अभि स्वरेति नव २ इन्द्रं विश्वा अवीवृधन्नित्यष्टौ ३ असावि सोम इन्द्र त इति षट् । आ नस्ते गन्तु मत्सर इति चतस्रः ४ मत्सि नो वस्यइष्टय इति पञ्च ५ यस्ते साधिष्ठोऽवस इति सप्त ६ उरोष्ट इन्द्र राधस इति द्वे ७ यदिन्द्र चित्र मेहनेति चतस्रः ८ यो रयिवो रयिंतम इति षट् ९ एन्द्र याहि हरिभिरिति पञ्चदश १० स प्रत्नथा कविवृध इति तचम् ११ यज्जायथा अपूर्व्येति द्वे १२ आ त्वा गिरो रथीरिवेति

सर्वम् १३ शाम इत्था महाँ असीति सर्वम् १४ तदर्धर्चशः १५ १८

अथैतं त्रिष्टुप्छतं शंसति १ हैरण्यस्तूपीयं च २ यातऊतीयं च ३ मजनीयं च ४ अध्वर्यवो भरतेन्द्राय सोममिति च ५ आ याह्यर्वाङुप वन्धुरेष्ठा युध्मस्य ते वृषभस्य स्वराज इति सूक्ते ६ नृणामु त्वा नृतमं गीर्भिरुक्थैरिति तृचम् ७ आ सत्यो यातु मघवाँ ऋजीषीति सर्वम् ८ योनिष्ट इन्द्र मदने अकार्युदु ब्रह्माणीति सूक्ते ९ तत्र पुरस्तादुदुब्रह्मीयस्य पदानुषङ्गाञ्छंसति यो व्यतीर-फाणयदित्येतस्मिंस्तृचे प्रथमायाअर्धर्चमुक्त्वोपरमति १० १९

अथ प्रथमायै तृतीयेन पदेन द्वितीयायै प्रथमं पदमुपसंधाय प्रणौति १ अथ प्रथमाया उत्तमेन पदेन द्वितीयायै द्वितीयं पदमुपसंधायावस्यति २ अथ द्वितीयायै तृतीयेन पदेनोत्तमायै प्रथमं पदमुपसंधाय प्रणौति ३ अथ द्वितीयाया उत्तमेन पदेनोत्तमायै द्वितीयं पदमुपसंधायावस्यति ४ अथार्धर्चशः परिशिष्ट-स्तेन प्रणौति ५ अथो उदुब्रह्मीयस्योत्तमां परिशिष्याह्वयते ६ त्रिःशस्तया परिदधाति ७ परिधायोक्थवीर्यं जपत्यैकाहिकं पूर्वं माहाव्रतिकमुत्तरं महदसि यशोऽसि भर्गोऽसि भोगोऽसि भुञ्जदसि मम भोगाय भवेति ८ २०

तदेतत्सकृच्छस्तायां सूददोहसि यावच्छस्त्रमुपसर्जन्यां संख्यायमानायामृते तूष्णींशंसं बृहतीसहस्रं संपद्यते १ त्रिरेवाह्वयते २ स्तोत्रिये निविदे परिधानीयायै ३ समानी याज्या ४ अननुवषट्कृत एव प्रेङ्खं श्रथ्नन्ति ५ सग्रहमेवायन्तं प्राङुपावरोहति ६ प्रत्यक् प्रेङ्खफलकमपोहति ७ परामृशन्ग्रहं जपति यमिमं प्रजयं प्राजैषं तमन्वसानीति ८ अध्वर्य उपहवमिष्ट्वा भक्षयत्योजसे त्वेति ९ वैश्वकर्मणोऽतिग्राह्यः १० तस्य भक्ष उप मा यन्तु मज्ञयः सनीला उप मा जक्षुरुप मा मनीषा प्रियामहं तन्वं पश्यमानो मयि रमो देवानामोजसे त्वेति ११ अथ चमसान्भक्षयन्ति देवोऽसि नराशंस इति १२ क्लृप्तं माध्यन्दिनं सवनम् १३ २१

अथातस्तृतीयसवनम् १ तत्सवितुर्वृणीमहेऽद्या नो देव सवितरिति तृचौ प्रतिपदनुचरौ वैश्वदेवस्य २ एष एव नित्य एकाहातानः ३ तद्देवस्य सवि-तुर्वार्यं महदिति सावित्रम् ४ ते हि द्यावापृथिवी विश्वशंभुवेति

द्यावापृथिवीयम् ५ किमु श्रेष्ठः किं यविष्ठो न आजगन्नित्यार्भवम् ६ अस्य वामस्य पलितस्य होतुरिति सलिलं वैश्वदेवं तस्याः समुद्रा अधि वि क्षरन्ति समानमेतदुदकमित्येते अर्धर्चशः शंसति पच्छ इतराः ७ तच्छस्त्वानोभद्रीये निविदं दधाति ८ पञ्चजनीया परिधानीया ९ इति न्वा उ वैश्वदेवम् १० २२

अथात आग्निमारुतम् १ वैश्वानराय पृथुपाजसे विप इति वैश्वानरीयम् २ प्रयज्यवो मरुतो भ्राजदृष्टय इति मारुतम् ३ ते यदि यज्ञायज्ञीयमग्निष्टोमसाम कुर्युस्तस्योक्तौ स्तोत्रियामुरूपौ ४ तयोर्दिष्टं शस्त्रम् ५ यद्यु वा इलांदमग्ने तव श्रवो वय इति स्तोत्रियस्तृचोऽत एवोत्तरः सूक्तानुरूपः ६ यद्यु सर्वस्मिन् षलर्चे स्तुवीरन्नाग्निं न स्ववृक्तिभिरित्येतस्य षलनुरूपं कुर्वीत ७ अर्धर्चशः शस्त्रम् ८ यद्यु वा अतिच्छन्दःसु कुर्युरग्निं होतारं मन्ये दास्वन्तमिति स्तोत्रियस्तृचोऽत एवोत्तरः सूक्तानुरूपः ९ या सप्तमी सूक्तस्य तां तृतीयां करोति सोऽनुरूपः १० अयं जायत मनुषो धरीमणीति वा स्तोत्रियस्तृचोऽत एवोत्तरः सूक्तानुरूपः ११ विचतुरं शस्त्रम् १२ नात्र यज्ञायज्ञीयस्य योनि-मनुशंसेत् १३ बलित्था तद्वपुषे धायि दर्शतमिति जातवेदसीयम् १४ इत्याग्निमारुतसूक्तानि १५ इत्येतस्याह्नः सूक्तानि १६ तदग्निष्टोमः संतिष्ठते १७ वसन्त्येतां रात्रीम् १८ २३

अथ प्रातरुदयजीयमतिरात्रमुपयन्ति १ य एवासौ प्रायणीयः स उदयनीयः २ तत्र सर्वान्करस्नान्संबाध्य प्रेष्यति मैत्रावरुणः ३ ते प्रथममासं दीक्षितवसनानि वा वसते ४ तानि नवरात्राय निदधति ५ उत्तमाय च मासाय ६ अथेतरान्मासानजिनानि वार्द्रवसनानि वा वसते ७ तस्मिन्हि संस्थित कर्माणि क्रियन्ते ८ न परस्मा अह्नो वसतीवरीर्गृह्णन्ति ९ नातिप्रैषमाह १० जुह्वति समिष्टयजूंषि ११ यन्त्यवभृथम् १२ क्रियतेऽवभृथकर्म १३ ते यदि यज्ञागारैर्भाक्ष्यमाणा भवन्त्यादधत एव प्रङ्क्मिश्रम् १४ यद्यु धक्ष्यन्तो ऽत्रैव स्यात् १५ प्रज्ञातोऽवभृथः १६ प्रज्ञातोदयनीया १७ प्रज्ञातानूबन्ध्या १८ तस्यै वपायां संस्थितायां दक्षिणार्धापरार्धाद्वेदेः किंचित्परिश्रित्य तस्मि-न्नुपविश्य केशश्मश्रूणि वापयन्ति १९ सर्वाणि च रोमाणि नखानि निकृन्तयन्ते २० स्नान्ति २१ अलंकुर्वन्ति २२ उष्णीषान्पर्यस्यन्त्या केशानां संजननात् २३ परिशेषमनूबन्ध्यायै संस्थापयन्ति २४ हृदयशूलान्ता संतिष्ठते २५

तस्यां संस्थितायां यथासंप्रकीर्णमग्नीन्समारोप्यान्तरेण चात्वालोत्करा उपनिष्क्रामन्ति २६ उत्तरत उद्धतावोक्षितेऽग्न्यायतनानि कृत्वा गोमयेनोपलिप्य मथित्वाग्नीन्विहृत्य प्रणीताः प्रणीय पूर्णाहुतीर्हुत्वा पृथगुदवसानीयाभिर्यजन्ते य आहिताग्नयो भवन्ति २७ अथ येऽनाहिताग्नयो गृहपतिमेव त उपासते २८ स काममेव पृष्ठशमनीयेन यजेत २९ कामं न यजेत ३० यदि तु यजेतैत एवास्य सत्त्रिण ऋत्विजः स्युः ३१ तेभ्यस्तद्दद्याद्यद्देयं स्यात् ३२ अत्र संवत्सरः संतिष्ठते ३३ अथातो होत्राणामेव मीमांसा । तस्यातस्तस्यातः ३४ २४

इति शाङ्खायनश्रौतसूत्रेऽष्टादशोऽध्यायः समाप्तः

इति शाङ्खायनश्रौतसूत्रं समाप्तम्